णतोप्रतिबंधिकावाच्यापद्ध्वंसंयोगसामान्याभावप्रत्यक्षं प्रतींद्रियसंबद्धद्रव्यविशेषणतात्वेन हेतुत्वात् न्यूनाद्येवन द्रव्ये संयोगसामान्याभा
वप्रत्यक्षमिति भावइत्याहुः मतांतरमाह स्याख्यायाउद्भूतरूपवदित्यादि संयोगसामान्याभावस्य द्वेधसत्वेउद्भूतरूपवन्महत्त्वमात्रसमवेतसंयोग
सामान्याभावोध्यावश्यकः तत्राप्यधर्मावच्छिन्नाभावस्य तद्धर्मावच्छिन्नाभावनियतत्वादिति प्रसक्तं तत्प्रत्यक्षे पवारणाभावश्यकमिति भावः
कश्चिदिति स्वतंत्राख्यामिश्रं सुपादकपूर्वोपक्रांत संयोगसामान्याभावस्याप्रत्यक्षत्वोपपादनमेव प्रकृते पयुक्तं नत्वभावांतरस्याप्रत्यक्षत्वोपपाद
नमित्यस्वरसो बोध्यः यद्याकृतप्रतियोगिनरस्वपत्वतत्वाभ्यां निवेशेन सामान्याभावविशिष्टाभावद्वित्वावच्छिन्नाभावमादायघटेरूपी
यथाविद्विशेषाणामभावसत्वेन रूपसामान्याभावसत्वाद्व्यभिचारः पदोपलत्वपावत्वयोरभावविशेषणत्वे च गुणत्वाद्यवच्छिन्नाभावमादाया

५

भ.प्र० १४ व३

सिद्धिः विशेषणत्वस्य व्याप्यत्वरूपतया गुणस्य संयोगव्याप्यताभावेऽपि यत्किंचिद्व्याप्यत्वेनोक्ताभावस्य पक्षेऽन्तर्गतत्वात् न च यदीयत्वं विशेषविशेषणं प्रायतत्वेन चाभा
वविशेषणमिति वाच्यं तथापि द्रव्यत्वादेः संयोगव्याप्यतया द्रव्यत्वत्वावच्छिन्नाभाववमादायासिद्धितादवस्थ्यात् विशिष्टाभावविद्धत्वावच्छिन्नाभाववमादाय पक्षतासामा
भावत्वेनाव्यभिचारवतैव संयोगसामान्याभावस्य द्रव्ये सत्त्वात् सिद्धसाधनमतस्तद्वारणाय धर्मे मेयत्वं तत्त्वाभ्यां समवायाभ्यापावच्छे येयत्वेमेति अत्रेदं चिंत्यं व्याप्यत्व
मिह सामानाधिकरण्यमात्ररूपं न तु सकलव्यभिचारीनिवेशः प्रयोजनाभावात् न चैवं संयोगत्वसमानाधिकरणमूर्त्ताद्विकमादाय परस्वरूपाभिस्थिवारणाय तत्
न्निवेशस्यावश्यकत्वं इति वाच्यं असिद्धिमात्रवारकविशेषणस्यैव पूर्यात तन्निवेशेऽपि यावदभ्यधिकप्रविष्टस्य संयोगत्वव्याप्यधर्मेण तत्त्वयोगात्संयोगत्वेन तद्वृत्तित्वे संयोग
त्वावच्छिन्नाभावस्य द्रव्ये संयोगसामान्याभावानंगीकर्तृमते द्रव्ये संयोगत्वस्वरूपासिद्धिवारणायोभयावृत्तित्वस्य धर्मविशेषणत्वेनावश्यं निवेशनीयतयान्ते
नैव समवायादेरपि वारणाच्च न चैवमपि केवलाश्वत्वादिमत्त्वादि गुरुधर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयावद्विशेषाभाववति भूतत्वादौ साध्यासत्त्वाद्व्यभि
चारः तादृशधर्मस्य गुरुतयानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धिरिति वाच्यं प्रतियोगितावच्छेदकत्वस्य पक्षधर्मविशेषणत्वे चारोपात् उक्ताप्रसिद्धिनिबंधन
व्यभिचारवारणाय यावत्त्वं न तु समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकयावद्विशेषाभाववत्त्वमेतन्मात्रस्वरूपावच्छिन्नप्रतियोगिताकाभाववत्त्वमिति तु नेयं यत हे
तुसाध्ययोस्तित्वनिवेशेऽपि सम्प्रतियोगितावच्छेदकत्वस्य पक्षधर्मविशेषणत्वे लाघवात् न चैवमपि भिन्नप्रतियोगितावच्छेदकीभूतघटत्वप्रकारकप्रमावि
शेष्यत्वपरत्वप्रकारकप्रमाविशेष्यत्वमेयत्वाद्यन्यतमत्वसमानाधिकरणोभयावृत्तितत्तद्व्यक्तित्वावच्छिन्नाभाववति अन्यतमत्वावच्छिन्नमेयत्वादेस्तत्समा
नाधिकरणोभयावृत्तितत्तद्व्यक्तित्वावच्छिन्नाभाववति अन्यतमाभावाप्रसिद्धिरिति वाच्यं यत्किंचित्त्वेन संबंधमादायासिद्धसाधनवारणाय प्रयोजकत्वे संबंधाव
च्छिन्नप्रतियोगितावच्छेदकीभूतयत्समसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयावद्विशेषाभाववान्मतत्संबंधेन तद्धर्मावच्छिन्नाभाववानिति स्याव

रम० १७

५

शपंविषयणितातादात्म्यसंबंधावच्छिन्नस्वत्वकप्रतियोगितावच्छेदकीभूतान्यतमत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभाववतितत्संबंधावच्छिन्नान्यतमत्वावच्छि
न्नाभावस्यान्यतमभेदस्यपर्वत्वेनंदोषात् ननुव्यभिचारवारकविशेषणस्यैवसार्थक्येनासिद्धिमात्रवारकस्यधर्मस्यभयावृत्तित्वविशेषणस्यैवैयर्थ्यंदुर्वारमेव नचव्याप्ति
ग्रहौपयिकविशेषणस्यैवसार्थक्येनात्रसंयोगत्वसमानाधिकरणेतत्संयोगान्यसंयोगत्वतत्संयोगान्यसंयोगत्वाद्यवच्छिन्नयावदभावनिरूपितैकाधिकरणेतत्स्य
प्रसिद्ध्याव्याप्तिग्रहासंभवेनोभयावृत्तित्वविशेषणस्यव्याप्तिग्रहौपयिकतयासार्थक्यमितिवाच्यंतादृशविशेषणापितादृशतत्रत्संयोगत्वाद्यवच्छिन्नयावदभावनि
रूपितैकाधिकरण्यत्वाप्रसिद्ध्याव्याप्तिग्रहासंभवादितिचेन्मैवं एतादृशप्रसिद्धिविरहस्यैवस्यमाणरीत्यासंभवात् तथाहि यत्त्वस्यव्यापकतारूपतयापादृश
समानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकाधेयताप्रतियोगित्वादितिहेतुःपर्यवस्यति एवंचगुणादि
प्रतियोगिकाधेयतायांसंयोगत्वसमानाधिकरणोभयावृत्तितत्संयोगत्वाद्यवच्छिन्नप्रतियोगिताकाभाववृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वमस्तितत्
त्संयोगत्वावच्छिन्नाभावेगुणादिप्रतियोगिकाधेयतायाःसत्त्वात् किंचसंयोगत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववृत्त्यन्योन्याभा
वप्रतियोगितानवच्छेदकत्वंहिसप्रतियोगिकाधेयतायांनसंभवतिसंयोगत्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाववृत्त्यन्योन्याभावप्रतियोगिता
नवच्छेदकत्वेचनसंभवतितत्रसंयोगत्वसमानाधिकरणगुणत्वावच्छिन्नाभावस्यदैशिकसत्त्वेवतादृशाभावेदृशप्रतियोगिकाधेयतावच्छेदकसत्त्वेनतादृशाधेय
तायांतादृशाभाववृत्त्यन्योन्याभावप्रतियोगितावच्छेदकत्वाभावासंभवादितिपक्षधर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववृत्त्यन्योन्या
भावप्रतियोगितावच्छेदकत्वाभावस्योभयावृत्तित्वापादितपक्षधर्मसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाववृत्त्यन्योन्याभावप्रतियोगितावच्छेदक
त्वाभावसमनैयत्येनतत्साधुभिन्नतयाःस्वरूपाभावघटकतयानोभयावृत्तित्वविशेषणवैयर्थ्यंनचतथापिसंयोगत्वसमानाधिकरणोभयावृत्तितत्संयो

गित्वावच्छिन्नाभाववृत्त्यन्योन्याभावप्रतियोगित्वीपाधिपत्वीपस्वरूपसंबंधावच्छिन्नावच्छेदकत्वाप्रसिद्ध्याहेतुत्वप्रसिद्धिःस्वाधिपत्वीपस्वरूपसंबंधेननिर्विघ्नपदार्थेवि-
पिताधिपत्वस्य तत्रसत्वेन तेन संबंधेन तद्वृत्तेरस्य तत्राभावात्संबंधसामान्येनावच्छेदकत्वनिवेशे विषयितासंबंधेनाधिपतावज्ञानभेदस्य तादृशाभाववद्वृत्तित्वेन तादृश्या-
भाववृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकाधिपत्वाप्रसिद्धिरिति वाच्यं तादृशाभाववद्वृत्त्यन्योन्याभावीयप्रतियोगितासामान्ये स्वाधिपत्वीपस्वरूपसंबंधेनपदाधेय-
त्वावच्छिन्नत्वाभाववत्तादृशाधेयताप्रतियोगित्वस्य हेतुत्वपादसाधेयत्वावच्छिन्नत्वस्य वृत्त्यावृत्तिघटनिष्ठान्योन्याभावप्रतियोगितायां प्रसिद्धत्वेनानुपपत्त्यभावा-
त् अथ साध्याप्रसिद्धिवारणाय पात्तस्वधर्मविशेषणस्य प्रतियोगितावच्छेदकत्वस्य साध्याप्रसिद्धिमात्रवारकतया व्यभिचारावारकत्वाद्धेतुपर्यन्तसाध्याप्र-
सिद्धौ साध्याभाववद्वृत्तित्वरूपव्यभिचारासंभवेन व्यभिचारवारकत्वासंभवादितिचेन्न साध्यसाधनभेदेन व्याप्तेर्भिन्नतया प्रकृते वेल्लस्यापि व्याप्तेर्निर्वक्ष्यत-
या व्यभिचारवारकत्वसंभवात् तथाहि यद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववद्वृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकाधेयताप्रतियोगित्वस-
मानाधिकरणाभावप्रतियोगितायां यद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नत्वाभाववत्तादृशप्रतियोगितावच्छेदकत्वमेव तद्धर्मनिष्ठव्याप्तिः सैवेहप्र-
कृतानुमितिप्रयोजिका तथा च कंबुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिघटत्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्त्यन्योन्याभावप्रतियोगितानवच्छेदका-
धेयताप्रतियोगित्वसमानाधिकरणाभावप्रतियोगितायां घटत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नत्वाभाववत्त्वात् तादृशप्रतियोगितावच्छेद-
कत्वं घटत्वस्यैवेति न रासभादिरूपव्यभिचारस्य कंबुग्रीवादिमत्त्वे सत्त्वेन तद्वारणाय प्रतियोगितावच्छेदकीभूतेति धर्मविशेषणमावश्यकं तथा च प्रतियो-
गितावच्छेदकीभूतधर्मनिष्ठतादृशानवच्छेदकत्वमेव व्यभिचार इति कंबुग्रीवादिमत्त्वस्याभावप्रतियोगितानवच्छेदकत्वात्तन्निष्ठानवच्छेदकत्वेन व्य-
भिचार इति व्यभिचारवारकतया तस्य सार्थक्यमिति पटह्रासंयोगत्वे त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववृत्त्यन्योन्याभाव-

यानाभावइत्यत आह विशेषणतावच्छेदकप्रकारकेनिस्वयस्यवेति कार्यतावच्छेदकत्वमिति प्रकारतयेत्यादि अभावप्र
तियोगितायां विशिष्टसत्ताभावप्रतियोगितायां पूर्वलक्षणाद्युपेयशक्यपारिभाषिकावच्छेदकपरतयैतल्लक्षणे
पिस्वशक्यसत्त्वस्य रत्वमेवेति शंकास्यादत आह स्वमिति ॥ स्वविशिष्टेत्यादि किंच प्रागुक्तो भयाभावप्रतियोग्येकदेशोक्ती
र्नेनमित्सो शयेन समुदितपर्यवसितार्थमाह इत्थं चेत्यादिना गुणात्मत्वविशिष्टसत्तात्वाश्रयसंबंधिनिष्ठेति गुणात्मत्व
विशिष्टसत्तात्वाश्रयीभूता या सत्ता तत्संबंधी यो गुणादिस्तन्निष्ठेत्यर्थः सत्तात्वादिकमेवेति एवकारेण विशिष्टसत्तात्व
व्यवच्छेदः तस्य स्वाश्रयसंबंधिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वादिति भावः जातिसमानाधिकरणाभावप्र
तियोगितासामान्येत्यस्य विशिष्टसत्ताभावप्रतियोगितासामान्ये तदवच्छेदकत्वस्य सत्तात्वाद्यवच्छेदकत्वस्य सत्तात्वा
दिपर्याप्तावच्छेदकताकत्वस्येति यावत् पत्वं वा घटत्वव्यक्तित्वादिकं द्रव्यत्वादीति ननु धूमत्वादिकमिति शेषः अति
व्याप्तिवारणाय इति संबंधसामान्येन संबंधितोक्तो कालिकादिसंबंधेन धूमत्वादिविशिष्टधूमसंबंधिपर्वतगोलकादि
निष्ठाभावप्रतियोगितानवच्छेदकं न धूमत्वादि किंतु द्रव्यत्वाद्येव तदवच्छेदकत्वसंयोगाद्यवच्छिन्नत्वोभयाभावस्य
[illegible]स्यादिसमानाधिकरणाभावप्रतियोगितासामान्ये सत्वादतिव्याप्तिरिति भावः अयोगोलकादौ वह्नेः योभावः
संयोगावच्छिन्नत्वस्य तत्प्रतियोगितानवच्छेदके द्रव्यत्वाद्येव प्रसिद्धमत आह धूमसादावितिआदिनाक्रियापरिग्रहः तन्मात्र

स्य कालोपाधितत्था ध्वंसादेः कालिकसंबंधेन धूमत्वविशिष्टसंबंधित्वं दृष्टव्यं संयोगावच्छिन्न इति संयोगावच्छिन्नप्रतियो
गिताकस्यार्थः प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य निवेशादिदमुक्तं तथात्वात् तद्ध्वंसादिनिष्ठाभावीयप्र
योगावच्छिन्नप्रतियोगितानवच्छेदकत्वात् न तु घटाभावत्वादेरपि संयोगावच्छिन्नघटाभावाद्यभावप्रतियोगितावच्छेद
कत्वात् ननु घटाभावत्वादेरपि संयोगावच्छिन्नघटाभावाद्यभावप्रतियोगितावच्छेदकत्वमेवेत्यत आह घटाभावत्वादेरपि
संयोगावच्छिन्नत्वघटितेति अभावत्वेनैवेति न चाभावत्वस्य घटाभावाभावादिप्रतियोगितातिप्रसक्तत्वेन कथमवच्छेदकत्वमि
तिवाच्यं। संयोगेनाभावाभावस्य घटाभावादेरभावस्य समनैयत्येनाभावमात्रस्यैव संयोगावच्छिन्नघटाभावाभावादिप्रतियो
गितास्वत्वेनातिप्रसक्त्यभावात् एवमपि तादृशानवच्छेदकप्रसिद्धावपि तदवच्छेद्यत्वेति॥ घटाभावत्वाद्यवच्छेद्यत्वे सर्थः
सामान्यतो घटाभावत्वाद्यवच्छिन्नसमानाधिकरणासंबंधावच्छिन्नप्रतियोगिताभावाप्रसिद्धेरिति भावः। प्रसिद्धिसंभवादि
तिअभावत्वावच्छिन्नभेदस्य घटाभावत्वाद्यवच्छिन्नभेदसमनैयत्यादिति भावः अत एव घटाभावत्वादेरेव तथात्वादेव न
भवतीति एतेन वह्निमान् धूमादित्यादौ तादृशानवच्छेदकाप्रसिद्ध्या ऽव्याप्तिरिति संबंधित्वं साध्यतावच्छेदकसंबंधेन वा
च्यमिति यत्केश्चिदुक्तं तन्मतं दूषितं॥ एतदर्थमेव धूमवान् वह्नेरित्यादावतिव्याप्तिवारणार्थमेव संयोगी सत्वादित्यादौ
संयोगत्वादेस्तादृशानवच्छेदकत्वाभावेपि द्रव्यत्वत्वादेरेव तादृशानवच्छेदकतया तदवच्छेद्यत्वसमवायावच्छिन्नत्वाभावा

भावस्य तादृशद्रव्यत्वाभावादिप्रतियोगितायामसत्वेनातिव्याप्तेरभावादिति भावः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिका
धिकरणत्वे तादृशप्रतियोग्यनधिकरणवृत्तित्वे तादृशप्रतियोगिसमानाधिकरणत्वाभावोक्तौ संयोगेन साध्यतायां संयो
गेन घटाभावादेरसंग्रहेणाव्याप्तिप्रसंगात् प्रतियोगितायामिति सत्वेनेत्यग्रेतनेनान्वयः समवायेन साध्यतायामव्याप्तिरु
क्तौ संयोगेन साध्यतायामप्याह वह्निमानिति प्रतियोगिव्यधिकरणेति संबंधसामान्येन प्रतियोगिव्यधिकरणोऽर्थः तादृशा
भावे निवह्नित्वविशिष्टसंबंधिनिष्ठाजातीनानागततत्तद्व्यक्त्यभावेत्यर्थः सत्वेनेति नासंभववदग्रेतनेनान्वयः प्रतियोगि
तावच्छेदकावच्छिन्नेत्यस्य व्यावृत्तिमाह सत्तावानजातेरिति प्रतियोगितानवच्छेदकमिति विशिष्टसत्ताभावस्य सत्तात्वप्रति
योगिसमानाधिकरणत्वादिति भावः सत्वेपि चेतिनाव्याप्तिर्वेत्यन्वयः वाकारोऽव्यवस्थितविकल्पार्थः अत्र यत्तद्द्रव्यत्वत्व
प्रकारकप्रमाविषयोऽद्रव्यत्वत्वादित्यादौ प्रमाविषयत्वीयस्व[illegible]संबंधावच्छिन्नप्रतियोगिताकहेतुसमानाधिकरणाभा
वप्रतियोगितावच्छेदकघटत्वप्रकारकप्रमाविषयत्वत्व[illegible]देः केनापि संबंधेन साध्यतावच्छेदकविशिष्टसंबंधिवृ
त्तित्वादिवृत्तित्वेनासंभवति एकज्ञानविषयत्वादेः संबंध[illegible]स्य त एव घटत्वप्रकारकप्रमावि
षयत्वत्वादेः स्वविशिष्टसंबंधिनिष्ठसंबंधसामान्येन प्रतियो[illegible]करणाभाव प्रतियोगितावच्छेदकत्वेतदनवच्छे
दकावच्छेदकत्वघटितोभयाभावस्य हेतुसमानाधिकरणाभावीयतदवच्छिन्नप्रतियोगितायां सत्वेन लक्षणसमन्वय

प॰प्र॰
६५

संभवात् संबंधस्य सामान्येन प्रतियोगिव्यधिकरणत्वोक्तौ कथमसंभव इति चेन्न एकज्ञानविषयत्वादिः संबंधत्वा
भावेपि सामानाधिकरण्यस्य संबंधत्वे विवादाभावेन स्वरूपसंबंधसमवायोभयघटितसामानाधिकरण्यसं
संबंधेन घटत्वप्रकारकप्रमाविषयत्वादेर्द्रव्यत्वादिवृत्तित्वात्तन्निष्ठसंबंधसामान्येन प्रतियोगिव्यधिकरणाभाव
प्रतियोगितावच्छेदकत्वासंभवेनोक्तरीत्या तत्रापि लक्षणासमन्वयासंभवेनासंभवस्य संभवात् साध्यतावच्छेदक
संबंधेन प्रतियोगित्वविवक्षणायोपक्रमे तेन वृत्त्यनियामकेसादिना कृत्यनियामकसंबंधस्याभावप्रतियोगि
तानवच्छेदकत्वे मेयत्वादेरवृत्तित्वात्तादृशानवच्छेदकत्वेन तदवच्छेद्यत्वस्य समवायादिना मेयसामान्याभावप्रतियो
गितायां प्रसिद्ध्या नासंभवसंभावनेत्यत उक्तं वृत्त्यनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वे इति मे
यत्वादेरेव केवलान्वयित्वेन तादृशाभावप्रतियोगितानवच्छेदकत्वसंभव इत्यत आह मेयत्वादेरपीति
पर्वतादावित्यभाव इत्यन्तेनान्वितं वह्निमत्त्वेनैवेति संयोगेन समवायेन तदन्यतराभावस्य तेन संबं
धेन वह्निमत्त्वावच्छिन्नाभावस्य सत्त्वेनेयस्यादिति भावः॥ न च विनिगमनाविरहेणोक्तत्वाभावत्वस्याभावत्व
स्यैवावच्छेदकत्वसंभवेन वह्निमत्त्वेनैवेत्यसंगतमिति वाच्यं वह्निमत्त्वापेक्षया गुरुत्वात् तदवच्छिन्नाभावस्य

राम॰
६५

न्तराभावांसमनियतत्वापात्तस्यानवछेदकत्वात् एतेन तादृशान्यतराभावप्रतियोगितावछेदके हृदत्वाभाव
त्ववह्निमत्वोभयमेव ननु अन्यतरत्वमिति गुरुत्वरणानामुक्तिरपि शिथिलैवेति वस्तुतस्तु एवकारस्यान्यतरत्वमात्र
[illegible]व्यवछेदकतया गुरुत्वरणोक्तिरपि समीचीनैव अत्र स्पष्टा न्यूनत्वे हेत्विज्जपावह्निमत्वस्यान्यतरत्वप्रतियोगिता
वछेदकत्वासंभवेन वह्निमत्वेनैवेत्यसंगतेः आनत्वानुपदं यद्वह्निमत्वहृदत्वाभावत्वादिनैवावछेदादित्तिवृपत्तिः अ
न्याधानत्राद्वितलाघवेनवह्निमत्वस्यैवावछेदकत्वेन हृदत्वाभावत्वस्यावछेदकत्वोक्तेरसंगतेरितिभंतव्ये ननु व
ह्निमत्तिविषयितादिना तदन्यतराभावसत्वेन तत्प्रतियोगितायास्तदन्यतरत्वेनैवावछेदोनस्यंवाच्यं हृदत्वाभावा
दिविषयकज्ञानसाधारणस्यविषयितया वह्निमत्वाद्यवछिन्नाभावस्यतादृशतद्वृत्तान्यतराभावासमनेय
त्वेन वह्निमत्वादेस्तदवछेदकत्वासंभवात् आह विषयितादिरूपव्यधिकरणसंबंधेनेति ननु तादृशान्यतर
स्य विषयितयात्तानेद्वृत्तित्वेन विषयितायाः कथंतद्यधिकरणसंबंधत्वमिति चेन्नैवं स्वरूपसंबंधात्मकविषयिता
याः स्वतज्ज्ञानस्वरूपत्वेन वह्निमत्वाद्विषयकज्ञानरूपविषयितया हृदत्वाद्यभावस्य हृदत्वाद्यभावमात्रविषयक
ज्ञानरूपविषयितयाचवह्निमतोः वृत्तितया घटज्ञानादिरूपविषयितयाचतदन्यतरस्याप्यवृत्तितया विषयितायां
प्रदन्यतरत्वावछिन्नव्यधिकरणसंबंधात्वं वह्निमत्हृदत्वाद्यभावान्यतरदिति ज्ञानेनतदन्यतरत्वेनान्यतरमात्रस्येवदि

भा

भ.प्र.
८८

भावतया तादृशज्ञानरूपविषयितायाः एतत्तदन्यतरत्वावच्छिन्नसमानाधिकरणसंबंधत्वादिति वह्निमत्त्वहृदत्वाभाव
त्वादिनैवेति वह्निमत्त्वाश्रयविषयकज्ञानरूपविषयितासंबंधावच्छिन्नान्यतराभाववत्त्वस्य तादृशविषयितया वह्निमत्त्वा
भावसमनैयत्येन वह्निमत्त्वमेव तत्प्रतियोगितावच्छेदकं हृदत्वाद्यभावमात्रस्य विषयकज्ञानरूपविषयितासंबंधाव
च्छिन्नान्यतराभावस्य तादृशविषयितया हृदत्वाद्यभावत्वावच्छिन्नाभावसमनैयत्येन हृदत्वाभावत्वादिकमेवावच्छेद
कं न तु हृदत्वाभाववह्निमदन्यतरत्वादिकमपि गौरवादिति भावः वस्तुतस्तु सर्वत्रोक्तयुक्त्या उभयस्यैवान्यतराभावप्र
तियोगितावच्छेदकत्वमिष्टं चा व्यधिकरणत्वेन तन्नियामकत्वेन तथा च विषयितायाः तन्नियामकत्वे न तेन संबंधेन त
दन्यतराभावस्य तदन्यतरत्वं गौरव[illegible]प्रतियोगितावच्छेदकं किंतु वह्निमत्त्वादिकमेवेत्याशयस्तु न स्यादिति फ.
तन्नियामकसंबंधे व्यधिकरणसंबंधपदप्रयोगस्यास्वारसिकत्वात् उद्देश्यत्वात् विषयतेति पाठे तु न कोपि सं
कालेशः वस्तुतस्तु विशेषणतानिष्ठसंबंध इति प्राचीनरीत्या ज्ञानस्य विषयिताविषये विषयस्य विषयताज्ञाने
संबंध इति विषयिताज्ञानस्य समानाधिकरणसंबंधो विषयस्य व्यधिकरणसंबंध एवेति ध्येयं अन्यतरत्वस्यै
वेति एवकारेण धूमत्वादेरवच्छेदकत्वव्यावृत्तिः कालत्वस्याहि घटादिमत्त्वस्य साध्यत्वे च कालिकविषयितान्यतरसंबंधे निरवं
च्छेदकाले घटादिमानेव विषमकालस्य रादिज्ञाने चातीतानागतत्वादेः भावस्य च तदभावस्य कालिकविषयिता

सम०
८८

ष्यां प्रतियोगिव्यधिकरणस्य प्रसिद्धिः संभवतीति जगदाधारत्वस्य सर्वस्य च साध्यतानुसरणं कालपरिमा
णमिति प्राचीनमते क्रियामात्रस्यैव कालोपाधितया जन्यद्रव्यस्पंदेऽकालेन व्यभिचारः नवीनमते महाका
लपरिमाणस्य हेतुत्वेऽदृष्टार्थमतो न व्यभिचार इति ध्येयं व्यधिकरणस्येति महाकालेश्वरज्ञानभिन्नस्ये
तिशेषः अप्रसिद्धेरिति तथा च स्वविशिष्टसंबंधेन महाकालादेस्तेन संबंधेन प्रतियोग्यधिकरणतयानंतत्त्रो
क्ताभावस्यापि प्रतियोगिवैयधिकरण्यप्रसिद्धिराशयः यथाश्रुते सिद्धांतलक्षणोक्तदिशोभयाभावघटितलक्ष
णपक्षे महाकालादेस्तेन संबंधेन प्रतियोग्यधिकरणतयाऽसंगतेः अत एवेतीय प्रतियोगिवैयधिकरण्यस्योभ
याभावघटितलक्षणेऽपि न निस्तारः एतत्कल्पे गगनादेरपि कालिकसंबंधेन वृत्तितयात्यंताभावमादायापि प्रसिद्धेर
संभवादिति ध्येयं स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायामिति प्रतियोगितावच्छेदकसंबंधेन यादृशप्रतियोगिता
वच्छेदकावच्छिन्नानधिकरणत्वं स्वविशिष्टसंबंधिनस्तादृशप्रतियोगितासामान्ये इत्यर्थः हेतुसमानाधिकरणाभा
वेति हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावे इत्यर्थः वस्तुतस्तु स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायामि
तिति हेतुसमानाधिकरणाभावेति च यथाश्रुतमेव यत्संबंधावच्छिन्नत्वं तत्संबंधावच्छिन्नत्वनिपर्याप्तो चेनपाप्रति

योगितयोरेकसंबंधावच्छिन्नत्वनिवेशलाभेनमौलेऽसमीयप्रतियोगिवैयधिकरण्यपदयोर्निवेशप्रयोजनाभावात् अत एव प्रति
योगितयोरेकसंबंधावच्छिन्नत्वस्येत्यादिकं दीधितौ निष्टंकितं तदभिप्रायकमेवेदमिति न कोऽपि दोषः विवक्षितत्वादिति एतेना
त्रत्वविशिष्टसंबंधिनिष्ठप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगि
तावच्छेदकावच्छिन्नमेवहेतुसमानाधिकरणतादृशाभावीयप्रतियोगितायां निवेश्यतां लाघवात् कृतं न तद्घटगर्भतयेत्यस्या
कायाअपि निरासः उपदर्शितस्थलेतादृशप्रतियोगितायाअप्रसिद्ध्याऽव्याप्तिवारणायोभयाभावघटनायाआवश्यकत्वेन
तत्त्वाभावघटनगर्भतया आवश्यकत्वात् सर्वत्वविशिष्टसंबंधिमहाकालेति इदं च तद्गतव्यावर्त्यत्वे सर्ववत्वपर्यवसितमेवेत्या
शयेन बोध्यं तेन हृदयेपक्षेतद्गताधारत्वेसाध्यकेऽव्याप्तिरुक्तागतिद्वारेतसर्ववत्वसाध्यकेऽव्याप्तिरुद्भावितेति शेषमप्यमिति कां
कापाञ्चनवकाशः अत्र महाकालेतीष्टत्वानस्पकालिकसंबंधावच्छिन्नत्वेति विषयतासंबंधावच्छिन्नत्वस्य कालपरि
माणेतिनिसक्तविषयकत्वस्योपलक्षकं तेन पूर्वपक्षोक्तद्वितीयाव्याप्तिरप्युद्धृताभवति नन्वेवं प्रतियोगितायां साध्यताव
च्छेदकसंबंधावच्छिन्नत्वस्यानिवेशात्प्रतियोगित्वं साध्यतावच्छेदकसंबंधेन बोध्यमित्यस्येतनग्रैव्यासंगतिः एवं गुणवानघ
टत्वादित्यादावव्याप्तिः समवायेन गुणावच्छिन्नाभावप्रतियोगितानवच्छेदकस्य गुणत्वस्य हेत्वधिकरणघटनिष्ठविषयित
यागुणत्वव्ज्ञानाभावप्रतियोगितावच्छेदकत्वादत आह कृतमिति प्रतियोगित्वं साध्यतावच्छेदकसंबंधेन बोध्यमित्यत्रेत

नन्वेवमप्युत्कीर्तितोभयाभावविवक्षायामेवतात्पर्यं यद्वा सकलसंबंधलाधारंगसंबंधलक्ष्येकाभावेन स्वविशिष्टसंबं
धिनिष्ठप्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणाभावप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वसाध्यतावच्छेद
कसंबंधावच्छिन्नत्वोभयाभावो हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितासामान्येन तद्धर्मावच्छिन्नत्वसा
ध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभावस्तत्वेव विवक्षितमिति तेनाग्रेतनग्रंथविरोधः यद्धर्मावच्छिन्नत्वं येन संबंधेन तद्धर्मा
वच्छिन्नत्वमपि तेनैव संबंधेन विवक्षणीयमिति न गुणवान् घटत्वादित्यादावव्याप्तिरपीसाधुत्वं अतिप्रसंजकत
येति तादृशप्रतियोगितावच्छेदकेपि पिपलिंचित्तादृशप्रतियोगितावच्छेदकभेदसत्त्वादिति भावः उभयाभावत्वं त्वगणउभयाभा
वघटितत्वलक्षणं तादृशप्रतियोगितानवच्छेदके तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नभिन्ने सत्यर्थः अप्रसिद्धेरिति।
नच तादृशानवच्छेदको तेन स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वसंबंधावच्छिन्नत्वो
भयाभावविवक्षणे तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नभेदाप्रवेशान्नाप्रसिद्धिरिति वाच्यं तत्रापि सामान्यत्वस्य
व्यापकत्वातिरिक्तस्य दुर्वचतया तादृशप्रतियोगितात्वव्यापकत्वनिवेशे न च तादृशप्रतियोगितानिष्ठाभावप्रतियो
गितावच्छेदकत्वत्वावच्छिन्नभेदप्रवेशेन प्रसिद्धेर्दुर्वारत्वात् दीधितौ तादृशप्रतियोगिताश्चेत्स्वत्वार्थ स्वविशि
ष्टसंबंधिनिष्ठाभावप्रतियोगितात्वेत्यर्थः विशिष्य॥ग्र॥ नन्वेकिं मेतत्तु तादृशप्रतियोगितात्वेनेत्यर्थः उपादेया

ग.प्र.
२८

देयाइति तथा चवह्निगतत्वायां यः त्वविशिष्टसंबंधिनिष्ठाभावविरूपिताः प्रतियोगितास्तत्तदवच्छेदकत्वावच्छिन्न
भेदकूटवत्त्वमेवानवच्छेदकांतार्थ इति भावः। दूर्यं च त्वमिति त्वविशिष्टसंबंधिनिष्ठेत्यादि लक्षणघटकत्वादिः पू
र्वपक्षे प्रथमोक्तमपि मध्यमलक्षणोः त्रिव्याप्तिप्रद्युम्नमनुकृत्यैवोभयाभावघटितलक्षणस्यापत्त्वषानेन तत्रोक्ताम
व्याप्तिनेवाद्यवदुद्धरतिव्याप्त्यामांतथा चेत्यादि तन्नद्वच्छेदकभेदेति तत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदेत्यर्थः ए
वं च अनयैव रीत्या वक्तुं उपादेयतया वक्तुं उचितमिति विनिगमनाविरहादिति भावः एकैकत्यादिस्वरूपसंबंधात्मकेत्यादि।
गोत्वादिरिति एकप्रतियोगितावच्छेदकनानाधर्माणां विशिष्य भेदनिवेशादिति भावः लाघवादिति तेषां तत्प्रतियोगिता
वच्छेदकत्वेनानुगमेन तेन रूपेणैकभेदनिवेशादिति भावः पद्द उचितमिति अन्यथा प्रतियोगितावच्छेदकभेदेन प्रति
योगितायाभिन्नतया घटघटाभावप्रतियोगिताया घटत्वावच्छेदकत्वस्यापि घटत्वादिति शेषः तथा च किल समनियततयापेक्षपेक्ष्य
गुरुत्वेनानवच्छेदकतया गुरोरवच्छेदकत्वे विना दुर्वचत्वात् तदवस्थ्यापत्तेरिति भावः प्रतियोगितावच्छेदकासमनैय
त्येनैव प्रतियोगिताभेदोपगमेन प्रतियोगितावच्छेदकभेदेपि समनियतनानाधर्मावच्छिन्नप्रतियोगिताया भेदेना
नाभावद्वयापत्त्याभेनाह एकप्रतियोगितायामपीति एकस्या एव प्रतियोगिताया अपीत्यर्थः गोत्वादिनिताद्या
वच्छेदकस्य विशिष्योपादाने एकप्रतियोगितावच्छेदकसमनियतनानाधर्माणां तत्तद्व्यक्तित्वादिना नानाभेदनिवेशा

राम.
२८

बाधकाभावात् तादृशावच्छेदकव्यक्तीनां तत्तद्व्यक्तित्वेनोपादाने तादृशावच्छेदक

त्वमिति भावः लाघवादिति तादृशप्रतियोगितानां विशिष्योपादाने तत्तदवच्छेदकत्वेन समनियतनानाधर्माणामननुगमेन तेन
तद्रूपेणाननुगमे कभेदनिवेशादिति भावः अत एव घटत्वादिनिष्ठतद्व्यक्तित्वमपेक्ष्य घटाद्यभावप्रतियोगितावच्छेदकत्वस्य
गुरुतमानवच्छेदकत्वेन गुरोरवच्छेदकत्वं विना दुर्वचत्वात् प्रागुक्तं निरस्तं घटाद्यभावप्रतियोगितावच्छेदकत्वस्य
समनियतनानाधर्मसाधारणस्य घटत्वादिनिष्ठतत्तद्व्यक्तित्वापेक्षया नैयत्येन प्रतियोगितावच्छेदकत्वं हानसीयधूमत्वादिव्य
क्तित्वावच्छिन्नभेदस्य धूमत्वाद्यवच्छिन्नत्वेन धूमत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वानिर्वाहः तादृशप्रतियोगितानामेव
तत्तद्व्यक्तित्वेनोपादाने च तत्प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वस्य तत्तत्त्वेन तन्निर्वाह इति तादृशप्रतियोगि
तानामेव विशिष्योपादानं सम्यक् एतेन तादृशप्रतियोगितात्वेनैव नियमे तादृशावच्छेदकानामेव विशिष्योपादानपरो
ननु तादृशप्रतियोगितानां तथात्वे तु तत्तदवच्छेदकनिष्ठतत्तद्व्यक्तित्वेनावच्छेदकत्वेन तत्तत्प्रतियोगितानिरूपिता
वच्छेदकत्वस्यानवच्छेदकतया गुरोरवच्छेदकत्वं विना दुर्वचत्वात् तदिदं यस्य तादृशावच्छेदकोपादानरूपत्वं क
थमिति चेत् तदवेहि तादृशप्रतियोगितात्वेनैव तादृशावच्छेदकनिष्ठप्रतियोगितापर्याप्त्यर्थः विशिष्येति तत्तदवच्छेद
कनिष्ठतत्तद्व्यक्तित्वावच्छिन्नत्वेनैवेत्यर्थः उपादेया इति प्रवेशनीया इत्यर्थः ननु अनुगततादृशावच्छेदकत्वेन निवेशः मा तदिति
गुरुधर्मस्यानवच्छेदकत्वे व्याहतं दुर्वचत्वस्यापत्तिरिति भाव इति कस्यचिल्लिखितमपि परास्तं परे तु ननु विशिष्ये

भ॰प्र॰ ४४

त्वादौ तादृशावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदोऽवश्यं निवेशनीयः अन्यथातिप्रसंगात् तथा च गुरुत्वधर्मस्यानवच्छेद-
कत्वे गुरुत्वे तत्साध्यतायां तादृशसाध्यतावच्छेदकघटिततादृशावच्छेदकत्वाद्यवच्छिन्नप्रतियोगिताया अप्रसिद्ध्यापत्तिरिति
गुरोरवच्छेदकत्वं विना दुर्वचत्वमुक्तलक्षणस्येत्यत आह तादृशप्रतियोगितायां अप्रसिद्ध्यापत्तिरिति गुरोरवच्छेदकत्वं वि-
नादुर्वचत्वमुक्तलक्षणस्येत्यत आह तादृशप्रतियोगिताघटितस्यादि पादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं
स्वविशिष्टसंबंधिनस्तादृशप्रतियोगितेत्यर्थः ~~उपादेयादृत्यस्यावयवस्युपादेया इत्यर्थः तथा च~~ प्रतियोगितावच्छेदकावच्छि-
न्नत्वस्य स्वपकस्वघटितत्वादि पूर्वोक्तविकल्पस्य सेक्ताया तादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं स्वविशिष्टसंबंधिन
स्तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदस्यैव लक्षणे निवेशेन प्रतियोगिकोटौ साध्यतावच्छेदकस्याप्र-
वेशो चतत्कोरवं न यथाधकामेति न गुरोरवच्छेदकत्वं विना दुर्वचत्वमिति भावः यद्वा तादृशप्रतियोगिताश्चैत्यादि ग्रंथस्य त-
त्त्वलघुधर्मावच्छिन्नप्रतियोगिता एव विशिष्टसंसर्गतयोपादेया इत्यर्थः तथा च कंबुग्रीवादिमान्नास्तीत्यादौ यथा गुरुत्वध-
र्मस्यानवच्छेदकत्वमते कंबुग्रीवादिमत्त्वादिरूपप्रतियोग्यभावयोः कंबुग्रीवादिमत्त्वाद्यवच्छिन्नप्रतियोगितायास्संबंध-
त्वासंभवेन घटत्वाद्यवच्छिन्नप्रतियोगिताया एव संबंधत्वमुपेत्य घटत्वाद्यवच्छिन्नप्रतियोगितासंबंधेन कंबुग्रीवादिम-
त्प्रियोऽभावइत्यादिस्तावार्थस्य तथा प्रकृतेपि वह्नित्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वादिरूपसंभव

रम॰ ४४

इत्यर्थः उपादेयादृत्यवस्य मुपादेयादृत्यर्थः तथा प्रतियोगिता

स्वनुयोग्यवच्छिन्नप्रतियोगितासंबंधेन प्रमेयवह्नित्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकीयो भेदेल
क्षणावावच्छेदक इति न गुरोरवच्छेदकत्वं विना दुर्वचत्वमिति भावः अन्ये तु वचरीत्याग्निष्टोमेन स्वर्गकामो यजेतेत्या
दौ विजातीयस्वर्गसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगितासंबंधेन स्वर्गसमानाधिकर
णाभावप्रतियोगितावच्छेदकीयो भावः स्वर्गसाधनत्वघटकतया प्रतीयते इति न बाधितार्थकत्वं अस्यार्थः स्वर्गपदस्य
नानार्थत्वाभावपक्षे वैजात्यस्य प्रागनुपस्थित्या विजातीयस्वर्गसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्न
प्रतियोगिताकभेदबोधासंभवेन स्वर्गत्वावच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिता
कभेदस्य वाग्निष्टोमत्वादौ बाधेन बाधितार्थकत्वप्रसंगो दुर्निवारः आकांक्षारूपायास्तु तत्तत्तत्समभिव्याहारभेदे
न भिन्नतया दोषादिति प्राहुः प्रतियोगित्वमित्यादिग्रंथे विशेषणोपलक्षणद्वये यप्रतियोगितायां साध्यतावच्छेद
कसंबंधावच्छिन्नत्वनिवेशाभिप्रायकः प्रतियोगित्वस्य प्रथमनिर्देशात्प्रथमलक्षणे प्रतियोगित्वस्य प्राथम्या
दित्येकेषां चिन्मतं कथं लक्षणद्वय आह प्रतियोगिताधर्मिकेति एवं च पूर्वलक्षणद्वये तत्र पूर्वलक्षणद्वये प्रतियोगिव्य
धिकरणत्वेनैव तन्निवेशेनैव दोषाभावादिति तथा च पूर्वलक्षणद्वये प्रतियोगितायां साध्यतावच्छेदकसंबंधा
वच्छिन्नत्वनिवेशे प्रयोजनाभाव इति भावः अथ प्रतियोगिताधर्मिकोभयाभावघटितलक्षणेऽपि साध्यतावच्छेदक

न चैवमन्वयितावच्छेदकावच्छिन्नप्रतियोगितया संसर्गत्वस्य विद्युत्पत्ति
सिद्धं गमसंगहे वाच्यं

भ॰ग॰
१९०

संबंधेन प्रतियोगिव्यधिकरणत्वं लक्षणघटके तेनैव संबंधेनेदमाद्यदोषाभावे प्रतियोगितायां साध्यतावच्छे
दकसंबंधावच्छिन्नत्वनिवेशे प्रयोजनाभाव इति चेन्न महाकालमात्रवृत्तिकालिकविशेषणतासंबंधेनेश्व
रज्ञानमात्रवृत्तिविषयितासंबंधेन च साध्यतायां सद्धेतौ महाकालेश्वरज्ञानयोरेव साध्यतावच्छेदकसंबंधेन
स्वविशिष्टसंबंधित्वान्नत्र तेन संबंधेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः तथा च गगनाद्यभा
वमहाकालान्यत्वविशिष्टघटाद्यभावयोरीश्वरज्ञानान्यत्वविशिष्टघटाद्यभावस्य चोभयाभावघटितप्रति
योगिवैयधिकरण्यस्याभावात्प्रसिद्धिरिति वाच्यं कालिकसंबंधेन गगनादेर्वृत्तिमत्त्वपक्षे एवं महाकालमात्र
वृत्तिकालिकविशेषणतेश्वरज्ञानमात्रवृत्तिविषयिताभ्यां महाकालान्यत्वविशिष्टघटादेरीश्वरज्ञानान्यत्ववि
शिष्टघटादेश्च महाकालेश्वरज्ञानयोर्वृत्तिमत्त्वपक्ष एव घटितप्रतियोगिताधर्मिकोभयाभावघटितलक्षणाकरणे
न तत्संबंधोभयाभावघटितत्वापि तस्य गगनाद्यभावात्सर्वसंभवात् व्याप्तिस्थितिपूर्वलक्षणादधेयसाध्यताव
च्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यस्यानतीये प्रतियोगित्वे साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्याव्याप्तिरिति घ
व्याख्यानेति तन्त्रलक्षणाव्याख्याने तदर्थः एवमुत्तरत्रापीति साध्यतावच्छेदकसंबंधेन संबंधित्वस्य प्रतियोगिवै
यधिकरणस्य च व्याप्तिः पूर्वमेव प्रपंचितेति पुनरपि नेह प्रस्तावनीयेति भावः संबंधित्वमित्यनेन प्रतियोगि

महाकालमात्रवृत्तिकालिकविशेषणतेश्वरज्ञानमात्रवृत्तिविषयताभ्यां महाकालान्यत्वविशिष्टघटादेरीश्वरज्ञानान्यत्वविशिष्टघटादे
श्च महाकालेश्वरज्ञानयोर्वृत्तिमत्त्वपक्षे सेवा च ... सिद्धान्तलक्षणे कदिशा

भि

प्र

तत

राम॰
१२
१००

वैयधिकरण्यघटकप्रतियोगिसंबंधित्वमिति कदाचिद्भ्रमः स्यात्तन्निरासाय व्याचष्टे संबंधित्वं स्वविशिष्ट
संबंधित्वमिति ननु लक्षणद्वये प्रतियोगित्वस्य चरमनिर्देशो न विशेषणदाने प्रथमनिर्देशोनुचित इत्यत आ
हः प्रतियोगित्वस्येति चरमोक्तत्वेपि विशिष्टलक्षणद्वयेपीत्यादिः संबंधित्वापेक्षया चरमनिर्देशोपीत्यर्थः अन
वच्छिन्नलक्षणएव प्रतियोगितद्धर्मिकोभयाभावघटितलक्षणएव विशेषणोक्तिः साध्यतावच्छेदकसंबंधाव
च्छिन्नत्वस्य विशेषणेस्यार्थः एवमग्रेपि इदं च एकोक्त्यभिप्रायेण अस्य व्याख्याप्रवृत्तिसाध्यके प्रतियोगिवैयधि
करण्यपदानुपादाने न लक्षणद्वयेपि प्रतियोगित्वे साध्यतावच्छेदकसंबंधावच्छिन्नत्वविशेषणदानस्यावश्यक
त्वात्कप्रमेयत्वादिति द्रष्टव्यं लक्षणद्वयेपीति न च प्रथमलक्षणेपि संबंधित्वाभिन्ने सत्त्वबद्धत्वे विशेषणदा
नस्यावश्यकतया कथमेतदिति वाच्यं संबंधित्वस्य संबंधानुयोगित्वरूपतया संबद्धत्वस्य संबंधप्रतियोगित्व
रूपतया तयोर्भेदात् नन्वेतथापि संबद्धत्वे विशेषणदानानुक्त्या न्यूनता दुष्परिहरैवेति वाच्यं संबंधित्वे विशेष
णदानस्य तदुपलक्षकतया तत्सुपरिहारत्वात् चरमनिर्देश इति प्रतियोगित्वापेक्षयेत्यादिः अभिप्रायेणोक्तिरनस्य च
रमनिर्देशादुक्तेनेत्यन्वयः संबंधित्वापेक्षया चरमनिर्देश इति तदर्थः नन्वेवं प्रतियोगितावच्छेदकत्वप्रवैयधिक
रण्यस्य संबंधित्वापेक्षया चरमनिर्देशो यथा दैशिकेपि कालिकसंबंधेन साध्यतायां तादृशप्रतियोगितावच्छेद

भा॰प॰
१३१

कालप्रसिद्ध्यपेक्षया चरमनिर्देशो नोपपादित एव प्रस्तुतप्रतियोगिवैयधिकरण्यनिर्देशप्रयोजकप्रसिद्धाकाङ्क्षोदयेन तत्प्र
सिद्धेरेव चरमनिर्देशस्योचितत्वमित्यत आह तच्च पूर्वपक्ष इति तस्य प्रतियोगिवैयधिकरण्यस्य चरममिति संबन्धितापेक्षपोक्तप्र
सिद्ध्यपेक्षया च चरमनिर्देशार्थः तथा च प्रतियोगिवैयधिकरण्यस्य तादृशप्रसिद्धिपूर्वनिर्देशे व्यवधानेन तत्र पूर्वपक्षसमाधानाव
तारणयोरसामञ्जस्यमिति पूर्वपक्षसमाधानावतारणाव्यवहितपूर्वं प्रतियोगिवैयधिकरण्यनिर्देशस्यावश्यकत्वेन तत्पूर्वमपि
वास्तवतन्निवेशस्यावश्यकत्वाभिप्रायेण तादृशप्रसिद्ध्याकाङ्क्षोदयसंभवेन तादृशप्रसिद्धिनिर्देशो नानुपपन्न इति भावः एते
न दीधितावभावस्य प्रतियोगिव्यधिकरणो बोध्य इति ग्रन्थपूर्वकालिकेत्यादिप्रसिद्धिनिरूपणं तथा [illegible] लेखकप्रमादकृत एव प्रतियोगि
वैयधिकरण्यप्रवेशानन्तरमेव तादृशप्रसिद्धिप्रदर्शनस्योचितत्वादिति केषांचिदुक्तिः परास्ता दीधितौ अतीतेनेति एतत्सत्वं मा
नेनोक्तं व्याख्यानं कालिकसंबन्धेन साधारणकालिकसंबन्धेन एव मध्येऽपि अवच्छेदकाप्रसिद्धेरिति अभावघटितलक्ष
णपक्षे गगनस्य कालिकसंबन्धेनानधिकरणत्वात् स्वविशिष्टेति स्वघटत्वादिसाध्यतावच्छेदके खण्डकालोपाधित्वेनेति विभिन्नका
लीनयोराधाराधेयभावस्यानभ्युपगमादिति भावः पूर्वोक्तदिशा स्वविशिष्टसंबन्धितिष्ठाभावप्रतियोगितायामित्याद्युपदर्शि
तदिशा दीधितौ प्रतियोगितानधिकरणेति लक्षणत्रयेऽपि साध्यादिः व्याख्यायां गगनाभावेति न च विशेषणं तथा गगनाभा
वस्य तथा प्रतियोग्यधिकरणाप्रसिद्ध्या न संभवा ~~[struck-through text]~~ वस्य तथा प्रति

तथाव्यतिरेकाश्रय; अतीतेति अनागतस्याप्युपलक्षणं अनधिकरणं कालिक ४

एन॰
१३
१०१

~~वैयधिकरण्यप्रसिद्ध्या~~ सं वंधेन तदभावस्य प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वाभावेन कथमेतदिति वाच्यं
पूर्वोक्तदिशोभयाभावघटितलक्षणस्यावश्यकत्वेन संयोगेन कालिकेन वा गगनाभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रति
योगितावच्छेदकसामान्यावच्छिन्नव्यधिकरणस्य प्रतियोगितायां साध्यतावच्छेदकविशेषणतावच्छिन्नत्वगुणत्वाभावत्वावच्छि
न्नत्वोभयाभावत्वावच्छिन्नत्वोभयाभावसत्वेन हेतुसमानाधिकरणगुणत्वाभावाभावप्रतियोगितायां वृत्तत्वेनाव्याप्तिरित्या
शयात् ननु गुणत्वाभावस्य द्रव्यत्वाभावसंबंधि गुणनिष्ठगुणत्वाभावाभावप्रतियोगितावच्छेदकत्वमेवेत्यत आह गुणत्वा
भावाभाववत्तोपीति तथा च गुणत्वाभावाभावस्य न प्रतियोगितावच्छेदकावच्छिन्नसामान्ये पक्षिकरणापमिति भावः ननु नि
त्यत्वादिविशिष्टगुणत्वाभावस्य नित्यत्वादिविशिष्टगुणत्वात्मकनित्यत्वादिविशिष्टगुणत्वाभावाभावप्रतियोगित्वेपि न गुणत्वा
त्वात्मकगुणत्वाभावाभावप्रतियोगित्वमत आह नित्यत्वादिविशिष्टगुणत्वस्येति अभावस्वरूपेति धूमाभावस्य तादृशान्य
तरत्वावच्छिन्नतया तादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावाभावरूपत्वादिति भावः सामान्यानधिकरणत्वादिति धूमाभा
ववत्पर्वतादेस्तादृशान्यतरत्वावच्छिन्नाधिकरणतया महानसादिवृत्तितादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावाधिकरण
त्वासंभवादिति भावः तादृशसंबंधेन प्रतियोगितावच्छेदकसंबंधेन तेनेति स्वविशिष्टसंबंधिनो धूमाभाववत्पर्वतादेस्तादृशा
न्यतरत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वेपि धूमत्वावच्छिन्नप्रतियोगितावच्छेद

ध॰प्रा॰
१७

कावच्छिन्नानधिकरणत्वाभावेन तादृशप्रतियोगितानवच्छेदकं धूमत्वमपि तदवच्छेदकत्वसंयोगावच्छिन्नत्वोभयाभाववत्त्वात् तादृशा
सामान्यान्तर्गतधूमाभावप्रतियोगितायामसत्त्वादिति भावः द्वितीयलक्षणमप्युक्तदोषवारणाय वृत्त्यसाध्यतावच्छेदकसंबंधेन यादृश
प्रतियोगितेत्यादिरीत्या परिष्करणीयमिति ध्येयं मौलमिति न चेदमीयप्रतियोगिवैयधिकरण्यानिवेशएव मौलप्रतियोगिवैयधि
करण्यनिवेशः तदिदमीयं मौलं चेति क्रमेणालिखनमुचितमिति वाच्यं एकदोभयत्वेऽनेन तथाक्रमस्याकिंचित्करत्वात् तदवच्छिन्ना
भाववतीति इदमुपलक्षणं संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वादित्यपि द्रष्टव्यं गगनत्वादिकमिति आदिना
घटत्वादिपरिग्रहः ना व्याप्तिः लक्षणान्त्वयेपि नाव्याप्तिः लक्षणद्वयेऽपि प्रदर्शितरीत्यान्वितौ ये च द्रव्यत्वसमानाधिकरणसंयोगाभाव
प्रतियोगितायां संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकद्रव्यत्वत्वाद्यवच्छेद्यत्वाभावसत्त्वे नाव्याप्तेरभावादिति
भावः अतिव्याप्तिमिति प्रसक्तामित्यादिनातिव्याप्तिरिति लक्षणत्रयेपीत्यादिः तथा च द्रव्यत्वत्वादिकमादायैव संयोगत्वादेः पारिभा
षिकावच्छेदकत्वसत्त्वात् संयोगत्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकद्रव्यत्वत्वाद्यवच्छेद्यत्वस्य सत्ता समानाधिकर
णद्रव्यत्वाभावप्रतियोगितायां सत्त्वात् नातिव्याप्तिरिति भावः नावच्छेदकमिति द्रव्यत्वाभावस्य द्रव्यमात्रसमवेतत्वावच्छिन्नाभावस
मनैयत्येन द्रव्यमात्रसमवेतसकलव्यक्तिप्रतियोगिताकतया द्रव्यत्वाभावप्रतियोगितायाः द्रव्यत्वत्वापेक्षया लघुभूतद्रव्यमात्रसम
वेतत्वस्यैवावच्छेदकत्वादिति भावः द्रव्यसमवेतत्वघटितस्य द्रव्यमात्रसमवेतत्वस्यापि द्रव्यान्यासमवेतत्वे सति सापेक्षरूपा गुरुत्वाच्चा

त्वा

राम॰
१२

वच्छेदकत्वमन्तोव्याचष्टे इत्यादिनेति । संयोगप्रतियोगिकेति संयोगरूपसाध्यप्रतियोगिकेत्यर्थः । कश्चिदिति अत्र साध्यप्रतियोगि
काभावमादायातिव्याप्तिवारणे प्रयोजनाभावः । यथाकथंचिदिति व्याप्तिवारणेनैवेष्टसिद्धेरित्यस्वरसः । कश्चिदित्यनेन सूचितः ।
दीधितौ इत्थमात्रसमवेतसाहीति आदिना व्यभिचारनिरूपकाधिकरणगुणादेरित्यादिपरिग्रहः । व्याख्यायां अवच्छेदकत्वलक्षणो
इति अवच्छेदकत्वलक्षणोत्तरत्वेऽशे एवं मौलस्यापि तस्य प्रवेश आवश्यक इत्याशयः । धूमवान्वह्नेरितीतितयाचसंयोगमत्वादि
त्वादेः समवायेनाव्याप्यवृत्तिसाध्यके उपदर्शितरीत्यातिव्याप्तेरनवकाशेऽपि संयोगेन द्रव्यस्याव्याप्यवृत्तितया संयोगेन धूमादि
साध्यकेऽतिव्याप्तिर्दुर्वारैवेति भावः । अतिव्याप्तिवारणायेति वस्तुमाणरीत्या प्रथमचरमतीयलक्षणाभिप्रायेणाऽमलक्षणोऽव्या
प्तिवारणायेति द्रष्टव्यं । अव्याप्तिवारणायेति संयोगो द्रव्यत्वादित्यादावव्याप्तिवारणायेत्यर्थः । प्रतियोग्यधिकरणसंयोगत्वा
द्यवच्छिन्नाभाववति गुणादौ संयोगत्वादिविशिष्टस्यासंबद्धत्वात् द्रव्यत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वात् संयो
गाद्यभावप्रतियोगितायां संयोगत्वादिविशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकसंयोगत्वाद्यवच्छि
न्नत्वाद्व्याप्तिरिति भावः । घटादिनिष्ठमत्वादिकमित्यर्थः । दीधितौ संभाव्येतेति तथाचायोगोलकावृत्तित्वस्य साध्यवच्छिन्नाभाववद्वृ
त्तित्वघटितत्वविशिष्टस्यासंभावितत्वमेवेत्यतिव्याप्तेर्नावकाश इति भावः । ननु अयोगोलकावृत्तित्वस्य द्रव्यत्वावच्छिन्ने तत्र द्रव्यत्वरूपध्य
र्मेऽयोगोलकावृत्तित्वावच्छिन्नेत्यादेरेवसम्भवः कथमित्यत आह व्याख्यायां अयोगोलकावृत्ति इत्यस्यैतावेति संयोगसंबंधेनेति

धाम

भा॰प्र॰
१०३

अन्यथासंबंधत्वस्यानुगततया संबंधसामान्येन परस्योगोलकावृत्तित्वं तस्य वह्निमत्योगोलकनिष्ठात्यंताभावप्रतियोगितावच्छेद
कत्वानुपपत्तिः यत्किंचित्संबंधेनायोगोलकावृत्तित्वोक्तौ चाननुगमः स्पष्ट एवेति भावः अवच्छेदकस्येतिलाभायेत्यस्य येन नेनान्यप
संयोगादवच्छिन्नायाश्चेति प्रतियोगिवैयधिकरण्यानिवेशेषस्य माणाहि साप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवे
शस्यावश्यकत्वादितिभावः लक्षणात्रयेपि प्रतियोगिवैयधिकरण्यघटितस्यावश्यकत्वेनरोधितो प्रथमलक्षणएव तद्घटि
तिप्रदर्शनमनुपपन्नमतो न्यूनतापरिहाराय प्रथमलक्षणे प्रदर्शितं तद्घटितमनुयायुत्तरस्मिन्नर लक्षणेपि तद्घटितत्वमाह
तदवच्छिन्नेत्यादि तदवच्छेद्यत्वस्येति अन्यथाभावस्य समनेवान्वितं गगनत्वविशिष्टसंबंधप्रसिद्धेतिघटत्वादिविशिष्टसंबंधिप्रसिद्धा
वपि तन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकेऽसत्वेन घटत्वादेरपि पारिभाषि
कावच्छेदकत्वासंभवो दुष्पः संयोगादिना साध्यतायामसंयुक्ताहि वृत्तिधर्मस्यैव तादृशावच्छेदकत्वेन मावच्छेदकाप्रसिद्धिरत
आहतादात्म्येनेति तदवच्छिन्नाभावप्रत्येवहेतिनिषेनकेनचित्संबंधेन तादृवच्छिन्नाभावयतिस्वस्मिन्नता तादात्म्येनसंबंधेन तायाः प्रति
योगितायां तदवच्छिन्नाभावप्रतियोगितायां संबंधसामान्येन तदवच्छिन्नाभावो ज्ञोत्स्वस्मिन्संबंधसामान्येन तदवच्छिन्नाभाव ह्रासा
सत्वेनोक्तरीत्याऽव्याप्त्यभावेपि सकलसंबंधसाधारणानुगतसंबंधत्वस्य दुर्वचतया तत्थानिवेशासंभवादितिभावः नुत्वनिम्यामकेता
दात्म्यस्याव्यापकतोघटकसंबंधत्वानभ्युपगमेऽस्काउपात्तिरसंभवेन तदवच्छिन्नाभावप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छि

राम॰
१०३

न्न॰ लविवक्षणे प्रयोजनाभाव इत्याशयेनाह वस्तुतस्त्विति एवं चेत्यादि इदं च पूर्वोपदर्शितरीत्या लक्षणत्रयेपीति बोध्यं नाना
त्कसर्वत्रैव लक्षणे मोल प्रतियोगिवैयधिकरण्याद्यनिसंबंधभेदनिबंधनदोषवारणाय प्रतियोगितायां साध्यतावच्छेदकस
बंधावच्छिन्नत्वनिवेशो तत्पानियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वमतेनेनसंबंधेन साध्यतायां साध्यतावच्छेद
कसंबंधावच्छिन्नप्रतियोगिताका प्रसिद्ध्या व्याप्तेर्वारणाय साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणत्वनिवेशनमावश्यक
मित्याहुः प्रतियोगिवैयधिकरण्यानुपादानेपि प्रतियोगितयोर्लघुभूतैकसंबंधावच्छिन्नत्वादिनिवेशनेनैवोपदर्शितातिव्याप्ति
वारणसंभवे गुरुभूतप्रतियोगिवैयधिकरण्योपादानमनुचितमित्याशयेनाह दीधितौ प्रतियोगितयोरिति केचित्तु संबंध
भेदनिबंधनदोषवारणाय प्रतियोगितयोः साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशस्यावश्यकतयोपदर्शितरीत्यातिवार
णाय प्रतियोगितयोः साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशस्यावश्यकतयोपदर्शितरीत्यातिव्याप्ति गिवैयधिकरण्यपदं
सार्थकमित्यभिप्रायकं मूलमुपपादयता दर्शाप्रतियोगितयोस्तदनिवेशतात्पर्यकमित्याशयेनाह प्रतियोगितयोरितीति व
दंति तच्चिंत्यं अन्येन तु प्रतियोगिवैयधिकरण्यघटितव्याप्तेर्लघुत्वेपक्षे कस्यचित्प्रतियोगिनः सर्वत्रैव व्यधिकरणत्वेन स्वप्रतियो
ग्यनधिकरणत्वस्यावश्यकत्वात् तयास्य लक्षणस्य तत्र घटकविशेषणतया अदित्याशयेन प्रतियोगिवैयधिकरण्याघटितव्याप्तिमाह प्रति

म॰प्र॰
१०४

योगित्वयोरित्यादिनेत्याहुः व्याख्यानान्तरमप्यत्र लक्षणोऽपीति हेतुसमानाधिकरणाभावीयप्रतियोगित्वं संबंधावच्छिन्नप्रतियोगितावच्छेदकं
स्वविशिष्टसंबंधिनिष्ठाभावीयमनस्त्वं संबंधावच्छिन्नप्रतियोगितानवच्छेदकं तत्पारिभाषिकावच्छेदकमिति द्वितीयलक्षणार्थोऽयं
हेतुसमानाधिकरणाभावीयप्रतियोगितासंबंधावच्छिन्नप्रतियोगितासामान्ये स्वविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितासंबंधावच्छिन्नप्रतियोगि
तानवच्छेदकावच्छेद्यत्वाभाव इति तृतीयलक्षणार्थो यथाश्रुतार्थः विशेषणताविशेषेणेति ननु वह्निमान् धूमादित्यादौ संयोगे
न साध्यतायां तादृशप्रतियोगितायाः समवायादिसंबंधावच्छिन्नत्वनिवेशेऽप्युपपत्तिः संभवे निर्धूमवान्वह्नेरित्यादौ धूमत्वादिर्व्यापि
यावन्निरूपकाधिकरणसमवेतत्वादिकमादायैवावच्छेदकत्वसंभवेनाव्याप्त्यभावादिति चेन्न यतः महानसभेदवत्त्वं वह्नि
त्वादौ विशेषणताविशेषेण साध्यतावच्छेदकत्वे तादृशभेदसंबंधिसामान्यादिनिष्ठाभावीयसमवायादिसंबंधावच्छिन्नप्रतियोगि
तानवच्छेदकत्वस्य च ग्रहादिमन्निष्ठाभावप्रतियोगितावच्छेदके संभवे नातिव्याप्त्यापत्त्या महानसभेदादिसाध्यके विशेषणता
ताविशेषावच्छिन्नत्वमेव तादृशप्रतियोगितायाः स्वरूपनिवेशनीयमिति सर्वत्र तन्निवेशस्यौचित्यः सर्वत्रैवानुमितावेकजा
तीयग्रहहेतुत्वस्यौचित्यादित्याहुः मान्यास्तु विशेषणताविशेषेण वृत्तिमन्मात्रस्य वा व्याप्यत्वे व्याप्त्यनिरूपकालेऽनुमित्युपप
त्तये प्रतियोगित्वाधिकरणत्वघटितव्याप्तिग्रहस्यापि विजातीयस्य हेतुत्वावश्यकतया सर्वत्रैवानुमितावेकजातीयग्रहहेतु

राम॰
१०४

धि

ह्नौ चितत्वमित्यस्य वह्नेर्भ शक्यतया वह्निमान् धूमादित्यादौ तादृशप्रतियोगितयोः समवायादिसंबंधावच्छिन्नत्वमेव निवेश्यं
विशेषणताविशेषावच्छिन्नत्वस्य वेति याकारेणास्या यां तस्मात् यात्तद्व्याप्तिलक्षण एव प्रतियोगिवैयधिकरण्यं न देयमि
ति दीधितिकृतामाशयमित्याहुः नतु दीधितौ प्रथमलक्षण एव धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यनि
वेशस्य पूर्वमुपदर्शितत्वात् तदनुपादाने तल्लक्षण एवातिव्याप्तिनिराकरणप्रकारप्रदर्शनस्योचितत्वेन पञ्चत्यादिनामध्यमलक्ष
णोक्तिवारणप्रकारप्रदर्शने दीधितावनुपपन्नमतस्तदुपपत्तिमाह जातिमानित्यादिनार्द्धन्यत्रेति प्रथमलक्षणे इति शेषः अभा
वीयेति प्रतियोगितत्वेनान्वितं एवमग्रेपि यथास्थलं संबन्धो ध्येयः लक्षितीति साध्यतावच्छेदकसंबंधमात्रान्यत्वविशिष्टप्रतियोगि
कत्वतदवच्छिन्नाभाववदनुयोगिकत्वोभयाभाव इति रीत्या प्रथमलक्षणपरिष्कारे चगौरवमिति भावः अतः जातिमानित्यादि
त्यादौ जातित्वादेरवच्छेदकत्वासंभवेनातिव्याप्तेः मध्यमप्रकारं द्वितीयलक्षणे आहुस्तेषामिति अयमाशयः दीधितौ पूर्वं प्रथमल
क्षण एवातिव्याप्तेरुपदर्शितत्वेपि तल्लक्षणस्य जातिसाध्यकातिप्रसक्तिरूपदोषदुष्टत्वेन परित्यागात् तयातत्रातिव्याप्तिनि
राकरणप्रदर्शनमनुपयुक्तमिति द्वितीयलक्षणस्यैवोपादेयत्वेन तत्र निरुक्तप्रतियोगिवैयधिकरण्यानुपादाने संयो
गेन साध्यतापारिभाषिकावच्छेदकाप्रसिद्ध्यातिव्याप्तेरभावेनाव्याप्तेरेव पूर्वमुक्ततया प्रसक्ताया अतिव्याप्तेर्निराकरणो
प्रसक्तं हि प्रतिषिध्यत इति नियमविरोधोऽपरिहार्य एवेति वाच्यं जलह्रदे वह्निसंस्कृतीत्यादौ जलह्रदादावप्रसक्तस्यापि बुद्ध्या

पादनाय पत्रे साद्दिनाति व्याप्तिनिराकरणप्रकारप्रदर्शनस्यानुपपत्तिः
न च तथापि द्वितीयलक्षणे प्रति २

भा॰प्र॰
१०५

देशेनावच्छेदेन तादृशानियमस्यैवासिद्धिरिति तन्न दूषितौ ध्वंसे गतादृशानियमविरोधाभावादिति केचित्तु प्रतियोगिवैयधिकरण्या
नुपादाने प्रथमलक्षण एव पूर्वोक्तामतिव्याप्तिमुद्धरति यत्रेत्यादिना साध्यतावच्छेदकेति तथा च तदवच्छिन्नप्रतियोगिताकाभा
ववदसंबद्धमेव साध्यतावच्छेदकविशिष्टमिति साध्यतावच्छेदकमवच्छेदकमेवेति न प्रथमलक्षणोक्तातिव्याप्तिरिति भावः इत्याहुः
अपरे तु द्वितीयावच्छेदकलक्षणे प्रतियोगिवैयधिकरण्यप्रवेशे संबंधभेदनिवेशनदोषवारणाय तादृश्यप्रतियोगितयोः सा
ध्यतावच्छेदकसंबंधावच्छिन्नत्वमवश्यं निवेशनीयं तथा च संयोगेन साध्यतायां समवायेन तादृशावच्छेदकाप्रसिद्ध्या अव्याप्तिः स्या
दिति साध्यतावच्छेदके स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं प
र्यन्तमेव समनिवेश्यपत्तस्थाने स्वविशिष्टसंबंधिनिष्ठाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकहेतुसमाना
धिकरणाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकसामान्यकत्वं निवेश्ये तादृशाव्याप्तिवारणायेतितद्
शोवयुक्तवान्वहूरित्यादेः संयोगेन साध्यतायां प्रतियोग्यप्रसिद्धिः संभवत्येवेति द्वितीयलक्षणे हि क्षितौ तन्निराकरणप्रदर्शनं यत्रेत्यादिना
नानुपपन्नं न चैवमपि प्रथमलक्षणे शंकितः स्वयमुक्ताया अतिव्याप्तेर्निराकरणेनानुपपत्तिरेवेति वाच्यं साध्यतावच्छेद
कविशिष्टेत्यादिना हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यन्ताभावप्रतियो
गितानवच्छेदकत्वोक्त्या तत्र स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्य स्वविशिष्टसामान्येतदवच्छिन्नाभाववदसंबद्ध

राम॰
१०५

त्वस्य च लाघवेन लक्ष्यतारूपत्वे व्याप्तिनिरूपकत्वाभेदानुपपत्तिलेशस्याप्यनवकाशादिति प्राहुः घटत्वात्मकस्येति घटभिन्नभेद
स्य घटत्वरूपत्वादिति भावः अभावीयविशेषणतया न संभवतीति न यावत्त्वरूपेणाभावीयविशेषणतानाविशेषणे निवेशनस्य भावसाध्या
रणानुपपत्तेर्घटत्वस्य तेन संबंधेनाहृत्यानवस्थितत्वाधिकरणसंबंधतयामन्तं बंधावच्छिन्नतदभावस्य साध्यवन्निष्ठतया हेतुसमानाधि
करणाभावप्रतियोगितानवच्छेदकस्य घटभिन्नान्यत्वस्य साध्यतावच्छेदकविशिष्टसाध्यतावच्छेदके विशिष्टसाध्यवन्निष्ठाभावप्रति
योगितानवच्छेदकत्वासंभवेन साध्यतावच्छेदकस्य पारिभाषिकावच्छेदकत्वासंभवेन घटत्ववान् घटत्वादित्यत्रान्यतरत्वादिमत्त्वा
तिव्याप्तिरिति भावः केचित्तु अयं घटो घटत्वादित्यत्रान्यतरत्वादित्यादौ अपि यादृशनिरूपकाधिकरणघटादिभेदस्य यो भेदस्तस्य भेदत्वा
नवस्थाभयेनाधिकरणत्वरूपस्य साध्यवत्त्वघटादौ न विशेषणतया वृत्तिरित्यादि भावरूपाभावस्याभावीयविशेषणतानानभ्यु
पगमादिति तदन्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वासंभवेनातिव्याप्तिरिति प्रमाविषयत्वानुधावने
न च घटादिरूपभेदस्य घटादौ वृत्तिनियामकसंबंधांतराभावेन भेदत्वरूपेणावृत्तिनियामकस्वरूपसंबंधस्यापि यत्वेऽयं तथा नाति
व्याप्तिसंभव इति वाच्यं घटादौ तादृशभेदत्वविशिष्टस्य स्वरूपसंबंधस्वीकारेऽपि तस्याभावीयविशेषणतात्वेनानाभावादिति वदंति
लाघवमिति व्यभिचारिनिरूपकाधिकरणान्यत्वप्रकारकप्रमाविषयत्वस्य भेदघटितत्वात् साध्यवत्त्वप्रमाविषयत्वस्य तद्घटित
त्वाल्लाघवमिति भावः साध्यवत्त्वेऽपीति साध्यवत्त्वं च साध्यतावच्छेदकसंबंधेन बोध्यं हेतोर्हि तादृशं परित्यज्येत्यत्र तथा चेत्या

साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठाभावीयविशेषणतासंबंधावच्छिन्ना
भावप्रतियोगितानवच्छेदकत्वात्

दित्वात्तत्तीयत्वस्त्वेण परिष्कारेऽपीत्यमाह यद्धर्मेत्यादिना [illegible] व्याप्तिः स्वरूपसंबंधेन गगनादेरप्रसिद्धत्वपक्षेऽव्याप्तिः तादृशेति गग
नादेरप्रसिद्धत्वपक्षे साध्यतावच्छेदककालिकसंबंधेन गगनत्वादिविशिष्टसंबंधिनोऽप्रसिद्ध्या गगनत्वादेस्तथात्वासंभवात् प्रसिद्धत्व
पक्षे तादृशसंबंधिनः प्रसिद्धावपि तन्निष्ठाभावीयतादृशप्रतियोगितानवच्छेदकत्वस्य हेतुसमानाधिकरणाभावीयतादृशावच्छे
दकेऽसंभवादिति भावः ननु महाकालान्यत्वविशिष्टघटप्रकारकप्रमाविषयत्वादेर्हेतुसमानाधिकरणाभावीयतादृशप्रतियो
गितावच्छेदकस्य महाकालान्यत्वविशिष्टघटत्वादिविशिष्टसंबंधिनिष्ठाभावीयतादृशप्रतियोगितानवच्छेदकत्वसंभवेन महा
कालान्यत्वविशिष्टघटत्वादिकमेव तादृशपारिभाषिकावच्छेदकं प्रसिद्धमतो आह महाकालान्येति प्रागुक्तयुक्त्या महाका
लीयविशेषणतासाध्यकव्याप्तिरयुक्त्या तादृशत्वेति पारिभाषिकावच्छेदकत्वेत्यर्थः तथा च महाकालीयविशेषणताविशेषे
ण घटादेः साध्यतावच्छेदकसंबंधेन तादृशविशेषणताविशेषेण महाकालान्यत्वविशिष्टघटत्वादिविशिष्टसंबंधि
नोऽप्रसिद्ध्या तन्निष्ठाभावीयतादृशप्रतियोगितानवच्छेदकत्वस्य हेतुसमानाधिकरणाभावीयतादृशप्रतियोगितावच्छेदके मह
कालान्यत्वविशिष्टघटप्रकारकप्रमाविषयत्वादावसंभवेन तादृशावच्छेदकाप्रसिद्ध्या व्याप्तिर्दुर्वारैवेति भावः ननु उपदर्शि
तरीत्या कालो घटवान् कालपरिमाणादित्यादौ तद्वह्निचाभाववदित्यादिप्रथमप्रकारावलंबने नान्यत्र मध्यमप्रकारे बाधका
भावदस्यत आह गगनाचेति व्यापकतापत्तिरिति व्यापकतावच्छेदके साध्यतावच्छेदकसंबंधेन संबद्धतावच्छेदकत्वनिवेशे गौरव

संबंधावच्छिन्नत्वनिवेशे प्रतियोगिवैयधिकरण्यनिवेशेन कालो घटवान्कालपरिमाणादित्यादौ प्रतियोगितावच्छेदकसंबंधेन ५

मितिभावः ननु साध्यतावच्छेदकसंबंधावच्छिन्नत्वांशापरिग्रहेपि दृष्टांतलक्षणोक्तरीत्या प्रतियोगिताधर्मिकोभयाभावविवक्षणादेव साध्यतावच्छेदकसंबंधावच्छिन्नत्वांशापरित्यागाद्विशेषणताविशेषावच्छिन्नत्वपरिग्रहेपि हेतुमन्निष्ठाभावप्रतियोगितासामान्येनादृशानवच्छेदकावच्छेद्यत्वविशेषणताविशेषावच्छिन्नत्वोभयाभावनिवेश एवोचितः न चोभयत्वप्रवेशे गौरवात्तदनिवेश इति वाच्यं साध्यतावच्छेदकसंबंधावच्छिन्नत्वपरिग्रहेपि उभयाभावनिवेशगौरवस्य तुल्यत्वादित्यत आह कालइति तादृशी विशेषणताविशेषावच्छिन्नसाधनसमानाधिकरणात्यंताभावीया नाव्याप्तिः उभयाभावानिवेशेपि नाव्याप्तिः तथा च साध्यतावच्छेदकसंबंधप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या अव्याप्तिः स्यादित्यनुयोगितावच्छेदककोटौ साध्यतावच्छेदकसंबंधावच्छिन्नत्वमनिवेश्य प्रतियोगितावच्छेदककोटौ तन्निवेशप्रागल्भ्यात् गौरवमंगीकृत्योभयाभावो निवेशितः विशेषणताविशेषावच्छिन्नत्वनिवेशे च तत्र कालान्यत्वप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगिताया एव तादृश्याः प्रसिद्ध्या अव्याप्त्यभावेनानुयोगितावच्छेदककोटावेव तदवच्छिन्नत्वनिवेशस्तादृशानवच्छेदकावच्छेद्यत्वाभावनिवेशेनैव निर्वाहे प्रतियोगितावच्छेदककोटौ तन्निवेशगुरुभूतोभयाभावनिवेशप्रयोजनाभावेन तन्निवेशो नोचित इत्याशयेनोभयाभावो न निवेशित इति भावः प्रतियोगितेति विशेषणताविशेषावच्छिन्नप्रतियोगितेत्यर्थः एवमग्रेपि [illegible] ननु तथा चेत्यादिरिति निष्कृष्टलक्षणे कालो घटवान् कालपरिमाणादित्यत्राव्याप्तिः कालस्य जगदाधारतया तादृशप्रतियोगित्वाप्रसिद्धेरत आह कालइति

भ॰ प्र॰
१०७

इत्याहुः

कालान्यत्वप्रकारकेति । अभावीयविशेषणतानाविशेषणता कालान्यत्वप्रकारकेत्यर्थः न च इति प्रतियोगितावच्छेदकावच्छिन्नप्र
त्यभवतीत्यत्रत्यादिः तद्वृत्ति तेन तज्ज्ञप्तिं उक्तमिति तथा च न मत्टनापयोगो ऽवैयर्थ्यं तस्या मूलानुसारितया गौरवस्य प्रामाणिकत्वेनादोष
त्वमिति भावः अथैतस्य लक्षणस्य मूलात्तादृशलाभेन मूलाननुसारित्वं दुर्वारमेवेति चेन्नैवं मूले प्रतियोग्यसमानाधिकरणपदस्य
स्वरूपकीर्तनमात्रपरत्वमानत्वारित्यस्य यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नमित्यत्र सम्भवितत्तु हेत्वाश्रयाणा
नयत्समानाधिकरणात्यन्ताभावप्रतियोगितात्ववच्छिन्नं यद्वच्छेदकं तादृशप्रतियोगितात्वं तदवच्छिन्नं तादृशप्रतियोगितासामान्ये
यन्न भवति यद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यं न भवति तेन तद्धर्मावच्छिन्नेनेति मूलार्थकरणेन प्रति
योगितयोर्विशेषणतानाविशेषणावच्छिन्नत्वविवक्षणेन च मूलात्तादृशपुष्कललक्षणलाभसंभवात् ननु मूलानुसारित्वेपि न ज्ञप्ति
तलक्षणस्य गुरुतया ज्ञायवेन नव्यघटितोक्तलक्षणमेव सम्यगित्यत आह यथा संनिवेशो चेति तथा च तस्य लघुत्वेपि ~~नव्यघटित~~ल
क्षणांतरत्वेन मूलानुसारिप्रकृतलक्षणेन कोपि दोष इति भावः एतेन साधनसमानाधिकरणाभावप्रतियोगितासामान्ये यद्ध
र्मविशिष्टसंबंधिनिष्ठाभावत्वेन साधनसमानाधिकरणसामान्ये यद्धर्मविशिष्टसामानाधिकरण्यं तद्धर्मावच्छिन्नसामाना
धिकरण्यं व्याप्तिर्लाघवादित्यपि निरस्तं तेषां लक्षणांतरत्वेन मूलाननुसारित्वात् वस्तुतस्तु ~~ननु नव्यघटितोक्तलक्षणस्य~~
~~मूलाननुसारित्वेपि विशेषणतानाविशेषणावच्छिन्नहेतुसमानाधिकरणाभावीयप्रतियोगितासामान्ये येन संबंधेन यद्धर्मावच्छि~~

राम॰
१०७

प्रतियोगितां २

भाव

संबंधिनिष्ठाभावत्वेन कारणसामान्ये वा यद्धर्मविशिष्ट

साधनसमानाधि

प्रकारकप्रमाविशेष्यत्वत्वावच्छिन्नत्वाभाववत्त्वेन संबंधेन तद्धर्मावच्छिन्नसामानाधिकरण्यं च व्याप्तिरित्येवास्तु

न्तं सामानाधिकरण्यं व्याप्तिर्लाघवादित्यपि निरस्तं तेषां त्वदुक्तत्वेन मूलाननुसारित्वात् [illegible] ननु नञ्घटितोक्तल
क्षणस्य मूलाननुसारित्वेपि विशेषणताविशेषावच्छिन्नहेतुसमानाधिकरणाभावीयप्रतियोगितासामान्ये येन संबंधेन यद्धर्मा
वच्छिन्नप्रकारकप्रमाविशेष्यत्वत्वावच्छिन्नत्वाभाववत्त्वेन संबंधेन तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्येवास्तु दीधितिमुक्तल
क्षणापेक्षया लाघवात् नञ्घटितमूलानुसारित्वं वास्य स्फुटमेवेति न मूलाननुसारित्वमपि यत्न संभवतीति मूलस्य यद्धर्मावच्छिन्न
प्रकारकप्रमाविशेष्यत्वत्वावच्छिन्नं न भवतीत्यर्थकरणेन मूलात् क्तणादस्यैतल्लाभसंभवात् इत आह पर्याप्तेनिवेशे चेति तथा च
लक्षणस्य लक्षणांतरादूषकतया प्रकृतलक्षणे तस्याप्रवेशेन लघुत्वेपि प्रकृतलक्षणे न वैयर्थ्यं दोष इति भावः शेषं सुधी
[illegible]नुसंधेयं तादृशप्रमेति धूमवत्त्वप्रकारकप्रमेत्यर्थः एवमग्रेपि प्रतियोगिरूपायामिति इदं च धूमवत्त्वप्रकारकप्रमावि
षयत्वाभावप्रतियोगितायां महानसवृत्तित्वविशिष्टतादृशप्रमाविषयत्वाभावप्रतियोगितायाश्चैक्येपि एव व्याप्तिरिति नि
रूपणदानायोक्तं ननु महानसवृत्तित्वविशिष्टतादृशप्रमाविषयत्वत्वावच्छिन्नत्वविशिष्टाभावप्रतियोगितायामेव न तु शुद्ध
धूमवत्त्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितायामिति नातिव्याप्तिरित आह महानसवृत्तित्वविशिष्टतादृशप्रमावि
षयत्वाभावेति तदभावाऽसंभवादिति तथा च पर्वतसद्व्यागर्भतायां वह्निसमानाधिकरणधूमवत्त्वप्रकारकप्रमाविषयत्वा
भावप्रतियोगितायां विशिष्टतादृशप्रमाविषयत्वत्वरूपतादृशप्रतियोगितावच्छेदकावच्छिन्नत्वसत्त्वात् तत्रातिव्याप्तिरिति

द नर विष

तद्धारणाय न सद्धगर्भताव्यापकीतिभावः एवं प्रतियोगितायाः प्रतियोगिरूपत्वे तादृशप्रमेति वह्निमत्वप्रकारकप्रमेत्यर्थेः वि
शिष्टतादृशप्रमाविषयत्वाभावेति वह्नित्वविशिष्टसंबंधिनिष्ठत्वादिः विशिष्टतादृशप्रमाविषयत्वेत्यस्य महानसवृत्तित्वविशिष्ट
धूमवत्वप्रकारकप्रमाविषयत्वेऽत्यर्थः तदभावासंभवादिति शुद्धप्रमाविषयत्वानतिरिक्तविशिष्टप्रमाविषयत्वरूपविशिष्टाभा
वप्रतियोगितायाः शुद्धतादृशप्रमाविषयत्वत्वावछिन्नशुद्धतादृशप्रमाविषयत्वाभावप्रतियोगितानतिरेकादिति भावः विशिष्टे
विशिष्टरूपप्रतियोगित्वे तदवच्छेदकत्वाभावादिति तथा च विशिष्टाभावप्रतियोगितायां विशेष्यमात्ररूपत्वे वह्निमत्वप्रकारकप्रमावि
षयत्वत्वे विशिष्टतादृशप्रमाविषयत्वाभावप्रतियोगितानवच्छेदकत्वाभावेनोक्तरीत्याऽव्याप्तेरभावः विशिष्टाभावप्रतियोगि
तायां विशेष्यविशेषणोभयरूपत्वोपगमे च शुद्धविशेषणे तदवछेदकत्वाभावादेव विशिष्टे तदवछेदकत्वाभावान्नाव्याप्तिरिति
भावः अत्र हु रीति अत्र विशिष्टाभावस्य विशेष्यरूपप्रतियोगितायामेव तदवछेदकत्वसत्वेनाव्याप्तिर्दुर्वारा एवं विशिष्टाभावप्र
तियोगितायां विशिष्टपर्याप्तत्वे न तस्याः शुद्धतादृशधर्मावछिन्नत्वाभावान्नाव्याप्तिरित्यपि न समंजसं तद्दिशा न सद्धया
गर्भतायामपि शुद्धाभावप्रतियोगितायां विशिष्टधर्मावछेदकत्वाभावेनातिव्याप्तेरभावादित्यत्र स्वरसः केचित्तु सामान्यप
दस्य व्यापकत्वार्थकतया न सद्धगर्भता अन्यतादृशायां हेतुसमानाधिकरणाभावप्रतियोगितात्वव्यापकं यद्रूपं विशिष्ट
संबंधिनिष्ठाभावीयप्रतियोगितावछेदकावछेदकत्वं तद्रूपावछिन्नसामानाधिकरण्यं व्याप्तिरित्येव वाच्यं तत्र च व्यापकत्वस्य

तद्वन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपतया प्रमेयत्वादिकमादाय व्यभिचारिण्यपि व्याप्तिरिति तद्वारणाय
तादृशप्रतियोगितात्वाधिकरणवृत्त्यत्यंताभावप्रतियोगितानवच्छेदके यद्धर्मविशिष्टसंबंधिनिष्ठाभावीयतत्तत्प्रतियोगिता
वच्छेदकावच्छेद्यत्वत्वं तद्धर्मावच्छिन्नसामानाधिकरण्यव्याप्तिरित्येव निष्कर्षः कर्तव्यः प्रतियोगितानां तत्तत्प्रतियोगितात्वेनो
पादाने चानुगतावच्छेदकत्वं विना दुर्वचत्ववारणाय एवं च तादृशाभावीयतत्तत्प्रतियोगितावच्छेदकावच्छेद्यत्वत्वानामननुगतत्वे
पि सर्वेषामेव चालनीन्यायेन तादृशप्रतियोगितात्वाधिकरणवृत्त्यत्यंताभावप्रतियोगितावच्छेदकतया संभवः नञ्द्वयगर्भतायां
तु तादृशाभावीयतत्तत्प्रतियोगितावच्छेदकं यद्यत्तद्भिन्नावच्छेद्यत्वाभाववत्त्वस्यानुगततया तादृशप्रतियोगितात्वसमानाधिक
रणात्यंताभावप्रतियोगितानवच्छेदकतया नासंभव इति नञ्द्वयगर्भतोपादानमावश्यकमित्याहुः अन्ये तु प्रतियोगितासा
मान्ये इत्यस्य तादृशाभावप्रतियोगितावृत्तित्वमर्थः यावत्त्वं त्वपेक्षाबुद्धिविशेषो न तु व्यापकत्वं गौरवात् तथा च नञ्द्वया
गर्भतायां तादृशावच्छेदकावच्छेद्यत्वस्य नानात्वेन यावत्प्रतियोगितावृत्तित्वासंभवः नञ्द्वयगर्भतायां तु तादृशानवच्छेद
कावच्छेद्यत्वाभावस्यैकतया तस्य तथात्वसंभव इति तथैवोक्तं यद्धि प्रतियोगितासामान्ये इत्यंते तत्तादृशप्रतियोगितात्वं
तादृशानवच्छेदकावच्छेद्यावृत्तीत्युक्तं नञ्द्वयागर्भतायां तु तादृशप्रतियोगितात्वं तादृशावच्छेदकावच्छेद्यवृत्तीति लाभेना
तिव्याप्तिः तादृशप्रतियोगितात्वव्यापकत्वोक्तौ तु गौरवमिति नञ्द्वयगर्भतावश्यकीत्याहुः अत्रेदमवधेयम् एतः प्रकृ

णास्य स्वविशिष्टसंबंधिनिष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकावच्छेद्यत्वाभावव्याप्यहेतुसमानाधि
करणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितात्वकधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति निष्कर्षः तेन सामान्य
त्वनिर्वचनानुपपत्तिर्न वा व्याप्तेर्विशिष्टे कार्यहेतुत्वानुपपत्तिश्च ॥ अथ या तादृशप्रतियोगितात्वव्यापकधर्मावच्छिन्नसामाना
धिकरण्यं व्याप्तिः व्यापकत्वं च स्वविशिष्टसंबंधिनिष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकावच्छेद्यत्वाभा
ववत्त्वसंबंधेन बोध्यं वक्तव्यं तत्र स्वविशिष्टसंबंधिनिष्ठाभावीयतादृशप्रतियोगितानवच्छेदकावच्छेद्यवृत्तित्वाभाववत्तादृशप्रति
योगितात्वव्यापकधर्मावच्छिन्नसामानाधिकरण्यं तादृशावच्छेद्यवृत्तित्वाभाववत्त्वसंबंधेन तादृशप्रतियोगितात्ववद्वृत्तिधर्मावच्छिन्नसा
मानाधिकरण्यं वा व्याप्तिः व्यापकत्वाद्यनिवेशे नातिलाघवादिति तत्रैवेतीति साध्यतावच्छेदकभेदेन व्याप्तेर्भेदादिति भावः
तेन वह्निमान् धूमादित्यादौ लघुरूपेण साध्यतायामनवच्छेदकत्वघटितलक्षणं विहाय प्रतियोगितात्वधर्मिकाभावाभावघ
टितलक्षणकरणेन नाव्याप्तिरिति ननु गगनादेरवृत्तित्वपक्षे लघुरूपेण साध्यतायामनवच्छेदकत्वघटितलक्षणमे
वोच्यतां अभावाभावघटितप्रतियोगिवैयधिकरण्यनिवेशादेवोक्ताव्याप्त्यभावादिति चेत् तादृशानवच्छेदकत्वस्य व्यापकता
नवच्छेदकगुरुधर्मसाधारणतया व्यापकतावच्छेदकतात्मकत्वासंभवात् एतेनात्र सद्धेतुविशेषरूपस्य प्रमेयवन्हि
मान् धूमादित्यादावितिनार्थः प्रमेयवन्हिमान् धूमादित्यादावपि साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणहेतुसमा

नाधिकरणाभावप्रतियोगितानवच्छेदकधर्मे यद्वन्हित्वाद्यवच्छिन्नसामानाधिकरण्यस्यैव व्याप्तित्वसंभवात् तस्मात्सद्धेतुविशेषप्र
मेयघटत्वात्कालपरिमाणादित्यादावतिव्याप्त्येयं तत्र साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्योपदर्शितरीतेर
संभवादित्यपि परास्तं प्रमेयघटत्वान्कालपरिमाणादित्यादावपि उभयाभावघटितप्रतियोगिवैयधिकरण्यं निवेश्योपदर्शितरीतेः सं
भवात्तु प्रामादिकः इति न चासद्धेतौ व्याप्तिभ्रमादनुमितस्तुस्येन न तत्रैवैतादृशव्याप्तिज्ञानस्य हेतुतया न प्रामादिकत्वमिति वाच्यं या
त्तत्वव्याप्त्यभिप्रायेण प्रामादिकत्वमिति वाच्यं वास्तवव्याप्त्यभिप्रायेण प्रामादिकत्वस्योक्तत्वात्तथापि द्रव्यलघुरूपसंभवे नियतगुरुध
र्मावच्छिन्नसाध्यकासद्धेतौ कदाचिन्न तादृशव्याप्तिभ्रमस्तत्रैवैतादृशधीनेरभावेन तादृशासद्धेतुत्वावच्छेदेन एतादृशानुसरणा ३१८
वश्यसंभवेन व्याप्तिज्ञानाभिप्रायेणापि प्रामादिकत्वात् अव्याप्यवृत्तिसाध्यक इति यत्र साध्यतावच्छेदकं प्रतियोगितावच्छे
दकं तत्रापि निशेषः उचितमिति न च्याचतत्रैव समग्नमिति भावः गुरुधर्मस्यावच्छेदकत्वांगीकर्तृणां केषांचिन्मतमाह हेत्वधिनो
गौरवप्रतिसंधानदशायामपीत्यादिना केचित्त्विति तेन एतन्मते च कालो घटवान्कालपरिमाणादित्यनुरोधेन प्रतियोगितावच्छेद
कसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वय
द्धर्मावच्छिन्नत्वोभयाभाव इत्यादिरीत्या लक्षणं निर्वाच्यं अत्रैकं वृत्तौ वादिमान्नास्तीत्यादिप्रतीतिर्न गुरोरवच्छेदकत्वसाधिका
गुरोरनवच्छेदकत्ववादिनां तादृशप्रतीतेर्महत्त्वस्यापि वक्तुं शक्यत्वादिति तादृशप्रतीत्यनुपपत्तिरेव तत्साधकत्वेन वा आसमंवोरवा

प॰प्र॰
११०

प्रतिसंधानदशायां न मम वति गुरोरनवच्छेदकत्वमतेपि गौरवज्ञानस्यैव प्रतियोगितावच्छेदकत्वग्रहविरोधित्वेन तद्दशायां तादृ
शप्रतीत्यनुपपत्तेरभावात् अन्यथा गौरवप्रतिसंधानदशायामपीत्युक्तमन्यथा तद्दशायां गुरोरनवच्छेदकत्वमतेन तादृशप्रतीत्यनुप
पत्तिः तन्मते गौरवस्य प्रतियोगितावच्छेदकत्वविरोधित्वेन तद्विरोधिज्ञानस्य तद्बुद्धिप्रतिबंधकतया तद्दशायां प्रतिबंधकसत्त्वेन तादृ
शप्रतीत्यनुपपत्तेः गुरोरवच्छेदकत्वे च गौरवज्ञानस्य तत्राप्रतिबंधकत्वेन न तदनुपपत्तिरिति गुरोरवच्छेदकत्वमात्रस्य फलमिति भा
वः गौरवज्ञानमात्रमप्रयोजकं अप्रामाण्यज्ञानानास्कंदितस्यैव विरोधिज्ञानस्य सर्वत्र प्रतिबंधकत्वादिति अप्रामाण्यज्ञानानास्कंदि
तगौरवज्ञानलाभाय गौरवज्ञानदशायामिति विहाय गौरवप्रतिसंधानदशायामित्युक्तं॥ ननु गुरोरनवच्छेदकत्वमतेपि गौरवप्रतिसं
धानदशायां न तादृशप्रतीत्यनुपपत्तिः सर्वत्र तद्विरोधिज्ञानस्य तत्प्रकारकबुद्धावेव प्रतिबंधकतया कंबुग्रीवादिमान्नास्तीत्यादि
प्रतीतेः स्वप्रतियोगितावच्छेदकत्वसंसर्गकत्वेन तत्प्रकारकतया गौरवज्ञानाप्रतिबध्यत्वात् इत्यत आह व्याख्यायां गौरवेसतीति गौ
रवसमानाधिकरणोऽस्यार्थः सामानाधिकरण्यं च नियततया ग्राह्यं तेन गौरवेऽवच्छेदकत्वविरोधिता लाभः यादृशावच्छेदकत्वविरहः श
क्यतावच्छेदकत्वविरहः संसर्गतयापि भानं इति अन्यथा गवयो गवयपदवाच्य इत्युपमितेः संसर्गतया गवयपदवाच्यता
वच्छेदकत्वविषयकत्वेन गौरवज्ञानाप्रतिबध्यतया गोसादृश्यपादौ गवयत्वापेक्षया गौरवज्ञानदशायामपि तत्र संसर्गि
तया गवयपदवाच्यतावच्छेदकत्व[illegible] विषयपि गोसदृशो गवयपदवाच्य इत्याद्याकारिकाया उपमितेरापत्तिः एवं

उप॰
११०

अयं धूमत्वं वह्निजन्यतावच्छेदकं अन्वयव्यतिरेकित्वादित्यनुमानात् न धूमत्वतद्वह्नित्वयोः कार्यकारणतावच्छेदकत्वे गौरवमिति
तादृशानुमानेन तद्धूमत्वतद्वह्नित्वाद्यवच्छेदेन न कार्यकारणभावग्रहोपि तु धूमत्ववह्नित्वावच्छेदेनैवेति सर्वसिद्धस्यानुपपत्तिः
अवच्छेदकावच्छेदेनानुमितौ अवच्छेदकत्वस्य संसर्गतया भानेन तत्संसर्गकज्ञानस्य च भवन्मते गौरवज्ञानाप्रतिबध्यत्वेन तदानी
मपि तद्धूमत्वतद्वह्नित्वावच्छेदेन कार्यकारणभावग्रहे बाधकाभावादित्याशयः गौरवज्ञानं विरोधीति ~~तथा च विरोधिभेदेन प्रतिबं~~
~~धकतावच्छेदेन कार्यकारणभावग्रहे बाधकाभावादित्याशयः गौरवज्ञानं विरोधीति~~ तथा च विरोधिभेदेन प्रतिबंधकताभेदादन्य
त्र तद्विरोधिज्ञानस्य तत्प्रकारकबुद्धावेव प्रतिबंधकत्वेपि प्रकृते फलबलात् तादृशावच्छेदकताविषयकज्ञानं प्रति गौरवज्ञानस्य प्रति
बंधकत्वं कल्प्यते एतेन गौरवज्ञानस्य तादृशावच्छेदकत्वसंसर्गकज्ञानेपि प्रतिबंधकत्वे सर्वत्र तद्विरोधिज्ञानस्य तद्धर्मसमानविशे
ष्यकत्वसमानप्रकारकत्वाभ्यामेव प्रतिबध्यप्रतिबंधकभावस्य क्लृप्तत्वेन तत्र तदनुपपत्तिरित्यपि निरस्तं न चैवमपि भ्रमे प्रमात्वादिनान
ज्ञाने व्यभिचारः गौरवज्ञानदशायामपि तद्दृश्यात् अवच्छेदकत्वसंसर्गकज्ञानस्यावच्छेदकत्वाविषयकतयावच्छेदकत्वावच्छि
न्नविषयताकत्वस्य प्रतिबध्यतावच्छेदकत्वासंभवादिति वाच्यं तादृशावच्छेदकत्वातिरिक्तप्रकारकतादृशावच्छेदकत्ववि
षयकज्ञानत्वस्यैव प्रतिबध्यतावच्छेदकत्वोपगमात् एवं च गौरवं यादृशावच्छेदकत्वविरोधि तादृशावच्छेदकत्वविषयकज्ञा
नविरोधिज्ञानविषयकमिति नियमः पर्यवसन्न इति भावः अवच्छेदकत्वांशे स्वीतिसंसर्गतया प्रतियोगितावच्छेदकत्वविषयके सर्वथैने

तादृशेति यथा घटपटादावनेकगुणासत्त्वे गौरवमिति ज्ञानसत्त्वेपि चक्षुःसंनिकर्षबलाद्घटादावनेकगुणसाक्षात्कारोदयेन गौरवज्ञानस्य
न तादृशज्ञानविरोधित्वं तथा प्रकृतेपि कंबुग्रीवादिमत्त्वांशे यत्र गुरुर्विनि गौरवज्ञानसत्त्वेपि कंबुग्रीवादिमान्नास्तीत्यादिप्रतियोगितावच्छे
दकत्वविषयकप्रतीतेरुदयेन गौरवज्ञानस्य नैतादृशज्ञानविरोधित्वं शक्यतावच्छेदकत्वादिविषयकज्ञानप्रत्येव गौरवज्ञानस्य विरोधि
त्वोपगमादिति भावः अभिप्रायेणोक्तेति न तथा व्यापकाभावे व्याप्याभावस्यावश्यकतया गौरवज्ञानस्य प्रतियोगितावच्छेदकत्वज्ञानविरो
धित्वाभावे गौरवे प्रतियोगितावच्छेदकत्वविरोधित्वाभावव्याप्तिग्रहस्यागुरुधर्मस्यावच्छेदकत्वे बाधकाभावेन गुरुधर्मस्यावच्छेदकत्वसिद्धिर्निष्प्र
त्यूहैवेत्यखण्डत्वार्थः विरोधितोत प्रतियोगिकाभावमात्रमिति न यावोक्तप्रतीतेरवच्छेदकत्वविषयकत्वमेवासिद्धमिति भावः ननु पुष्करिण्यां
पतिं विजल [illegible] व्यक्तिसत्त्वेपि पुष्करिण्यां जलं नास्तीति प्रतीतिवत् कंबुग्रीवादिमद्घटव्यक्तिसत्त्वेपि कंबुग्रीवादिमान्नास्तीति
तिप्रतीतेरुदयेन दृष्टापत्तिरिति तादृशप्रतीतेरनुदयोपि सिद्ध एवेत्यत आह अन्यत्रैवेति एकघटवति भूतल इति सत्यन्पर्यो विशेष्यकत्वं
प्रमाणपदार्थैकदेशप्रमान्वयि एवमग्रेपि संयोगेन घटवदभावेपि तु भूतले रक्षुक्तं मायामप्रमाणस्यादिति तद्भावप्रकारकं चेत् घटव्य
क्तिसत्त्वे कंबुग्रीवादिमान्नास्तीति प्रत्ययस्ति कप्रतीतेरुदये दृष्टापत्तावपि तत्तादृशशब्दस्य प्रमाणत्वापत्तिवारणाय तादृशशब्दजन्य
शाब्दप्रतीतेः कंबुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वावगाहित्वमावश्यकमिति भावः नप्रमाणमिति तज्जन्यशाब्दबोधस्य पर
स्परापेक्षाविशेष्यविशेषणभावायत्र कंबुग्रीवादिमत्त्वावच्छिन्नत्वप्रतियोगित्वविषयकतयावच्छिन्नत्वस्यैव प्रतियोगि

दूष्यत्वस्य व्याप्यत्वासंभवस्य वक्ष्यमाणतया तन्मतं वक्ष्यमाणं व्याख्यातं तद्वत्यादि सत्यन्ते इत्यत्र सिद्धसाधनप्रक्रिया

त्वं कंबुग्रीवादिमत्त्वसंबंधतया ज्ञानेनावच्छिन्नत्वेपि कंबुग्रीवादिमत्त्वसंबंधाभावे मे न वा भासमानवैशिष्ट्यप्रतियोगित्वरूपप्रकारत्वस्य
कंबुग्रीवादिमत्त्वे सत्त्वे न भ्रमत्वादिति भावः। तथा प्रति गुरोरनवच्छेदकत्वमुपेत्य करिष्यमाण एकघटवत्तितादृशशशशृङ्गस्य प्रमाण्यालोपपाद
ने। तस्यादितित्था च गुरोरवच्छेदकत्वमुपेत्य कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावत्वं तादृशशशशृङ्गजन्यशाब्दबोधविषयो वा भ्रमः ए
कघटवत्तितादृशाभावासत्त्वान्न तादृशशशशृङ्गः प्रमाणं घटसामान्यमपि चेत तादृशाभावसत्त्वान्न तादृशशशशृङ्गः प्रामाण्यमिति भावः। ननु गुरोरनवच्छेदक
त्वादिमते तादृशशशशृङ्गस्य घटसामान्यस्यापि प्रमात्वमिष्टमेव यद्घटत्वावच्छिन्नप्रतियोगिताकाभाव एव तादृशशशशृङ्गजन्यशाब्दबोधविषय इति
घटसामान्यस्येव तादृशशशशृङ्गस्य प्रमाणालोपपत्तिः न चैवमन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य त्यक्तिभंगप्रसंग इति वाच्यं आकांक्षा
रूपान्यसत्त्वे समभिव्याहारभेदेन भिन्नतया दोषादिति तो गुरोरवच्छेदकत्वेपि तत्रम्भाहदीधितौ न चेदेवमिति अधिकगौरवप्रदर्शनाय आह गुरा
कर्मीत्यत्वेति एवमित्यादिना व्याप्यत्वेन रूपेणाइव्यत्वस्यानुमानमतेन दोषः गुणादीति आदिना गुणकर्मोभयसत्वेद्रव्यत्वस्य च परिग्रहः समनियत
मकसंबंधेनाप्यव्याप्यत्वापत्तिमाह एवमिति सामान्यकइति अत्र सामान्यपदानुपादाने वह्निमान् धूमादित्यादौ व्यावच्छित्त्याभाववद्संबंद्धरूपवत्त्वादि
निष्ठधूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वकत्वस्य घटादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेसत्त्वेन तद्वच्छिन्नाभा
वस्य वह्नित्वादावसत्त्वात् व्याप्तिरिति सामान्यपदोपादानमिति द्रष्टव्यं। ननु गुरोरवच्छेदकत्वस्वीकारे इति न्यस्वीकारेपि उपदर्शिताव्याप्त्यापत्यभा
वादिति भावः। दीधितौ उपदर्शितप्रकारेणामिति उपदर्शितसत्त्वात्तीपप्रकारेणेत्यर्थः। अवतारणे ज्ञप्रकारस्य अर्थात्वमनुपदर्शितत्वेन प
क्षाभ्रूयते संगतेः केचित्तु दर्शोपदर्शितपारिभाषिकावच्छेदकानुसरणे हेतुनावच्छेदकरूपेणहेतोरभावप्रतियोगितावच्छेदककोटावनिवेशे
न गुणादिनाव्याप्यत्वपरिहारासहउपदर्शितेतियथाश्रुतनार्थकमेवेत्याहुस्तन्न पूर्वं तथा चेत्यादिप्रकारस्यैव निष्कृष्टतयाभिधानेन त

स्यचोक्ताभावे हेतुसमानाधिकरणाभावोपविशेषणतानिविशेषावच्छिन्नप्रतियोगितात्वव्यापकत्वमेव साने ननु हेतुतावच्छेदकरूपेणाहेतोः प्रतियो
गितावच्छेदककोटौ निवेशस्यावश्यकत्वान्न व्याख्यायां इत्यादेरिति आदिना हेतुसमानाधिकरणाभावे साध्यतावच्छेदकसंबंधसामान्ये इत्यादि
त्योभयाभावघटितप्रतियोगिवैयधिकरण्यनिवेशेन साध्यतावच्छेदकसंबंधादिव्यक्तीनां विशिष्यज्ञानेन तत्सामान्यज्ञानमशक्यमित्यस्य परिग्रहः
धूमत्वावच्छेदेनेति धूमव्यक्तीनां विशिष्यज्ञानेपीत्यादिः गुणसमानाधिकरणेतिनिरुक्तावच्छेदकत्वव्यक्तीनां विशिष्यज्ञानेपीत्यादिः अप्रसि
द्धत्वं सुग्रहमेवेति इदमुपलक्षणं साध्यतावच्छेदकसंबंधादिव्यक्तीनां विशिष्यज्ञानेपि साध्यतावच्छेदकसंबंधत्वादिना तत्सामान्यं सुग्र
हमेवेत्यपि द्रष्टव्यं इदं ज्ञानेनेति निरुक्तावच्छेदकत्वलाघवघटितत्वेन निरुक्तसंबंधत्वादिज्ञानेनेत्यर्थः निरुक्तरूपव्याप्त्यनेति हेतुसमानाधिकरणा
भावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यपरत्वेनेत्यर्थः तथा चेदृशव्याप्तिज्ञानसामग्र्यभावदशायामीदृशव्या
प्तेर्दुर्ज्ञेयत्वादिति दीधिति लेखाशयमिति भावः व्यभिचारस्य दुर्ज्ञेयत्वादपि गुरोरवच्छेदकत्वमावश्यकमित्याह दीधितौ अत एवेति सामुत्तुत्तेयं प्र
गच्छत इति गुरोरनवच्छेदकत्वे घ्राणग्राह्यगुणत्वादिरूपसाध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्या साध्यतावच्छेदकनिष्ठप्रतियोगितावच्छेदकत्वपा
रिभाषिकमेव तन्निवेशनीयं तत्र चोपदर्शितरीत्या प्रतियोगितानां विशिष्य वैपादेयतया दुर्ज्ञेयत्वापत्तिः गुरोरवच्छेदकत्वे तु नोक्तापत्तिरिति
गुरोरवच्छेदकत्वमावश्यकमिति भावः व्याख्यायां पूर्वोक्तरीत्या धूमत्वावच्छेदेनेत्यादिदीत्या इत्यस्य स्वरसात् एतादृशाद्येवास्वरसात् हे
तुसमानाधिकरणेत्यादि पूर्वप्रसंगेन साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमेवात्र व्यभिचार इत्याश
यः व्याचक्षुरिति अत्र तथापीत्यादिग्रन्थः ईत्याताइदृशव्याप्तिज्ञानसामग्र्यभावदशायां तादृशा श्रीरामायनमः॥ श्रीजानकीवल्लभः

व्याप्तेरुद्देश्यत्वसत्त्वेन व्याप्तेर्न उद्देश्यत्वमित्यस्वरसादिति संगतं साध्यतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वरूपव्यभिचारिपरिसत्त्व[illegible]अभि
चारान्तरोपयहेपयोजकाभावश्चेत्यस्वरसोऽद्रष्टव्यः दीधितौ केचिदित्यनेनास्वरसोद्भावनेन [illegible]जं च गुरोरनवच्छेदकत्वमतेनादृशव्याप्ति
नसामग्र्यभावदशायां यथाश्रुतव्याप्तिज्ञानादनुमितेरानुभविकत्वस्यैवासिद्धिः अथ यथानिरुक्तयथाश्रुतव्याप्तिज्ञानसामग्र्याभाव
दशायामपि साध्यसंबंधितावच्छेदरूपवत्त्वादिज्ञानतस्तादृशज्ञानादनुमितेरानुभविकत्वस्यैव कुशाक्ततया भवन्मतेऽनुस्तस्यापि हेतुत्वासिद्धिप्रसं
गो व्याप्तिज्ञानमात्रस्यैव हेतुत्वासिद्धिप्रसंगो वा स्यात् तत्राप्यव्यभिचारस्य दुर्ज्ञेयत्वे साध्यतावच्छेदकनिष्ठावच्छेदकत्वस्य[illegible]मित्यादिशरीरे संसर्ग
तयैव निवेशात् सामान्यलक्षणादिना प्रतियोगितावच्छेदकानामपि सुग्रहत्वाच्च अत एव गुरोरनवच्छेदकत्वे लघुरूपसमनियतगुरुरूपेणाव्या
प्यतायां समानप्[illegible]कारकत्वेन प्रतिबंधकतामते बाधानुपपत्तिरित्यपि निरस्तं एवं च तत्[illegible]चविशेषणतावच्छिन्नत्वादिना परि
ष्कृतव्याप्तिलक्षणस्यापि प्रतियोगितानां विशिष्य यादात्म्य उद्देश्यत्वाभावेन संपत्केन[illegible]अपेरुत्स्व विशिष्ट[illegible]एसाधारिमापिकाचेच्छे
दकत्वपर्यवसिते स्वनिष्ठभेदीयावच्छेदकनिष्ठप्रतियोगितानिरूपितायाश्चावच्छेदकत्वनिष्ठावच्छेदकतानिरू[illegible]तायाः प्रतियोगित्वनिष्ठावच्छे
दकतानिरूपितायाः भावनिष्ठावच्छेदकतान[illegible]रूपितायाः प्रतित्वनिष्ठावच्छेदकतानि[illegible]त्रिरूपितायाः संबंधिनिष्ठावच्छे[illegible]कतानिरूपि
तायाः संबंधित्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावच्छेदकीभूतधर्मान्तिष्ठतन्नविच्छिन्नावच्छिन्नप्रतियोगिता[illegible]दिक[illegible]
[illegible]रुधिकरणाद्वृत्तसभावप्रतियोगितावच्छेदकविशिष्टप्रत्साध्यतावच्छेदकेन स्वावच्छिन्नाभावाधिकरणवृत्तित्वेन गुरुधर्मस्याभा
वत्वसंबंधेन ०

प्यो२ प्या१ प१

वप्रतियोगितावच्छेदकत्वाभावेपि गुरुत्वादिमादेनगुणादेरव्याप्तावप्रतियोगिनिर्वाहः मेदकूटस्य संबंधघटकत्वपातवृत्तिपो[illegible]पस्थितिः पूर्वमनपेक्ष्यराणा
तरुवविशिष्टतानाविशेषावच्छि[illegible] [illegible]रिक्तो रत्र्य भिचारलस्यरोचानतुगतत्वात् संबंधघटकतामुपेत्यो ऋटोषोवाररवापरस्यारूढः पत्तुत्रवच्छेद
कात्वपस्तिनत्वच्छेदकस्वरूपंतदागुरुधर्मस्वरूपाणामपिसत्वात्कथंतेनावच्छेदकाः पदिचातिरिक्तपदार्थस्तदागुरुधर्मोघवच्छेदकत्वा[illegible]
स्तभावात्पत्तरस्वी[illegible]कारावश्यकत्वात्स्वच्छेदकत्वस्वीकारेपिगौरवाभावेनत्रभाव[illegible]कस्य[illegible]नापेक्षयाभाव[illegible]कत्वेनात्मा[illegible]एवौचित्येनचप्रती
योगिमानमवच्छेदकत्वमेवस्वीकर्तुमुचितमित्युभयपक्षापिगौरवच्छेदकत्वासिद्धिरितित्वत्रवच्छेदकत्वस्यस्वरूपसंबंधविशेष[illegible]रूपात्मकत्व
पानेकपदार्थघटितगुरुधर्मस्वरूपाणांसत्वेप्यनेकपदार्थानांसंबंधत्वस्य[illegible]सत्त्वपातेषांसंबंधत्वकल्पनापेक्षया[illegible]धर्म एवतत्कल्पनौ
चित्येनगुरोरवच्छेदकत्वासिद्धेः ना किंकचक्रवर्तिनः[illegible]प्रतियोगितायाः स्वरूपसंबंधरूपावच्छेदकत्वएव[illegible]नाभावः नहि[illegible]नास्तीमा
दो[illegible]घवत्वस्यावच्छेदकत्वमपिमास्तनेघ[illegible]भावयोः घटत्वादेः प्रतियोगिताविशेष[illegible]स्यवासंबंधत्वेनैवघटोनास्तीसाप्रतीतेः तत्प्रतिबंध
कत्तायाश्चापपतेः नचैवंकार्यताकारणातयोरप्यवच्छेदकत्वस्यासिद्धिप्रसंग इतिवाच्यं दृष्टापत्तेः प्रतियोगित्वादिवत्तयोरपिस्वरूपसंबंध
रूपत्वेनकार्यतावच्छेदकत्वादिकमपिविनिगमनाविरहेणानुपपत्तेरभावात् नचैवंतदवच्छेदकतयाजातिसिद्धिर्नस्यात्तत्कल्पनागुरुभूतोपाधीना
मवसर्वसंमतत्वात्तत्रसत्वेनतैरेवकार्यतानुगमसंभवादितिवाच्यं दृष्टापत्तेः एवंचलघुभूतायाजातेरेवकार्यतावच्छेदकत्वमित्यपिनास्ति
शक्यत्वेनशक्यत्वेनिलेचसतिशक्यतावच्छेदकत्वेबाधकाभावात्अन्यथालघुतावच्छेदकतापिगुरुधर्मस्यनभवेत्प्रतिज्ञानकार्यतावच्छेदकत्वस्या
न्योपस्थितिप्रकारत्वस्यैवतद्रूपतयाप्रकारतायाश्चगुरुभूतोपाधावपिसर्वसंमततयातस्यापिशक्य १

धा०म० २

भवत्रत्तौ साध्यदिति घाऽऽरितिकृतं परस्कृ वृत्तिना ॥ ॥ व्याख्याचवच्छेदकग्रंथे यामयारचिता श्रमात् तपा भवतु संतुष्टः शिवपासहितः शिवः १
नमामि तत्र रेखा मेसचं स्य वस्तुनः ५ ध्ये भंपास्य सादेन सुलभं भवतिस्स राता । २ । इति श्री मत् … देवकृते भवानी द्वीपकोशेऽवच्छेदक
त्वकरामकृतश्च … कृतं … वक्रगिरं या ख्यानं … पिकु … वीति मतिचंघकसामग्र्याभावसंपादकौ त्खले १ ननु यएवेमादिदीधितिग्रंथस्यावहेत
त्वशंकामपाकरोति षा … ति एवोक्तिं तत्ताभावघटितया तेत्यर्थः तथा चोक्त व्याप्तिलक्षणानंतरमयोक्तानसंगत्या सामान्याभाव पार्थक्य व्य
ख्यापनमिसेत्त सूचकतया ना प्रकृतत्वमिति भावः दीधितौ धियुंजनयंतीति अत्र विषयीभवनुमेचजननं तेन धिणो विषयीथैं भवंतीत्यर्थः ते
न वह्नित्व … स्याती द्विपद्य राफ कहा नित्वेन तत्त्वावच्छिन्नाभाव … स्याती द्विपत्तया विषयत्वेन लौकिकप्रत्यक्षजनकत्वासंभवेपि … संगतिः वस्तुतस्तु
धीपदं प्रत्यक्षप्रमापरं तथा च प्रत्यक्षप्रमायां विशेषणतावच्छेदकसंनिकर्षस्य जनकतया नह्यहंतया ना … धीजनकत्वं वह्नित्वावच्छिन्नाभाव
स्याप्यस्तीत्यर्थ … ती द्विधर्मावच्छिन्नाभावस्यैव लौकिकप्रत्यक्षाभावे मान्तीं द्वि … त्रि … र्मावच्छिन्नाभावस्य लौकिकप्रत्यक्षस्यैव यावद्
रूपसामान्य … वादिव … सामान्याभावस्यापि लौकिकप्रत्यक्षसंभवेन तस्यापि … वाहित्वो स्तीति धीजनकत्वमस्त्वतमिति ध्येयं तत्र चेति दे
विषधिकरणपसत्वेना … तिख्यायां स्वंतंत्र सवति योगि … ति योगितायाः … योगि स्वरूपत्वादितिभावः एतेन सामान्याभावानैति । का
रिपिसामान्यधर्मावच्छिन्नप्रतियोगितायाः अतिरिक्तत्वांगीकारेनाव्याप्तिरिसापि निरस्ता प्रतियोगि वैयधिकरणापत्ताप्रतियोगितावच्छेदके
सामान्यघटितत्वेनैव मितिवर्ष्टमाया दीसा नाव्याप्तिरित्य आह तथा च पारा … ति नैव मपिपारिभाषिकावच्छेदकत्व … तन्न … रोणाव्याप्तिरिति

ध्य तेति ३ ६२ घटित्वे तप

ना६ क७ ५८ ६८

कार व१ घ२

म० प्र०
११४

द्धूमाभावप्रतियोगितावच्छेदकवह्नित्वस्य यत्किंचित्स्वावच्छेदकत्व तद्वह्नित्वावच्छिन्नानधिकरणवह्नित्वविशिष्टसंबंधिनिष्ठस्य तद्धूमाभावप्रतियोगितावच्छेद
कत्वादितिचेदत्राहुः सामान्याभावानंगी[illegible]रेपारिभाषिकावच्छेदकत्व[illegible]टकप्रतियोगिवैयधिकरण्यपर्यंतप्रतियोगितावच्छेदके[illegible]घटि
तमेववाच्यं अन्यथा धूमत्वविशिष्टसंबंधिनोपि तत्तद्धूमत्वावच्छिन्नानधिकरणत्वेन धूमत्वस्य स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेद
विशिष्टसंबंधिनोपि तत्तद्धूमत्वावच्छिन्नानधिकरणत्वेन धूमत्वस्य स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वेनातिव्याप्त्यापत्तेरिति
गुरुधर्मोपि प्रतियोगितावच्छेदक इत्याशयेनैव इदमित्यपि केचित् यत्किंचित्स्वप्रतियोगितावच्छेदकघटितप्रतियोगिवैयधिकरण्यघटितलक्षणे गौ
व्याप्तेरसंगतत्वेऽनुगमेन चैवमित्याद्यसंगतमतोभावमाह तथा चेति धर्मत्वमिति अन्यथाव्याप्यवृत्तिसाध्यकाव्याप्तिनादवस्थेन प्रतियोगिवैय
धिकरण्यस्याभावनिर्वचनीयत्वापत्तेरित्याशयः ननु घटाद्यभावस्यापि पर्वतादौ[illegible]त्वादिरूपतत्प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याभावे
न प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यातिव्याप्त्यसंभव इति तथा सतीसाहिकमसंगतमत आह[illegible]वं सतीति नत्वं अनवच्छेदकत्व
घटितत्वं प्रतियोगितावच्छेदकसंबंधेनेत्यादिनात्र संयोगेन तत्तद्[illegible]भावस्य संयोगेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणप्र
गादिवृत्तितया तत्प्रसिद्ध्याव्याप्तिवारणाय हेतुसमानाधिकरणत्वोपादानेपि उभयाभावप्रतियोगिकोटौ साध्यतावच्छेदकसंबंधावच्छि
न्नत्वोपादानं व्यर्थं न च समवायेन तत्तद्घटाभावमादायाव्याप्तिवारणाय तदिति वाच्यं सत्वस्यापि तदभावप्रतियोगितावच्छेदकत्वेन तत्
स्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपानाक्रांतत्वादिति चेन्न वस्तुमात्रादिशोकालिकेन विषयितापा चतत्[illegible]भावस्यापि प्रतियोगि

को१ नद्धत्व१

वृ०७
द्वस्र ४
न्या २

सहमान्य

इति ७
राम
११४

त्वाधिकरणत्वेनतमादायाव्याप्तिवारणायैवतत्पादानस्यावश्यकत्वात् तथासतीतिरूपवृत्तित्वादीधितौतत्तथासतीसम्यक्तदधिकरणोभावच्छेदक
पर्लिंकिंचिदवच्छिन्नत्वसत्त्वएवतत्रस्वावच्छेदकावच्छिन्नवैयधिकरण्यापत्तिनिरूपकत्वमित्यर्थः अभावान्तरमादायेत्यप्साप्तिपातिनश्चेति जन्यमात्रस्यकालो
पाधित्वाभ्युपगमेप्याह एवमितिनन्वेवंयथासादिनाधूमवान्वह्नेरित्यादावतिव्याप्त्यभिधानमसंगतंसार्थमात्रस्यधर्मस्याभावप्रतियोगितानवच्छेदकत्वे
धूमत्वावच्छेद्यत्वाप्रसिद्ध्याप्रतियोगिताधर्मिकोभयाभावघटितलक्षणेतिव्याप्त्यसंभवात्तन्नचानवच्छेदकत्वघटितलक्षणाभिप्रायकमिति
दमितिवाच्यमेवोत्तरफक्किकयोर्भिन्नलक्षणाभिप्रायकत्वेसंदर्भविरोधात्तत्राहान्तरीसेति अतिव्याप्तीसेत्यर्थः अगौरूसेति अतिव्यासि
र्वोपिनेत्वदेतिशेषः वह्नित्वावच्छेद्यत्वाप्रसिद्धेरित्यव्याप्तिः एतन्मतेसाचेदितिशेषः लक्षणमितित्रचतद्धेतुमान्नतत्धूमादिमाद्दोविशेषरूपेणा
साध्यतापामव्याप्तिवारणायहेतुसमानाधिकरणत्वमभावविशेषणमुपात्तमितिध्येयंतत्त्वभावस्येतिकृशादिहन्नितद्रूपत्वावच्छिन्नाभावस्येत्यर्थः
अभावएवेतिअभावान्तराणामुपदर्शितरीत्यासाध्यतावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणत्वाभावादितिभावः प्रतियोगिव्यधिकरणः उभयाभाव
घटितप्रतियोगिव्यधिकरणत्वाश्रयः एवमग्रेपितथाचतादृशविशिष्टाभावमादायैववह्निमान्धूमादिस्थलेलक्षणसमन्वयइतिभावः ननुसर्वत्राभा
वाभावस्यप्रतियोगिरूपत्वात्तद्रूपात्मकविशिष्टाभावस्यहेतुसामानाधिकरण्याभावेनकथंलक्षणघटकत्वमतआहअभावेतिप्रतियोग्यतिरिक्तस्येति
भावः अभ्युपगमादितिअथातस्यकेवलान्वयित्वानुपपत्तिरितिभावः एतन्मतेचसर्वोपिग्रंथोनवच्छेदकत्वघटितलक्षणाभिप्रायकएवप्रतियोगिव्यधिक
रणाभावाप्रसिद्धभावेनाव्याप्यभावस्यातिव्याप्त्यसंभवात् एवमन्तरत्राभिनवादिमतेपीतिबोध्यंविशेषणतापेतितद्रूपवत्त्वन्नित्वेप्यनेनापितेनत्वभावस्य
प्रतियोगिविरोधित्वेनियमेनोपदर्शितविशिष्टाभावस्यकेवलान्वयित्वापत्तात्द्रूपवत्त्वन्नित्वावच्छिन्नाभावत्वासंभवेननतदात्मकत्वमतआहास्यथेतिनोच्यतेतरत्निता

भा॰ प्र॰
११५

घ१

घवादिति शेषः वार्थ्येहन्निन्नेति तादृशानियमस्य केवलान्वय्यभावातिरिक्ताभावविषयकत्वादिति भावः तुल्यमिति इदमुपलक्षणं निरुक्ताभावस्यैव प्रतियोगिव्यधिकरणा
त्विन्तराभावर्त्तकतयापीदं तु समानाधिकरणात्वस्यैव वैयर्थ्यं प्रतियोगिव्यधिकरणात्वमपि साध्यतावच्छेदकसंबंधानिरूक्तप्रतियोगिप्रतियोगिकात्वाभावगर्भमेव सुवच
मित्यपि द्रष्टव्यं तस्यापि आकाशस्यापि तदभावोपि आकाशाभावोपि तथा न प्रतियोगिव्यधिकरणः तस्य ह्रदात् इतित्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधि
करणात्वादिति भावः यस्येत्यादि तद्धर्मावच्छिन्नाभावबुद्धिनियामकाभावस्यैव तद्धर्मावच्छिन्नप्रतियोगिताकत्वात् तद्धर्मावच्छिन्नाभावबुद्धिनियामकत्वस्य च तद्धर्मा
वच्छिन्नाभावबुद्ध्यभावप्रयोजकाभावप्रतियोगित्वरूपत्वादिति भावः तस्येनेति अतीन्द्रियधूमग्राहकाभावस्य ह्रदात् इतित्वावच्छिन्नाभावबुद्धिनियामकत्वाभावादि
तिभावः तस्यैव धूमग्राहकाभावस्यैव प्रतियोगिव्यधिकरणात्वेन तत्संभवेऽत्र इति व्याप्त्यसंभवादिति धूमत्वस्य सामान्यधर्मस्य विशेषाभावात्मकधूमग्राहकाभा
वप्रतियोगितावच्छेदकत्वादिति भावः अथातीन्द्रियधूमग्रहणकाभावस्य धूमत्वावच्छिन्नाभावबुद्धिनियामकत्वस्याप्यभावात्कथमेतदिति चेन्न धूमग्राहकवति
धूमो नास्तीति बुध्यभावेन धूमग्राहकाभावस्यापि धूमत्वावच्छिन्नाभावत्वाश्रयविशेषाभावकूटान्तर्गततया धूमत्वावच्छिन्नाभावबुद्धिनियामकधूमत्वाव
च्छिन्नाभावसंपादनद्वारा धूमत्वावच्छिन्नाभावबुद्धिनियामकत्वात् न चैवं रीत्या धूमग्राहकाभावस्य ह्रदात् इतित्वावच्छिन्नाभावबुद्धिनियामकत्वमप्यस्तीति
वाच्यं॥ धूमग्राहकवति मृत्तिकाग्राहकादेरवश्यं सत्वेन तदभावस्यैव ह्रदात् इतित्वावच्छिन्नाभावत्वाश्रयविशेषाभावकूटान्तर्गततया ह्रदात् इतित्वावच्छिन्ना
भावबुद्धिनियामकह्रदात् इतित्वावच्छिन्नाभावसंपादनद्वारा ह्रदात् इतित्वावच्छिन्नाभावबुद्धिनियामकत्वेन धूमग्राहकाभावस्यानियामकत्वात् तच्च विनिगमकाभावा
त् धूमग्रहणकाभावस्यापि तादृशविशेषाभावकूटान्तर्गततया तत्प्रयोजकत्वमिति वाच्यं। मृत्तिकाग्राहकादिमति धूमग्रहणकस्यावश्यं सत्वे मानाभावेन मृत्तिकाग्राह
काभावस्य तादृशविशेषाभावकूटान्तर्गतत्वस्यावश्यकत्वात् परन्तु तद्धर्मावच्छिन्नाभावबुद्धिनियामकत्वं तद्विषयत्वेन जनकतापार्कितु तत्समानत्वनियामकतया संबन्धच हृ

घ॰४

राम
११५

संपादनद्वारा तत्तद्धर्मावच्छिन्नाभावबुद्धिनियामकत्वस्यैवोपदर्शितास्वरूपस्य लाघवेन तन्मात्रनियामकत्वात् धर्मावच्छिन्नाभाव

दादित्वावच्छिन्नाभावबुद्धिनियामकत्वं घटत्वाद्यवच्छिन्नाभावस्यापि अन्यथा धूमघटादौ एकवृत्तिद्वित्वावच्छिन्नं नास्तीति बुद्धेः प्रमात्वप्रसंगादिति सूक्ष्ममाकाशाभा
वस्य च प्रतियोग्यसमानाधिकरणाद्वित्वत्वावच्छिन्नाभावस्य द्वित्वे अभावाभावत्वेनेत्यादि यथा द्वितीयत्वेन जलनैकत्येपि उक्तरीत्या तद्धर्मावच्छिन्नाभावबुद्धिनियामकत्वं धर्मा
वच्छिन्नाभावबुद्धिनियामकत्वालाभात् लाघवेनोक्तरीत्याम् जिकाद्यघटादिकाद्यभावस्यैव द्वित्वादित्वावच्छिन्नाभावबुद्धिमात्रनियामकत्वं यथा धूमघटादिकाभा
वस्य तत्तद्द्वित्वावच्छिन्नाभावबुद्धिनियामकत्वासंभवात् वस्तुतस्तु अन्यत्वादिमत्ते आकाशाभावस्यैव प्रतियोग्यधिकरणत्वेहेतुसमानाधिकर
णत्वस्याव्याप्यवर्तकतया वैयर्थ्येन तद्दृष्टिते अव्याप्तिलक्षणत्वासंभवस्य दुष्परिहरत्वात् आकाशसाधारणद्वित्वत्वस्याकाशव्यावृत्तद्वित्वस्य भावप्रति
योगितापाअतिरिक्तद्वित्वत्वेनानवच्छेदकतया धूमाभावस्यापि प्रतियोग्यधिकरणत्वेनातिव्याप्तेः संभवात् आकाशाभाव एवैतस्यासंगतत्वाद्वैतन्मत
मसंभवदुक्तिकमेवं एतेन संयोगेन गोत्वाभाव एव प्रतियोग्यधिकरणाद्यनवच्छेदकत्वघटितलक्षणाभिप्रायकः एवं च सर्वोपि ग्रंथस्तु निर्बीनोक्तिरपि
चिंत्यैवेति दिक् यथाकृतेति सिद्धसिद्धव्याघातादाद्य अनुगतरूपस्य स्येति अत्रेदं बोध्यं अनुगतधर्ममात्रस्य प्रतियोगितानवच्छेदकत्वमतेरूपेण नास्तीत्यादि
द्वौ नारूपत्वाद्याश्रयप्रतियोगिकस्याव्यभावस्तत्र प्रतियोगितासंबंधेन रूपादिकं च विषयः वैशिष्ट्यव्यासज्यवृत्ति धर्मावच्छिन्नाभावयोरप्यतिरिक्तत्वाभ
वेन तावादृशयातिप्रसंगाभावात् नचैवमस्मदादीनामसार्वज्ञ्येन तादृशबुद्धिर्न स्यादिति वाच्यं सामान्यलक्षणया सकलरूपाद्युपस्थितौ तत्संभवात्
एवामितन्मते बाधबुद्धिप्रतिबंधकत्वमपि तत्तत्ताबुद्धिप्रतितत्प्रतियोगितासंबंधेन तत्प्रकारकाभावनिश्चयत्वेनेति अत्रेत्यादि विधिकोटिः परमते
निषेधकोटिसिद्धौ न घटाभावे रूपं नास्तीति प्रतीतेरभावद्वयविषयकत्वेन सिद्धसाधनतादशवायायादिति अत्रापि परमते विधिकोटिनिषेधकोटिसिद्धौ

भ·प्र·
११६

तेऽत्र सामानाधिकरण्येन पक्षत्वेऽभावांतरविषयकसमूहालंबनमादाय विधौ सिद्धसाधनं अवच्छेदकावच्छेदेन पक्षत्वे तमादाय निषेधे बाधइ
ति विप्रतिपत्तिपक्षेतरमाह अत्यंताभावेत्यादि अत्र विधिकोटिः सिद्धांते निषेधकोटिः परमते रूपवत्त्वे तत्प्रफलस्य रागतथा च सिद्धांतिमते अत्यंताभावप्रति
रूपत्वावच्छिन्नप्रतियोगिताकत्वस्य रूपकालावच्छेदेन रूपवद्वृत्तिभिन्नेऽत्पत्तिकालावच्छेदेन रूपवद्वृत्तौ रूपसामान्याभावे इष्टत्वात्तथा विधिसिद्धिः
एवं पक्षसिमंते तत्तादृशरूपप्रागभावप्रतिकृत्वेनादृशरूपत्वावच्छिन्नप्रतियोगिताकत्वेनास्तीति निषेधासिद्धिः अत्रेत्यादि तत्तीयादिस्तरागास्तत्र चाप्रसं
योगप्रागभावस्य स्वरूपकालेपि पृथिव्यादौ सत्त्वेन तत्स्वरूपत्वसामान्यावच्छिन्नप्रतियोगिताकत्वेन तदानीं तत्र तत्तद्व्यक्त्यभाववत्प्रतीत्यापत्तिरतो द्वि
तीयपक्षस्येति पृथिव्यादिसंयोगप्रागभावस्य तत्त्वेसंयोगप्रतियोगिपृथिव्यादौ तत्प्रतीत्यापत्तिरतो वा प्रसंयोगितिरूपप्रागभावस्य तत्त्वे
वायोः सकलानां रूपसामान्याभावानां प्रतीत्यनुपपत्तिरतस्तस्येत्यागः सत्त्वादित्यत्र तत्त्वे बाधकाभावादिति भावः यद्वा सिद्धसाध
नशंको अर्थांतरपरः तथा च तादृशप्रागभावस्य तत्त्वेनार्थांतरं अत एवरूपप्रागभावत्यागः [एक]देशिभिन्नस्वरूपसामान्याभावो
वात्मकत्वोपगमादिति भावः ध्वंसेत्यत्यंताभावप्रतित्वविशेषणाबाधः प्रसिद्धिबाधः विशेषणाभावेति अत्र भेदप्रतियोगिको
ऽरूपवत्त्वस्य विशेषणत्वेन तादृशरूपसामान्याभावमसिद्धान्रूपकालावच्छेदेनेतिनिर्देश्यमेवेतिध्येयः सिद्धसाधनेऽर्थांतरं ध्वंसेत्यरूपवद्वृत्ति
त्वभिन्नत्वविशेष्यतावच्छेदकत्वयोपात्तमिति शेषः अर्थांतरं निराकरोति रूपकालेत्यादि समेनेयत्सेसंपादनाय रूपका[struck]का

राम
११६

लावच्छेदेनेतिप्रत्तित्वविशेषणं रूपवत्त्वस्य विशेषणत्वे तु तत्र देयं रूपसिद्धिरेवेति तथा च प्रकृतोपयोगित्वान्नार्थान्तरमिति भावः उत्पत्तिकालावच्छेदेन रूपसामान्याभावानंगीकर्तृप्राचीनमते त
रूविप्रतिपत्तेः संभवादाह दिगिति दिगर्थमाह रूपत्वावच्छिन्नप्रतियोगिताकत्वं मास्तु प्रत्तित्त्वेन वा रूपाभावादिमुख्यविशेष्यकारूपं नास्त्येत्यादिप्रतीतिर्विशेषाभाववद्वृत्तिरिक्तमुख्य
विशेष्यिकानवेत्यादिकापि विप्रतिपत्तिः संभवतीति नैयायिकमतेः न्यथानुपपत्तेः प्रमाणत्वाभावादाह संशयेत्यादि अत्रान्यथानुपपत्तिर्विशेषाभावभेदाभाववत्तिसामान्याभावप्रकार
कसंशयाभावरूपा विशेषाभावभेदाभावभेदाभावव्यापकीभूतो यो विशेषाभावनिर्णयकालीनसामान्याभावप्रकारकसंशयनिष्ठकोटिता संसर्गावच्छिन्नप्रतियोगिताकाभावत्वस
तियोगित्वरूपव्यतिरेकव्याप्तिपर्यवसिता यदि सामान्याभावो विशेषाभावभिन्नो न स्यात्तदा कोटितासंसर्गेण विशेषाभावनिर्णयकालीनसामान्याभावप्रकारकसंशयवा
न्न स्यादित्याकारकविषयपरिशोधकतर्कपर्यवसिता च अन्यथानुपपत्तिश्शान्तत्रेणोभयत्वाभसंभवात् एतदुक्तौ त्रैनमेवकिमर्थमिति तु नवीनोक्तं रूपसामान्याभावो रूपत्वव्या
पकधर्मावच्छिन्नाभावभिन्नः कोटितासंबंधेन तादृशयावदभावनिर्णयकालीनतत्समानाधिकरणतत्समानधर्मितावच्छेदककरूपसामान्याभावप्रकारकसंशयादिति संशय
लिंगकानुमाने दृष्टान्ताभावेन विशेषतोन्वयव्याप्त्यसत्त्वेन यत्तत्त्वानुगमेन सामान्यतोन्वयव्याप्त्यसंभवेन च व्यतिरेकव्याप्तिमत्त्वोक्तौ नेन साध्यप्रयोजकत्वंशंकानिराकरणा
यानुकूलतर्कस्य [illegible] लौकीनेन स्वचावश्यकत्वात् अत्र सामान्यतोनुगतसंशयत्वस्य दुर्वचनतया हेतुतावच्छेदककोटौ रूपसामान्याभावप्रकारकसंशयत्वनिवेशस्यावश्यकता
सामान्येतः संशयत्वनिवे[illegible] घटघटाभावादेर्दृष्टान्तत्वसंभवेनान्वयव्याप्तिः संभवतीति ग्रंकायानोवकाशः दीधितौ प्रमाणयतीति प्रमाणमाचष्टे इत्यर्थः नन्वत्र कृदंतादाख्या
नात्कह्लुक् प्रकृतिप्रत्ययापत्तिः प्रकृतिवद्ध्वकारकमिष्यन्तुष्मासितेन कृदंतोन्तरं मत्राख्यानार्थाणिच तत्रेष्टवतोलोपः प्रकृतिपराहतिः कृदंतकारकस्यध्वंपंत प्रकृतिप्रति
याधक्रियाकारकत्तुल्यत्वमित्यर्थकेन कंसकमकवधमाचष्टे कंसघातयतीति वत्प्रकृतेक ह्लुक् प्रकृतिप्रत्ययापत्तिः प्रमापयतीत्येव प्रयोगस्य साधुत्वेन प्रमाणयतीति
चेदत्राहुः कृदंतादाख्यानादित्यत्र कृदंतपदं भावकृदंतपरं तेन प्रकृते प्रमाणमदस्य करणल्युडंतत्वेन करणकृदंततया भावकृदंतत्वाभावेन कह्लुक् प्रकृतिप्रत्ययापत्तौ र
संभवेन प्रमाणयतीति प्रयोगस्यैव साधुत्वेन तु प्रमापयतीति प्रयोगस्येति वस्तुतस्तु कृदंतादाख्यानादित्यत्राख्यानशब्दस्य कंसवधरुक्मिणीहरणादिरूपाख्यानपरतया प्रकृते
प्रमाणशब्दस्योपाख्यानत्वाभावेन कह्लुक् प्रकृतिप्रत्ययापत्तेरप्रसक्त्या प्रमापयतीति प्रयोगस्यासाधुतोपपत्तेः कृदंतशब्दस्य भावकृदंतपरत्वमास्त्विको चेमानाभावः एतेन चैत
त् अन्यथाख्यानशब्दस्याख्यानमात्रपरत्वे पाककमाचष्टे पाचयतीति रूपमतिक्रामं चष्टे अतियतीत्यादिप्रयोगानुपपत्तेः पाचयति रूपयति वाहयतीत्यादिप्रयोगापत्तेः

आख्यानशब्दश्च व्याख्यानपरस्तथा सति तस्य वैयाकरणग्रंथकलापविरोधापत्तेश्च आख्यानशब्दस्य ग्रन्थमात्रपरत्वे शब्दभिन्नेत्यंतं त्वाभावेनाप्यावर्तकतया व्याख्यानशब्दो यात्रानस्यैव वैयर्थ्यापत्ते
श्चेति मात्सर्यमपहाय सुधीभिराकलनीयमिति संक्षेपः। ननु चाव कथमन्यथेत्यादिमूलस्य मुख्यतो विशेषाभावभेदसाधकप्रमाणप्रदर्शकत्वं सहकारितया च व्यतिरेकव्याप्त्यनुकूल
तर्कप्रदर्शकत्वमिति पर्यवसितं न्याय्यं कथमन्यथेत्यादिमूलं सामान्याभावो यदि विशेषाभावाभिन्नः स्यात्तदा विशेषाभावकूटनिश्चयकालीनतत्समानधर्मिकतत्समानाधिकर
णसामान्याभावसंशयकोटिर्न स्यादित्यनुकूलतर्कस्यैव प्रदर्शकत्वेन तत्तात्पर्यकमेव न तु व्याप्तिप्रमाणप्रदर्शनेन न्यूनतापरिहेतुं तत्कृत्यस्य कथंचित्प्रमाणतात्पर्यकत्वमप्याह संश
य इति संशयस्य विशेषाभावकूटनिश्चयकालीनसामान्याभावसंशयकोटित्वस्य अन्यथा सामान्याभावस्य विशेषाभावाभिन्नत्वे अनुपपत्तिप्रसङ्गाभावापादनेन तन्मूलभूतव्यतिरेकव्या
प्तिमिति यावत् प्रमाणयति प्रमां प्रयोजकीकरोतीति तथा च तर्कमूलीभूतव्यतिरेकव्याप्तिज्ञानादेव सामान्याभावो विशेषाभावाभिन्नः विशेषाभावकूटनिश्चयकालीनतत्समानधर्मिकत
त्समानाधिकरणसंशयकोटित्वात् घटाद्यभाववदिति प्रकृतानुमानं तर्कमूलीभूतव्यतिरेकव्याप्तिज्ञानस्यैव प्रकृतानुमानोपयोग्यत्वं च व्याप्तिज्ञानात्मकत्वादिति पर्यवसितमित्या
हुः तद्विसंवादरत्वात् प्रमेयसिद्धेर्मुख्यतः प्रमाणाधीनतया पूर्वोपदर्शितरीत्या कथमन्यथेत्यादिमूलस्य मुख्यतः प्रमाणतात्पर्यकत्वकथंचित्तर्कपरत्वयोः संभवे मुख्यत
स्तर्कपरत्वकथंचित्प्रमाणपरत्वोपवर्णनानौचित्याच्च किंच संशयत्वस्याननुगततया प्रकारविशेषमनंतर्भाव्य दुर्वचतयाऽहेतुतावच्छेदककोटौ रूपसामान्याभावकोटिकसंशयत्वनि
वेशस्यावश्यकत्वेन घटाद्यभावादेर्दृष्टान्तत्वासंभवेनान्वयव्याप्तिज्ञानस्य प्रकृतानुमानोपयोगित्ववर्णनमप्यसमंजसं कथंचिदनुगतसंशयत्वनिवेशेऽपि विशेषाभावस्य दृष्टान्तत्व
संभवेनान्वयव्याप्तेरेव तर्कमूलत्वसंभवेन घटाद्यभावेऽपि विशेषाभावभेदासिद्ध्या प्रकृतानुमाने दृष्टान्तत्वासंभवेन च अर्कार्थासंगतिः स्फुटैवेति विभावनीयं तत्करणेरेवस्य दृष्टान्तावधात
व्यभिचारित्वमनन्यलभ्यत्वेन ननु रूपविशेष्यकवायुवृत्तित्वतदभावकोटिकसंशयस्य प्रसिद्ध्या वायुवृत्तित्वसामान्याभावसाधकतया प्रकृतोपयोग इति चेत् तत्राह व्याप्यव्याप्यरूपाभावेति सं
शयस्येवेति एवकारेणान्यसंशयव्यवच्छेदः अकारी सोऽप्रसिद्धरूपाभाववत्त्वादिमूलीकरणेऽपि संशयसंदर्भमेवेति वायुविशेष्यकसंशयस्य समसमयतत्वायुपरघटितवाक्येनानुल्लेखादि
ति भावः रूपवत्त्वाभावेति ननु स्वरूपाप्रकारकतया रूपाभावनिश्चयाप्रतिबध्यत्वेनैव तत्कोटेः प्रवेशे कृतानुपपत्तिप्रसंगः न च रूपवैशिष्ट्यावगाहित्वस्य रूपाभावनिश्चयप्रतिबध्यतो
वच्छेदकत्वोपगमात् दोषः इति वाच्यं तथाप्यसमवायावच्छिन्नाधेयतासंसर्गकत्वेनानिश्चयाद्रादिति चेत् तत्संबंधावच्छिन्नाधेयतया प्रतियोगित्वावच्छिन्नत्तत्संबंधात्मकतया रोगात
तस्मिन्नेतरभावान्तरनिश्चयस्येति भ्रमनिराकरणायाह तत्तदभावव्याप्तीति रूपसामान्याभाववत्त्वे। रूपसामान्याभावस्य विशेषाभावानतिरिक्तत्वे। विशेषाभावनिश्चयदशायां वायाविति

शेषः क्वचिन्नेत्येव पाठः तादृशसंशयोपि तद्रूपेण वा घटत्वनिसंशयोपि तन्नांतरीयकतया घटे भूतलवृत्तित्वतदभावान्यतरनिर्णयात्मकतानेत्यर्थः अत एव मात्रपदं प्रथमततीयमतयोरेवासरस्य

प्रदर्शनेन मध्यममतं द्वितीयतिकारसंमतमिति प्रतीयते सामान्याभावचरममतेपि व्यभिचारप्रसक्तेः। द्वितिकारसंमतं तत्र संशयैककोटिप्रकारतानियतारूपेण न मध्यममतापेक्षया गुरुत्वमिति ते न

च स्वातंत्र्येण प्रतिबंधकताकल्पनगौरवस्यैकमेवेति वाच्यं प्रकारसाधारणतद्विशिष्ट्यावगाहितया एव तदभावनिरूपप्रतिबध्यतावच्छेदकत्वेन तदभावात् प्रतिबंधकताप्रतिपा

दकग्रंथोपि तद्रूपस्य प्रतिबंधकतापर एव स्यादुः इति वाक्यस्येति तत्र भावाभावप्रतियोगिगतयो बलवत्त्वोपलक्षणत्वविशेषणत्वाभ्यां विकल्प्य चानुपपत्तेर्बोध्यमिति भावः द्वितीये प्रति

योगितदभावयोरिति यद्यपि प्रथममभावोपन्यास एवोचितस्तथैवापक्रमात् मानस्थापितत्वहेतुना प्रतियोगिप्रसक्तेः सौकर्यापत्त्यसंप्रयेनोपन्यासः यावद्विशेषाभाववहेतुक सामान्याभा

वानुमितिस्थले विशेषाभावे यावत्त्वनिर्णयस्यावश्यकत्वाद्दुर्योग्यानुपलब्ध्येति व्यापकोपांरूपत्वसामानाधिकरण्येनेति प्रसिद्धरूपेति शेषः प्रामाणिकमिति तादृशाभावनि

श्चयेपि तादृशसंभावनायां संशयासादानुभवादिति भावः मिलितघटद्वयेति एकदा चक्षुः संयुक्तघटद्वयेत्यर्थः तदा विशेषाभावकूटस्यैव चक्षुः संनिकृष्टत्वादिति भावः ननु रू

पाभावस्य प्रकृतत्वेन रूपाभावस्यैवेत्येव वक्तुमुचितमत आह अत्रेति तेन रूपेण यावद्विशेषाभावाधिकरणवृत्तित्वविशिष्टत्वरूपेण रूपसामान्यावच्छिन्नप्रतियोगिताकत्वादिति पाठ

ः रूपत्वावच्छिन्नप्रतियोगिताकत्वादिति पाठे तेन रूपेणास्य यावद्रूपविशेषाभावाधिकरणवृत्तित्वविशिष्टत्वरूपेणास्यर्थो बोध्यः स न संभवतीति भावाभावकरंबितत्वदेशाप्तेरिति शेषः

नमेव विवृणोति भावाभावकरंबितत्वमपीति तदवच्छेदेनैवेतीति यावद्विशेषाभावाधिकरणवृत्तित्वावच्छेदेनैवेत्यर्थः तादृशेति सामान्यावच्छिन्नेत्यर्थः संभवादिति अन्यथा विशेषा

भावप्रतीत्यनुपपत्तेरिति भावः तत्र सामान्यावच्छिन्नप्रतियोगिताकत्वेनावच्छेदकस्य न्यूनवृत्तित्वादिति शेषः तत्रापि विशेषाणां तस्य त्वपि संभवति चेतीति अत्र संभवति चेत्यादि अति

रिक्तत्वादित्येको ग्रंथः तथा च तादृशप्रतियोगितायाः अतिरिक्तत्वे च दूषणं च तादृशप्रतियोगितायाः अतिरिक्तत्वाभिधानं च असंभवादिति तथा च तादृशप्रतियोगितायाः अति

रिक्तत्वमनावश्यकमिति भावः अत्रेदं तु इदमपि शिष्यहितत्वार्थोक्तम् तथापि तादृशप्रतियोगिताकत्वविशिष्टाधिकरणत्वादेरतिरिक्तत्वस्यावश्यकत्वादिति न दोषः तादृश

प्रतियोगितात्वेन तादृशप्रतियोगिताकत्वविशिष्टनिरूपितसंबंधस्यैव तादृशाधिकरणतानाद्यात्मकत्वात् रूपत्वयावद्विशेषाभाववत्त्वविशिष्टाधिकरणतादेरेव तादृशाधिकरणता

दिरूपत्वसंभवात् प्रतियोगिताभेदस्याभावभेदनियामकत्वकृतो नाशंकितमित्याशंक्याह प्रतियोगितायाः इति भेदः प्रतियोगितावच्छेदकभेदं वेत्यर्थः तथ्यं विलक्षण्याच्छेदकत्वं पू

र्वमेकघटप्रतियोगिकाभावस्यैवाभेदापादनेन तत्रैवावच्छेदकभेदोपादानमुचितमित्याशयेनाह तदेतीति पूर्वकालीनेति स्वपूर्वकालीनेत्यर्थः अपरकालीनेति स्वापरकालीन

सर्व्वः अत्र तद्घटत्वादेर्ध्वंसप्रागभावप्रतियोगितावच्छेदकत्वे साधारण्यात् कालविशेषस्यावच्छेदके निवेशः प्रतियोगिविशेषणतया भासमानस्य शुद्धघटत्वादेरतिप्रसक्तत्वात् तद्घटत्वा
देरित्युक्तं नच यस्य प्रागभावस्योत्तरकालत्वं तस्यैव ध्वंसपूर्वकालत्वेनाव्यावर्त्तकतया कालविशेषस्यावच्छेदकत्वं न संभवतीति वाच्यं कालविशेषस्यैवैक्येप्यवच्छेदकताया भेदा
त् अन्यतरत्वादीतिप्रसक्तत्वं प्रतीतौ घटत्वसमवाय्यादिरूपान्यतरभेदस्य घटत्वादावसत्त्वेन घटाभावनीलघटाभावयोर्भेदानुपपत्तिरिति भावः स्वरूपमुद्भावयते तदनालोचन
विजृंभितं विलक्षणावच्छेदकताया एव भेदपदार्थत्वेनोक्तेः यत्तु उक्तक्रमेणावच्छेदकभेदः प्रदातव्याभावस्यैव नियामकस्तत आह किं चेति नवीनानामवतारणं तच्च सम्य
क् युगपदुत्पन्नविनष्टानेकनाशित्वाद्युपगमस्य विरोधात् ननु ध्वंसप्रागभावयोः प्रतीतिवैलक्षण्यमेव पूर्वकालीनत्वादेस्तत्प्रतियोगितावच्छेदकत्वे मानमत आह
तद्घटत्वस्यैवेति पूर्वकालीनत्वादेरिति ध्वंसप्रागभावयोर्भेदसिद्ध्यर्थं स्वीकार्यमाणत्वेनाभ्युपगन्तव्येरितिभावः कस्यचिदिति परमते प्रतियोग्यधिकरणयत्कालावच्छिन्नत्वेन नियमतः
प्रतीयते स कालः संबंधविधयेति तदभावस्य प्रतियोगितावच्छेदक इति नियमस्यानुभवसिद्धत्वादिति भावः पूर्वापरकालीनत्वविशिष्टघटत्वादेर्ध्वंसप्रागभावप्रतियोगि
तावच्छेदकत्वमप्युपेत्याह किं चेतीति केचित् तन्न स्वरूपभेदस्यातिरिक्तस्य च कल्पनागतिमनुरुध्यतेनातिरिक्तभेदस्याजन्यत्वेपि नासङ्गतिः प्रतियोगितावच्छेदकयोर्भेद
स्य तदवच्छिन्नाभावयोर्भेदस्य च प्रमेयत्वादौ सामानाधिकरण्यसंभवादाह अवच्छेदकस्वरूपभेदस्येति विलक्षणावच्छेदकताया एवावच्छेदकभेदपदार्थत्वादिति भा
वः अभावस्वरूपभेदस्येति अभावप्रतियोगिकाभावाधिकरणकाभावस्यानतिरिक्तत्वादिति भावः नन्वेवमप्यभावस्वरूपभेदस्यावच्छेदकनिष्ठत्वे बाधकाभाव इति वा
च्यं तावतैव पर्याप्ततया यत्र प्रतियोगितावच्छेदकयोरित्यादिकं व्यासज्यवृत्तितावच्छेदकयोर्भेदस्तत्र तदभावयोः परस्परं भेदासिद्ध्या परभावप्रतियोगितावच्छेदके परभावप्रतियोगि
तावच्छेदकभेदस्तदभावयोः परस्परं भेद इति क्रमेण यानिष्कृत्य तत्प्रतियोगिवैयधिकरण्यापाचेनात् अविरुद्धमिति व्यापकातिप्रसक्ते रहेगत्वादिति भावः अनुमाने सामा
न्याभावविशेषाभावभेदसाधकमनुमानं स्वसमनियतेतीति अयं भावः सामान्यतः स्वत्वं स्वाधावच्छिन्नाभावयोर्भेदासंभवेपि तत्तत्स्वत्वस्वाधावच्छिन्नाभावयोरभे
दलाभायत्तत्वादित्यर्थः उक्तं स्वसमनियतेत्युक्तं नच तत्तत्त्वादित्येव कुतो नोक्तमिति वाच्यं सामान्यतत्त्वस्य व्यधिकरणसाधारण्येन तावता सामानाधिकरण्यस्य किंचि
त्फलालाभात् स्वत्वादितितत्र

न्तु खादिकालेन तद्रूपावच्छिन्ने शरीरं नास्तीत्याद्यनुभवादिति भावः। तत्र तत्संख्येति। अत्र सामान्यतः तत्त्वस्य न व्यभिचारः साधारण्यं पूर्वं समानाधिकरणो

पक्रमे गगनत्वं शशविषाणत्वं रूपरसादीति तद्रूपरसादीत्यर्थः। न च रूपरसाद्यवच्छिन्नाभावयोरैक्ये रूपावच्छिन्नाभावत्वेन रसत्वेऽपि तदवच्छिन्नाभावत्वेन च

रूपत्वस्यादिति वाच्यम् वस्तुसम्बद्धविशेषणतात्वप्रसङ्ग सम्बद्धविशेषणतात्वयोर्विशिष्यरूपावच्छिन्नाभावत्वप्रकारकबोधे रूपत्वेन रसावच्छिन्नाभावत्वप्रकारकास

न्नत्वेऽपि कार्यतावच्छेदककत्वात् कारणं रूपरसपदद्वयोरर्थतो ऽभि रूपरससमूहाभावस्य समयोर्द्वित्विरित्याशयेनाह भावादिति। सामान्यतः संदेशाद्वित्त्वतदभा

वयोरवच्छेदकमेदेनैकत्र सत्त्वात् विरुद्धत्वमत आह तदवच्छिन्नदेशावृत्तित्वेनिति समनियतानामित्यनेन तत्तत्संख्याव्यापरिमाणादीनामेकत्वात्

न्नाभाव इत्यभिमतेन तत्र देशानं समनैयत्येऽपि समनियतकालसमनियतदेशानां कालतः समनैयत्येऽसमनियतदेशसमनियतकालानाम भावैक्यापत्तिरत आह स

मनियतदेशकालानामिति देशतः कालतश्च समव्याप्यानामित्यर्थः। एवमपि मूलाद्यवच्छिन्नशरीरं तरुसंयोगादीनामभावैक्यापत्तिर्वाद्यस्य समेत्यत आह स

मनियतावच्छेदकानां चेति विभिन्नावच्छेदककाभिन्नानामित्यर्थः। तेन व्याप्यवृत्तिसमनियतानामभावैक्यापत्तिः। अत एव समनियतदेशकालावच्छेदकानामि

तिनोक्तं देशकालसमनैयत्यस्यावच्छेदकसमनैयत्यस्य च प्रत्यक्षतः प्राप्त्युक्तेरौचित्यात्। रूपत्वावच्छिन्नाभावत्वादित्यादियथारूपत्वावच्छिन्नाभावत्वत्व

याभावकोटावत्वकत्वे यथा तत्परिमाणत्वावच्छिन्नाभावोऽपि तत्तत्क्रमाद्वित्त्वविशिष्टपरिमाणाभावकत्वात्मकत्वमित्यत एवैतत्तत्संख्याभावतत्परिमाणाभावयोः कथ

मैक्यमिति वाच्यं तत्तत्परिमाणत्वविशिष्टतत्संख्याभावकल्पनाद्वयाविशिष्टतत्परिमाणाभावकत्वैक्याद्वैचत्तत्संख्याभावतत्परिमाणाभावयोरैक्यसंभवात्। अत्र त

क्तौ तत्वात्तत्संख्यापरिमाणाभावयोरभा- वरूपात्मकत्वमुक्तेस्तुल्यपुत्रत्वात् द्वयाभावादीनामप्यभोक्तकूटात्मकत्वमवसेयं रूपं च रूपसामान्याभावादीनामभावकूटात्म

भा०प्र० १२९

कत्वमितितु वोध्यं । वस्तुतस्तु रूपत्वावच्छिन्नाभाववत्त्वस्य परिमाणत्वे साध्ये वह्नेः प्रसिद्धापाठ तत्र तद्रूपाभावस्य तत्परिमाणत्वावच्छिन्नाभाववादौ सत्त्वादिपदस्याप्यन्ततः शविशि
ष्टरूपाभावेकूटात्मकत्वं वोध्यं । नत्वरिमाणानाहीनीनितितत्परिमाणानास्तैाव्याहीत्यर्थः । अत्रादिनानद्रूपंनोत्तेजिवद्विपरिस्यरूत्तत्रपघपितद्रूपत्वावच्छिन्नाभावादौ त्वाद्येव
वक्तमर्हं परिमाणाभावकूटस्यैवादिपदग्राह्यत्वेस्वात्स्यात्तन्त्रयाप्युक्तरीतिरिव्याप्तत्वं स्वाभावतत्परिमाणाभावयोरैक्यवोधस्यैकपपिपस्यमुक्तमितिमंतव्यं तदेवेनेथिन्ने ।
युगपदित्यादिरत्र युगपदिति नष्टानांसमानदेशानामेकएवध्वंसः युगपदुत्पन्नानांसमानदेशानामेकएवप्रागभावइतिपोजना क्रमोत्पन्नविनष्टानांसमानदेशानामपिध्वं
सप्रागभावयोर्नैक्यंतत्कालेपितदुत्सादिप्रसंगादतो युगपदित्युक्तं । असमानदेशानां युगपदुत्पन्नविनष्टानामपिध्वंसप्रागभावयोर्नैक्यंतद्दनधीकरणेपितद्वृत्सादिप्रसंप
प्रसंगादतोसमानदेशानामित्युक्तं समनियतदेशानामितितदर्थः व्याप्यव्यापंतत्वस्यैतिध्वंसादिप्रसपैसपे । बाधकइतित्रत्रेदंवोध्यं दीधितिस्यवाधकशब्दोवाधकविशेषप
रोनतुबाधकसामान्यपरस्तथासतिक्रमोत्पन्नविनष्टानामसमानदेशानामपिध्वंसप्रागभावयोरैक्यस्यसर्वेतित्र तत्रबाधकपराहतत्वापातादित्यस्यसमानदेशानामित्यस्यचवै
यर्थ्यप्रसंगादिति । अत्रकेचिन्मल्लाग्रेसादिनोक्ताःसत्तोसादिव्याप्तिरित्युक्तौसमानपदेनविभिन्नावच्छेदकानवच्छिन्नत्वरूपसमानावच्छेदकत्वस्यपर्यनविवक्षणात् किं
तुएकाश्रिसंयोगान्यरूपरसादीनांनेकप्रागभावइत्युक्तौ ।।सत्तोतितत्रप्रागभावैक्येसकलकारणानामभेदेकार्यस्याभेदापत्तिरेववाधिकाबाधकशब्दस्येतद्बाधकविशेषपरे
त्याहुस्तदसंतत्समानपदेनसमानावच्छेदकत्वपर्यनविवक्षणोपयोजनाभावात्तत्रप्रागभावस्यैक्येप्युक्तविशेषरूपकारणभेदादेवसामग्रीभेदसंभवेनका
र्यभेदापत्तेर्बाधकत्वासंभवाच्चउज्ज्वनेवेनतत्कार्यघाप्रागभावानंगीकर्तदृणादेर्धितिकाराहीनामगतेः अतएवस्पमजस्यलेदृष्टवैलक्षण्यादेवसामग्रीभेद राम
इतिमणिकृदुक्तमपिसाध्यतइतिदिक् ठक्कुर्याश्रमावेलाघवंतत्मांदेवाथिनेत्युविकरणोनिमनिमियोगितावच्छेदकसंबंधभेदेपिनाभावभेदनियामकइत्सा १२४

स्यैव तथापि तस्य संयोगेन रूपाभावाद्यात्मकस्य न व्यतिरेकित्वमतः समानाधिकरणधर्मसंबंधावच्छिन्नाभाव ३

इत्संबंध्येति समानासमानाधिकरणौ संबंधौ इति। अत्र प्रतियोगिना संबंधेन प्रतियोगिनिष्ठा निष्ठत्वमेव संबंधे समानासमानाधिकरणत्वमिति निष्कर्षं व्याख्यायां अन्यथेति
व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधानंगीकारे तस्य समानाधिकरणधर्मसंबंधेति समानाधिकरणधर्मावच्छिन्नाभावस्यैव समानाधिकरण
संबंधावच्छिन्नाभावत्वादिति भावः। यद्यप्यसमानाधिकरणसंबंधावच्छिन्नाभावत्वमपि समानाधिकरणधर्मसंबंधावच्छिन्नाभावत्वमेवैक्यानुपपत्त्या इक व्यतिरेकित्वमपि
जैकत्वोक्त ऐक्यानुपपत्तिरिति तथा च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधानंगीकारे तस्य समानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वम् अस्
स्मैवमुक्तमसंगतं स्यान्नदंगीकारेतु संयोगेन घटत्वेन पटाभावस्य समवायेन घटत्वेन पटाभावस्य चैक्यापत्त्या न स्यादिति भावः। यद्वा अन्यथेति अभावमात्रस्यैवं रीत्यनुसरणे इत्यर्थः
इति भावः इति व्यधिकरणधर्मसादेः समुद्भितत्वे एवाभावस्य सर्वथा शेषे एवं वदितिबोध्यं। अथवा अन्यथेति व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वे इत्यर्थः। शेषं पूर्ववदिति निर्विवादतिरीत्या
न्यथेत्यादिकं एवमेव व्याख्येयं व्यधिकरणसंबंधावच्छिन्नत्वात् व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वात् प्रतिबंधादर्शेपहि सुखेनैव सामान्याभावं व्यवस्थापयितुमाह दी
धितौ एवमिति व्याख्यायां एवोक्तदोषादिति भावाभावकथित्वरूपदोषादित्यर्थः। अव्याप्यवृत्तित्वमिति अभिधेयस्य प्रमेयत्वाच्च व्याप्यवृत्तित्वेचेति पञ्चकालिकसंबंधेन गोत्वा
देरव्याप्यवृत्तित्वादिदमसंगतमिति मा भैरूक्तं तच्चिंत्यं कालिकसंबंधेन व्यतिरेकिधर्ममात्रस्यैवाव्याप्यवृत्तित्वात्। अव्याप्यवृत्तिर्नैकत्वेन दैशिकाव्याप्यवृत्तित्वस्यैवात्राभिप्रेतत्वात् दी
धितौ प्रतियोगिकत्वेति प्रतियोगिताकत्वे स एव मत्रेपि व्याख्यायां घटपटाभावादिभेदः इति दीधितौ विलुप्यतेतिः न च प्रतियोगितावच्छेदकत्वे न याकस्य मतिरिक्तः सामान्याभावसिद्धे
रिति वाच्यं विरुद्धधर्माध्यासाद् घटपटाभावादिभेदवद्विशेषसामान्याभावयोर्भेदे इत्यस्त्रतांत्रस्य यीद्द केचित्तु तादृशप्रतियोगिताकत्वविशिष्टाधिकरणत्वस्यानति
रिक्तत्वेन द्वित्व सामान्याभावधीप्रसंगस्यानुद्धारे अतिरिक्तत्वे च किं मयापराद्धमभावभेदे नेत्यत्र तात्पर्यमित्याहुः। अत एव त्यादिना उक्तस्यानतिरिक्तत्वेन तत्वाहिनाद्ये विवरणासंभ

वा ३

भमा०

१२

वाद्दृत्त्याव्याप्यसर्वमितिशब्दलभ्यंतल्लभ्ये संभवदुक्तिकमन्यदप्यभिप्रेतमित्यर्थः दोषांतरमिति अतिरिक्तसामान्याभावकल्पने प्रतियोगिस्वरूपप्रतियोगितायाः सामान्यवि
शेषधर्मद्वयावच्छिन्नत्वे विशेषवत्यपि सामान्याभाववत्त्वप्रसंगेनातिरिक्तप्रतियोगिताकल्पनस्यावश्यकत्तया प्रदर्शितंकिमपरादुमित्याशंकदोषासंभवादित्याशयः युगपदिति द्वि
पक्षेनिकर्षेसुपपाद्यतामिलितेतितिनात्मेवतिअत्रतुभवानुरोधेन साधिकरणाभावविषयताया एवसोनिकर्षजन्यतावच्छेदकत्वोपगमादितिभावः अत्र इनितनतादृशधीरित्यने
नान्वयः विशेषणतापार्श्वेनिरवकाशेरणाएकाधिकरणावच्छिन्नत्वांतर्भावेवव्यवच्छेदहेतुत्वादितिभावः तादृशधीरित्यनेनान्वितंतत्त्वव्यवच्छेदेनविशेषणतायाहेतुत्वएवतादृशधी
प्रसंगासंभवादितिभावः तादृशधीरितिनिरधिकरणाभावलौकिकधीरित्यर्थः घटरूपाभाववान्नित्यादिसाधिकरणाभावप्रतीतेरपिघटरूपत्वावच्छिन्नप्रतियोगिताकस
विशिष्टाधिकरणत्वाभावादेवासंभवादित्याशयः अत्र घटरूपत्वावच्छिन्नप्रतियोगिताकाभावस्याधिकरणामिश्रितभावधीप्रसंगोदुष्परिहरएवेतिनतच्छंकापु
रोगुणोत्पत्त्यभावोनास्तीसाद्विधीवारणायावच्छेदकत्वावगाहिधीपोसंनिकर्षजन्यतावच्छेदकत्वमंगीकृत्यतदनवगाहिधीपोनंगीकारणतादृशप्रतियोगिताकत्व
घटत्वेनित्वसामानाधिकरण्यमात्रावगाहिधीपोऽसंभवात्तत्त्रिष्ठाधिकरणानिरूपकत्वावच्छेदकस्यैवतद्घटितावच्छेदकत्वेतादृशप्रतियोगिताकत्वस्यघटत्वत्वतान
वच्छेदकत्तयावच्छेदकत्वावगाहित्यात्र अप्यसंभवात्संबंधविषयेतिसंख्यात्वे सहितत्यादेसंयोगेमनैकार्थसमवायस्यद्वित्वादिरूपैकार्थघटितत्वादित्वादेसंबंधविषयाभा
वादितिभावः व्यासज्यवृत्तित्वेतिगुणत्वादिनाद्वित्वादिप्रकारकप्रत्यक्षेव्यभिचारवारणायाघेप्रकारकांतसंबंधविषयोद्वित्वप्रत्यक्षेसंबंधतावच्छेदकोद्वित्वत्वप्रकारकेद्वि
त्वत्वावच्छिन्नविशेष्यकेचतद्वारणायद्वितीयप्रकारकांतप्रत्यक्षविशेषणतायाधीः घटेरूपनास्तीतिधीः संबंधविषयीतत्प्रतिमितिद्वयमुपलक्षणाद्वित्वत्वावच्छि
न्नविशेष्यकाभानमपिद्रष्टव्यंव्यासज्यवृत्तितावच्छेदकत्वप्रकारकत्वमितिपाठः व्यासज्यवृत्तितावच्छेदकत्वस्फुटितंप्रकारकत्वंतदर्थः मध्यमपदलोपिसमासात्प्रकारकत्वं

राम०

१२

वच्छपमपित पाचव्यासज्यवृत्तिधर्मेलौ किंकप्रत्यक्षत्वमात्रं कार्यतावच्छेदकं पर्यवस्यति मिथ्येत्वस्य न्यपाठेपि सएवार्थः अन्यथा किंछेरिति पत्किं च विशाकप्रज्ञानेपि पाव
हाग्रपसनिकर्षसत्वे व्यासज्यवृत्तिप्रत्यक्षस्य सत्वादिति भावः इदं च पश्चाप्यक्ततामिप्रायेणान्ये पाचं दाग्रपलौ किंकप्रत्यक्षहेतुत्वस्य च समानत्वादिति ध्येयं लौ किंक
प्रत्यक्षाभिप्रायेणालौ किंकप्रत्यक्षहेतुत्वाभिप्रायेणाक धियादितिसामान्यतस्तद्विशेष्यकज्ञानस्य हेतुत्वे मानाभावपर्यवसानमतरुं लौ किंकप्रत्यक्षस्य च हेतुतापर्यव
तात्पर्योपवर्णनेन तु नव्यातिरेकलाभावव्याचष्टे तेहेतौ किंके तिमेव ज्ञानव्यतिरेकलाभावव्याचष्टे तत्र इन्द्रियेति धूमोग्रहणादिति घटकपालादौ रमेरे भ्रमेत तु नक
त्वापस्यमेद्य इन्द्रियसनिवेधकत्वमात्रमभावेनैव इन्द्रियस्य सनुदृष्ट्यादित्तिभावः इत्वभ्रमेति अनुमानमानस्य याभिप्रायेणोक्त अन्यस्थले किंकत्वासमवायिति
ध्येयं तत्र रूपाभावत्वादिनात्तत्तद्रूपत्वावच्छिन्नाभावत्वादिना व्यभिचारवारणायोपजन्यतावच्छेदककोटिगवव्यवच्छेदितोत्तत्त्वादिविशेषणादिवादाद तत्राद्देत्वदि
मत्वेनैकस्यैवतियत्वेनैकस्यापि तत्तत्स्याभावस्य रूपतालौ किंकनिविषयवाक्येषु सामान्यरूपेणाभावेयो गितानेन्द्रियसंनिकर्षरूपनियामकसत्वेनतद्विषय
तापास्त्वाद्विषयकत्वादितितत्र रूपेणासंस्तु मित्याद्देशाव धिक्तिविषयताकत्वनमपेक्षणको भावविषयत्वलाघवात् नेचतत्रापि पूर्ववादिमेन रूपत्वावा
च्छिन्नप्रतियोगिताकत्वेन पत्किं चिद्भावोस्तु मिति विषयइति वाच्यं व्यापकतावच्छेदकरूपत्वावच्छिन्नप्रतियोगिताकत्वेन तु पावदभावानां विषयत्वेन पातु
मितौ विनिगमनाविरहेण तावद्विषयताकत्वेनैव गौरवस्य दुष्परिहरत्वात् तुल्यत्वमितिपर्वपत्तिमतेः भावरूपस्य कारणत्वे गौरवमिति भावः पुतु एवंप
क्षिमतेपि कारणतावच्छेदककोटिप्रवेशापेक्षया तत्रवातिरिक्तसामान्याभावस्य तद्घटितत्वेन कारणत्वेन्य एवं सामानाधिकरण्यावच्छिन्नप्रतियोगिताकत्वविशिष्टा
भावत्वेनानन्ताभावानां हेतुत्वे पूर्वपक्षिमतेकारणतावच्छेदकेगौरवमिति वाच्यमभावनिष्ठत्वजातित्वस्यैवाव्याप्तिसिद्धिनिरूपकतावच्छेदकेनेनरूपेणाभा

३

तावच्छेदकैक्येऽपि बहुषु कारणताकल्पनागौरवस्य दुष्परिहरत्वात् तथात्वे एवं सति फलोपधायकदंडघट्यतमत्वेन कारण

भा॰प्रा॰

१२६

बहेतुतापासिद्धान्तविरुद्धत्वात् अन्यथा घव्यवहितपूर्ववर्तित्वाभिन्नाभावस्य तत्तघक्तित्वेन हेतुत्वे गौरवाभावाद्दंडत्वादिना हेतुतायामपि विलयापत्तेरिति मन्तुच्छेदका
रणत्वापेक्षया स्वरूपस्य दंडादिषु बहुषु कारणतो कल्पनागौरवेण दंडत्वादिना हेतुतापि विलोपापत्तिरिति तन्मेलं अन्यमत्वस्यासंघप्यन्यथासिद्धिनिरूपकत्वाच्छेद
कतया कारणतानवच्छेदकत्वात् अत एव प्रतियोगिविशेषितत्वाभावस्यावच्छेदकत्वं नास्तीति नियमः अन्यथा प्रागभावाधिकरणत्वस्यान्यतमत्वेन हेतुत्वकल्पनेऽनन्त
प्राक्केवैं जात्यस्पृष्टाकल्पनेनेत्युक्तं भिन्नेति न घास्यात् भिन्नत्वाक्तनियमेन्यतमत्वेन हेतुतायामन्यथासिद्धिमूलकदस्युक्तं दिशितिदिशोर्भिन्नव्यापकाभावेन व्याप्याभाव
नुमानस्य सर्वसिद्धत्वापत्तेः व्याप्यव्यापकाभाववत्तापरामर्शो दूषणघभावानुमितिनिष्ठाभावस्यैकत्वे लाघवमित्यादिलाघवज्ञानसहकारेणातिरिक्तैकसामान्या
भावसिद्धिर्दुर्वारस्वाद्विनिकर्न्सिद्धिवत् एवं मेदसिद्धित्वाभाववदभावस्यापीत्युक्तं दिशामिलितघटद्वयवृत्तित्वत्वाभावादिरूपविरुद्धधर्माध्यासाद्विशेषाभावाति
रिक्तरूपसामान्याभावादिसिद्धिरेव स्यादेकोऽपि न तु अतिरिक्तसामान्याभावकल्पनेन तद्भेदादीनां नियतंतन्नमेयमित्यादिनानाविषयतानां घयादिभेदादिसिद्धेर्धकल्पने
गौरवान्नातिरिक्तसामान्याभावोऽप्यारोपयुक्तइति केचित् तद्युक्तं तत्र सम्यक् एवं सत्यधिकरणातिरिक्ताभावकल्पनेऽप्युक्तरीत्या गौरवसंभवेनाविशेषाभावस्याप्यसिद्धापत्तेः
विवादग्रस्तपदार्थानां युक्तिभिः सिद्धत्वात् नेत्यर्थ विरुद्धधर्माध्यासादिसुक्तिभिस्तत्सिद्धौ प्रामाणिकत्वयोक्तगौरवं न दोषायेति चेत्संभवन्ते पीतिसंदेहव्यासज्यवृत्तित्वे
पयासिविशेषस्य रूपं एषमघ्ये पिलाघवमिति लाघवमिसुक्तं न तु सिद्धान्तिमतेन पाचेत्यादिना भासेत्को मयकल्पनागौरवसहेनैकपविनिगमनाभावदूसतत्राह
त्वेपेति अनन्तप्रतियोगिताना शिविशेषाभावप्रतियोगितानां प्रतियोगिताकत्वस्य प्रतियोगितापा तत्कल्पनेविशेषाभावे एक प्रतियोगिताकल्पनेविनिगम
कामिति सिद्धान्तिमततिरिक्ताभावस्य धर्मित्वेनतत्कल्पनाप्यागुरुत्वादिविभावः तत्रेवति अन्यथा सर्वैषैव धर्मित्वात् अस्यापक्षेवासंभवदुक्तिकतापत्तेरितिभावः अत्र संसामा

राम॰

१२७

न्यावच्छिन्नत्वं अतिरिक्ताभावहन्स्यानंताधिकरणवृत्तित्वं चेति त्रयं द्वयं अतिरिक्तप्रतियोगितासामान्यावच्छिन्नत्वं चेति द्वयं तन्नीयस्य त्वमाह अनंतेति नचानं
तविशेषाभावेषु सामान्यावच्छिन्नप्रतियोगिताकत्वस्य पर्याप्तिरूपः संबंधः घटत्वमाकल्प्य इति तुल्यमिति वाच्यं विशेषाभावकूटस्य तद्वृत्तित्वे क्लृप्तस्य च सामान्याभावत्वाधिक
रणत्वकल्पनेन तत्वाधिकरणाधिक्यकल्पनात् प्रतिबंदेरसुलभत्वात् हेतुवृक्षत्वेनेति चोधितायोरुरिति अनंतव्यक्तिकल्पनापेक्षेत्यर्थः फलमुखगौरवस्यापि दोषत्वमेवेत्यस्य
रसो बोध्य इति मन्ता एवंविरचितैर्भवानेदी प्रकाशसामान्याभावप्रकाश॥ इदं अन्वय पृथिवीत्वादि साध्ये एकव्यक्तिसाध्यकेऽव्याप्यसत्त्वएवतत्त्वावच्छेदकतत्यसाध्येनानाव्यक्तिके
निवेशसार्थक्यं तदेव नात्र अपि विशिष्टाभावादिकमादाय व्याप्तिसत्त्वादिति न हेय पूर्वमन अद्दूसाध्यस्यैकत्व इति विशिष्टाभावादिनेति कार इति आदिनोभयाभा
वपरिग्रहः रूपवान् रसादित्यादौ नानाव्यक्तिहेतुकेऽव्याप्यसत्त्वएवतत्त्वावच्छेदेनायहेतावेकव्यक्तिकत्वं निवेशयन्देवनतत्रापि चातन्नीत्ययेमव्याप्तिसत्त्वादित्यत आ
ह हेतोरपीति इति मिश्रा आदिविशेषसमानाधिकरणापोरेव व्याप्तिरिति मिश्राः नरीत्यापत्ते त्रनवीनैरुक्तां दीधितौ अव्याप्तेस्तत्त्वं यथाश्रुतप्रतियोगित्वे घाधिकरण्यनि
वेशेपीति परणीय अव्याप्यासर्वत्रैव विशिष्टाभावोभयाभावादिकमादायैतद्रूपवानेतद्रसादित्यादावपि खंडशः प्रसिद्धोभयाभावघटितप्रतियोगितावच्छेदकावच्छि
न्नत्वे यदधिकरणाप्रपैतद्रूपाकाशोभयत्वावच्छिन्नाभावमादाय लक्षणगमनेनासंभवे संभवेनाव्याप्तेरसारत्यापत्तेरिति तदसमंजसं विशिष्टाभावोभयाभावादेरत
गीकाराभिप्रायेण पूर्णे विनैवोपपत्तौ तत्स्वरूपप्रयोजनाभावात् पत्ररूपस्य निरुक्तत्वपायादन्यदोसाध्यपरं यावद्विशेषनदेकत्वादेः साध्यतावच्छेदकत्वमपिपू
र्वोक्तमसंगतं स्यात् साधनादिति भावः सर्वत्रैवाविशिष्टाभावेति इदं च पर्याप्तं भवं बोध्यं तेनैव द्रव्यादिसाध्यके समानाधिकरणयोरेव व्याप्तिरिति पक्षे रतद्रूपादिसा
ध्यकेचविशिष्टाभावमादाय लक्षणगमनासंभवे पि न दूनिः दित्वा वच्छिन्नेति अत्र विशिष्टाभावप्रतियोगितापि व्यासज्यवृत्ति विशिष्टोभयाभावादेस

मशीलत्वपैकशेषस्य दुष्करत्वात् तथा च सत्त्वादिसाध्यकाव्याप्तिरप्रसंगात् इति नुन्नशंकं विशेषणस्य प्रतियोगितायां तु ह्येवेनाविशिष्टाभावप्रतियोगितायां व्यासज्य
वृत्तित्वस्यासंभवात् एतद्रूपवान् विनिपत्तपिवह्निमान् धूमादित्यत्रैव स्यपि वृत्तेः शक्यं तत्पाप्यैकव्याप्तिकत्वेन सत्त्वादिसाध्यकस्य जातीयत्वेनानारोपितान्यो
यैनेदमेवोक्तं प्रतियोगिव्यधिकरणेति उभयाभाववद्घटितप्रतियोगिवैयधिकरण्यानपेक्षणात् अभावेतिततद्रूपावच्छिन्नोभयाभावेऽस्य विशिष्टप्रतियो
गिकत्वशनिविशेष्यविशेषणयोः संबंधस्यैव तदभावात्मकविशिष्टाभावप्रतियोगित्वादिति भावः काश्चित्तु मतान्तरे विशिष्टसाध्यके व्यभिचारिणि विशेष्यविशेष
णसंबंधस्यैवसध्यतयानुपदेवस्य मौरीत्या अतिप्रसंगासंगतिरेवास्वरससाध्यत्वेपरमितित्वन्त्रचनातिप्रसंगः साध्यस्य हेतुसमानाधिकरणाभावप्रतियोगित्वादित्यभि
वेऽप्यतिरिक्तमेवत्वमतिरिक्तमितिमतभंगीकृत्यैवैतत् ह्येतद्गुणमित्यपेक्षे उभयाभावप्रतियोगिताया व्यासज्यवृत्तित्वेनासंभव इत्यत आह अत्रचेति प्रतियोगि
ताऽभयाभावप्रतियोगिताकविशिष्टपर्यवसानं अन्यत्वाघटवत्त्वेन धूमादौ वह्निसमानाधिकरणाभावप्रतियोगित्वाभावसत्त्वाद् मवान्तरवन्नेरित्यादावतिव्याप्तेस्स
दसिद्धिरितो सचेति व्याख्यायाः सत्त्वव्यवच्छेदापत्तिन्नत्वेन ज्ञानरूपप्रतिबंधकसत्त्वेनरूपत्वावच्छेदेन तादृशप्रतियोगित्वज्ञानासंभवादिति भावः तथाचेति
तेषां च रूपवान्यथिवीत्वादित्यादावव्याप्तिस्तु दृढैवेति भावः नत्वेनातिरिक्ते नित्यत्वपायादेरेकपिसंयोगाद्यभावानतिरिक्तवृत्तित्वरूपावच्छेदकत्वपदे कपिसं
योगादिस्वरूपसंबंधरूपपावच्छेदकत्वमस्त्वनुपपत्तिरिति भावः वाधिकारूपत्वस्वरूपसंबंधरूपावच्छेदकत्वावगाहिज्ञानादृशप्रतियोगित्वाभावग्रहेऽप्यधि
करणतादौ नित्यत्वादिनाकारणत्वपारिग्रहः सामानाधिकरण्यप्रतियोगितावच्छेदक इति इदंचाग्रे तद्रूपावच्छिन्नसामानाधिकरण्यमित्यस्यावच्छिन्नत्वावि
शिष्टत्वमात्रमित्याशयेन क्वचित्त्वेएव वृत्तिमत्त्वस्य पावच्छिन्नसामानाधिकरण्यमित्यस्यैव तद्रूपावच्छिन्नप्रतियोगिताकसामानाधिकरणम

गा

येविधूमः हेत्वमपि सामानाधिकरण्यप्रतियोगितानिरूपितत्वमपि प्रत्यवच्छेदकत्वस्वरूपसंबंधरूपावच्छेदकत्वे अन्यूनवृत्तित्वं तत्त्वमनियतत्वं क्वचित्तु पेवयाः
अनवच्छेदकत्वात् सामानाधिकरण्यप्रतियोगितानवच्छेदकत्वात् दोषितोऽनवच्छिन्नत्वात् यात्रितत्वाच्च एतत्समनियतो कालघुधर्म इत्यपि गुरुधर्मेऽपि तदवच्छे
दकस्य तदभावावच्छेदकत्वमिति व्याप्तिशरीरमिति भावः ननु पारिभाषिकस्य प्रतियोगित्वाभावावच्छेदकत्वस्य निवेशात् केवलग्रीवादिमत्वादिना घटादेः सा
ध्यतापन्नत्वस्य तत्र आह व्याख्यायां तत्र चेति इत्युक्तौ विसर्गेण तेनान्वयः तत्र व्याप्तिवारणाय मये सर्वथा यद्यद्येति यद्रूपपदसाध्यतावच्छेदकमपरं तदवच्छिन्ने
तिन्नरूपावच्छिन्ने तत्र इत्युक्तौ विनिवेशाच्च केवलग्रीवादिमत्वादिना घटादेः साध्यतायां यद्रूपपदेन केवलग्रीवादिमत्वादेरूपादानेऽसंभवात् तद्रूपासमञ्च प्रवेश इति
भावः स्यादित्याह इतीत्यादिना धूमवान् वह्नेरित्यादेः संग्रहे आदित्यापत्तिरिति तत्र यद्रूपपदेनोपधक्षत्वादेरूपादानसंभवात् हेतुव्यापकतावच्छेदकेषु वह्नित्वा
देरवतोरशप्रतियोगितावच्छेदकत्वेन तन्मात्रापत्तेरुक्तासमन्वयपक्षे सत्त्वाद्दित्याशयः अत्र प्रागल्भ्ये मतानुपादिहेतुमन्निष्ठाभावप्रतियोगितावच्छे
दकेषु विशिष्टसंबंधेन निष्ठाभावप्रतियोगित्वाभावावच्छेदकं तद्भिन्नधर्मवत्त्वासामानाधिकरण्यव्याप्तिरित्येतन्मते निष्कर्षे तत्र कोऽप्युक्तदोषः प्रतियोगितावच्छे
विशिष्यायापत्तस्माकं कृत्स्नत्वे हेतुतानिरूपितावच्छेदकत्वं विना हेतुवह्निमान् धूमादित्यादौ धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकस्य वह्नित्वादे
र्वह्नित्वादिविशिष्टसंबंधिनिष्ठत्वे तद्धूमाभावप्रतियोगित्वाभावावच्छेदकत्वेन वह्नित्वादेः पारिभाषिकावच्छेदकत्वापत्तावसंभवः स्यादिति निष्कृष्टपादानेनैवं स
निष्पारिभाषिकावच्छेदकाप्रसिद्धेः पृथक् अभावप्रतियोगित्वाभावस्य घटादौ व्याप्यवृत्तितयावच्छेदकानपेक्षणादिति चोक्ते सिद्धेर्निष्प्रतियोगितायाव्या
प्यवृत्तितयावच्छेदकानपेक्षणे प्रसंगात् प्रतियोगित्वतदभावयोरवच्छेदकत्वे विशेषाभावात् अन्यतरत्वप्रतियोगित्वाभावश्चेत् तत्राप्यवच्छेदक

नि

मित्युक्तं दीधितिकारेणेति प्राञ्चः। ग्रन्थसंदर्भ इति। तद्रूपेण समानाधिकरणयोरेव व्याप्तिरिति मूलस्य कृताभिधानादुक्तरीत्या भेद एव तत्तात्पर्यादिति भावः। विशेष
साध्यसामानाधिकरण्यमिति। नचैवमुदाहरणस्य व्याप्तिप्रदर्शकत्वानुपपत्तिः यत्र धर्मे हेतुतावाकोऽपि तायाविशेषव्याप्तेस्तेनाप्रदर्शनादिति वाच्यं तेन रूपेण
शे धूलीपटलाद्यंशे न हूंमोंशे धूमत्वाद्यंशे निर्विकल्पेति द्वयमाशयः चकारांशेपि लौकिकत्वस्यापेक्षणाधूलीपटलादौ धूमत्वादिविषयमानेनतज्ज्ञायमानस्य धूमादेस्त्वाद्यका
रकत्वाक्षुषादेः धूमधूमत्वाद्यंशे त्वलौकिकस्य धूलीपटलाद्यंशे लौकिकस्य निर्विकल्पधूमादिविषयत्वमनुपपन्नं तत्र धूमत्वाद्यंशे त्वलौकिकत्वयात्तत्र वेत्तद्दशलौकि
कत्वाक्षुषादिसाम्यमभावात् विशेष्यांशे एव लौकिकत्वापेक्षणात् च विशेष्यधूलीपटलाद्यंशे तादृशाभावाप्यसत्त्वात् तदुपपन्नमिति मात्रव्यक्तमात्रतीसेवानीति प्रसंगे
त्वात्तेत्रैतादृशसाम्याहेतुत्वमफलमित्याशयेनाहवक्तव्यमिति संयोगेति अत्र संयोगप्रमुख्यविशेष्यकज्ञानजनकत्वस्य लौकिकसंनिकर्षत्वप्रयोजकमुख्यविशे
ष्यता निरूपितनिरवच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यताशालिज्ञानजनकत्वस्यैवार्थः तेन च क्षुरादेः संयोगमुख्यविशेष्यकज्ञानजनकत्वेप्यभेदसमुख्यविशे
ष्यत्वेप्यनपायितन्मात्रमुख्यविशेष्यकज्ञानजनकत्वेचूर्णस्मिंहूंद्र्यमित्यादिज्ञानेपरमाणवादेरपितथात्वादितिहूचरणानवकाशः चाक्षुषज्ञानवारणाय तादृशज्ञान
स्याक्षुषत्वव्यारणायनादृशज्ञानेमानसांघवमनुव्यवसायमित्यत्र निपामकलाभायेति पावन ह्येतुतावाध्येति निरवच्छिन्नसंसर्गत्वादिनिष्ठप्रकारतानिरूपितमुख्य
विशेष्यतासंबंधेन चाक्षुषादिकं प्रति चक्षुरादेर्लौकिकसंनिकर्षस्य समानाधिकरण्याघ्रीयमुख्यविशेष्यतानिरूपितसंसर्गतादिनिष्ठनिरवच्छिन्नप्रकारतानि
रूपितमुख्यविशेष्यतासंबंधेन हेतुत्वं एवंसारच्छिन्नप्रकारतास्थलेप्रकारतावच्छेदकमात्रायहेतुत्वं विशेष्यतादिकं च व्यापारसंबंधितपात्यंतेन संसर्गत्वे नसोरभ

मुख्यविशेष्यकत्वाश्रयत्वाप्रसिद्ध्या सोऽभ्रान्तोविशिष्टलौकिकत्वाश्रयत्वसामान्यप्रसिद्ध्यावत्सोऽभ्रान्तेनेत्यारम्भवाक्यसंततनलयकल्पितास्तेषां नव्यकथाः श्रुतीनां प्रसंगे रूपाभिवंद
भिन्नानिद्रियाश्रयत्वसमकत्वसंभावादिविषयकत्वाभावसंभवे हेतुमाथानलौकिकत्वस्येति लौकिकत्वं निवेश्यतादृशबोधसामग्र्याः स्वातंत्र्येणानहेतुतेत्यर्थः चनतिप्रसंगेन
वोपपादयतिमुख्यभिचंद्रनामितिसंभवात्संभवयुक्तिफलात्तत्रैनसंभवतिउक्तसामग्रीरूपकारणाभावादितिभावः सोऽभ्रान्तविशिष्टलौकिकत्वाश्रयत्वसामग्रीसोऽभ्रान्त
घटेनोक्तसंबंधेनचक्षुस्संयोगादिरूपसामग्रीतादृशः वाच्यः तत्राश्रयत्वघातचूर्णघटेनोक्तसंबंधेनचाक्षुषत्वाप्रसिद्ध्या तादृशेनेति तद्धर्मघटेनोक्तसंबंधेनचक्षुरादितेयोग
सकारणतावच्छेदकत्वादित्यर्थः तद्धर्मवद्धर्मविशेष्यकेतितद्धर्मवन्मुख्यविशेष्यकेत्यर्थः एवमग्रेपि चाक्षुषलौकिकेतितद्धर्मस्यानोद्दिपत्वाद्वलौकिकत्वाश्रयत्वसामग्र्यादित्यर्थः नतु
नामाघाश्रयसिद्धिः तद्धर्मोश्रयचक्षुस्संयोगे च चाक्षुषसामग्रीकालेतद्विशेषणतानियामकाभावकाले च तन्मुख्यविशेष्यकचाक्षुषप्रत्यक्षसामान्यतन्त्वाहृदितीतितादृशो
नोऽद्रियधर्मोश्रयमुख्यविशेष्यकत्वस्य विरोधिचाक्षुषादिसामग्र्यभावो हेतुः तन्मुख्यविशेष्यकत्वसंबंधमानसमेव वासिद्धमितितादृशचाक्षुषसामग्रीकालेतादृश
मानसवारणायतत्र तादृशचाक्षुषसामग्र्यभावस्य हेतुत्वे पक्षे समंतर्भाव्येव तद्धेतुत्वकल्पनादेषाक्षापत्तिवारणमितिन कोपि दोष इति भावः पूर्वमते स्वरसमाह
दोषितोऽमुन्नेवेति अथ तन्मसद्दितस्य विशेष्यत्वेनिर्णयाप्यायाव्यापाद्यतिपन्नेपद्दितिपतिपत्तिस्सोऽद्यमिन्मानसिस्थरत्वादुपपद्यते आपाद्यत्वादितिवाच्यं मतद्दस्मादिर्दे
भिन्नोऽन्तस्वेचेतिन्यायाच तद्धर्मवत्त्वप्रकारकतद्धर्मोश्रयविशेष्यकप्रत्यक्षत्वेन हेतुत्वधर्मोपकारकतल्लौकिकसन्निकर्षजन्यतद्विषयकप्रत्यक्षत्वयोः कार्यतावच्छेदकयोर्भेदात्
वत्तयोर्भेद इतिभावः ज्ञानलक्षणायाः प्रत्यासत्तित्वे मानमाह अत्र एवेति व्याख्यापाततद्धूनासंभवादिति न च सोऽभ्रान्तत्वज्ञानात्मकसामान्यलक्षणाजन्यतावच्छेदककोटौ सोऽभ
त्वप्रकारतायाश्चापि निविष्टत्वपाल्सोऽभ्रान्तत्वसामान्यलक्षणातएव सोऽभ्रान्तत्वभानं संभवत्येवेति वाच्यं सामान्यज्ञानस्य स्वविषयसामान्याश्रयत्वसंबंधेनैव हेतुतया सोऽभ

भा॰

सामानाधिकरण्यघटितेन तद्घटितत्वमर्थः द्विविधाभावानामित्यत्र प्रतियोग्यसामानाधिकरण्यघटितत्वाघटितत्वाव्यभिचारिणोऽनवच्छेदकमित्यत्रासंगतामान्याभावेति
वच्छाधेयत्वेन चातुर्विध्यमिति न बहुवचनानुपपत्तिरिति ध्येयं ज्ञानमेवेति एवकारेण विषयत्वव्यवच्छेदः नन्वित्यादि हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदक
त्वंतु हेत्वर्थः प्रतियोगितावच्छेदकत्वादीति हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहत्वस्य प्रतिबध्यतावच्छेदकत्वादीति भावः व्याप्तिप्रसंग इति
तादृशज्ञानस्य वह्नित्वविशेष्यकधूमप्रकारकग्रहत्वावच्छिन्नप्रतिविरोधित्वादिति भावः घटकीभूतेति घटकत्वं च भेदाभेदसाधारणं तेन प्रतियोग्यसामानाधिक
रण्यघटितानवच्छेदकत्वग्रहस्य ग्रहः विषयितावच्छिन्नेति तादृशविषयिताशालिग्रहत्वपर्याप्तावच्छेदकताकेत्यर्थः तेन हेतुसमानाधिकरणवृत्त्यभावेतराभा
वप्रतियोगितावच्छेदकत्वस्यावच्छिन्नविषयकत्वग्रहस्यावच्छिन्नप्रतिबध्यतापर्याप्त्यधिकरणत्वसमापन्नतादृशविषयितावच्छिन्नप्रतियोगिताकप्रतिबंधकतामादायन
तादृशानवच्छेदकत्वग्रहे प्रतिप्रसंगः न चात्र तादृशपर्याप्तवह्नित्वविषयिताया घटाभाववद्ध्रदत्वमिति ज्ञाने प्रतिबध्यतावच्छेदककोटिप्रविष्टत्वेन तादृशज्ञानानां प्रतिप्रसंग
तादृशव्यभिचारिविरोधित्वस्यैव विरोधितावच्छेदकताया पर्याप्त्यधिकरणधर्मवत्त्वस्य सत्त्वे तेनैव विरोधित्वस्य विरोधितावच्छेदकधर्मवत्त्वरूपत्वात् तादृशज्ञानत्वमादायनातिप्रसं
गः वह्नित्वविशिष्टतादृशविषयिताघटितत्वाक्रमणधर्मवत्त्वसंबंधेन तादृशग्रहत्वमेवानुगमकं तेन प्रतिबध्यताविरोधितयोरवच्छेदकभेदेन नाभावालोपेनानुगमानुपपत्ति
संबंधानवगमस्यादोषत्वादिति ध्येयं वह्नित्वविशेष्यकत्वं वह्नित्वविशेष्यकग्रहत्वं घटितत्वस्य वह्नित्वविशेषणत्वस्य मनिरासामाहुसामानाधिकरण्यघटितेनेति नो सो घटितेनातो

भा० प्र०
२०९

ति नीलघटवदित्यर्थः नीलं नास्तीति यत्र नीलं नास्तीति ज्ञानस्य नीलत्वविशिष्टप्रकारकज्ञान एव स्वतो विरोधित्वं नीलघटवदित्यत्र तन्नास्तित्वप्रतिबध्यतावच्छेदकाभावात्
अत एव भूतलं नीलघटवदिति ज्ञानेऽपि नीलघटत्वेत्यादिः संशयानुभूयमानकदाचिद्विह्निभक्त्याचनैकदेशेन ग्रहादेवीतरहर्षणाभ्रावनं तत्र समस्तविरोधितयोक्तस
नीलं नास्तीति ज्ञानस्य नीलत्वेन घटविषयकत्वं न तु स्वविषयकत्वमिति तत्त्वातिप्रतिबध्यतावच्छेदकस्य नीलत्वावच्छिन्नप्रकारताशालिज्ञानत्वस्याधिकत्वमिति नाप
न नीलघटवदिति ज्ञानेऽपि सत्त्वात् अन्यथा घटो नास्तीति ज्ञानप्रतिबध्यतावच्छेदकस्यापि तत्साधारण्यानुपपत्तेः अत एवैतस्यादिकमपि मन्दं तादृशाभावस्यैवासिद्धेः दी
धितौ तत्तादृशबाधानुदयस्वरूपकसहेतौ इति अत्र पक्षमर्थे षष्ठी षष्ठीहेतुप्रयोगात्तत्र तु शासनात् तथा चात्र सहेतौ प्रतीतत्वाचात्र हेतौ इति वत्कस्मात् हेतौ इति स
र्थकोऽपि तादृशहेतुप्रयुक्तमित्यर्थः कुतः तादृशविरोधित्वप्रयुक्तमिति यावत् विरोधितावच्छेदकत्वेन गौरवादिति भावः व्याख्यायां प्रापयितुमिति अन्यथा तत्तदभावावच्छिन्नतदवच्छे
दकताकाभावबुद्धेः तत्साहचर्यान्तरोपन्नतद्विशिष्टं तद्बुद्धौ वृद्धत्वाद्दानायत्तैर इति भावः दीधितौ विरोधित्वादिति अत्र आकृतपञ्चमं तद्धेतौ इति तेनात्रापि पक्षत्रविरोधित्वा
दिति पञ्चमीविभाषया हेतुप्रयोगे इत्यनेन पञ्चम्या एव साधुत्वादिति केचित्तदुक्तं तत्र निमित्तपर्यायप्रयोगे सर्वासां विभक्तीनां प्रायदर्शनमिति वार्तिकेन पञ्चम्या अपि साधु
त्वात् वस्तुतो विरोधित्वादित्यस्येति पाठेनान्वितेन न सम्बन्धाहृतहेतौ तत्र नेत्तेनोक्तदोषः तादृशविरोधित्वप्रयुक्तं तदित्यर्थः घटत्वविशिष्टतद्बुद्धौ घटत्वविशिष्टप्रतियो
गिमत्तां अयमाशयः घटत्वावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नं प्रति घटत्वावच्छिन्नाभाववत्ताज्ञानस्य विरोधितायाः कृततया तत्प्रतिबध्यतावच्छेदकसाधिके

राम
२०९

भा॰

सामानाधिकरण्यघटितत्वतद्घटितत्वमर्थः द्विविधाभावानामित्यत्र प्रतियोग्यसामानाधिकरण्यघटितत्वाघटितत्वाव्यभिचारयोरवच्छेदकमित्यत्रातस्तत्सामान्याभावेति
वक्ष्यमाणेत्यनेनवानुविधास्यतिनवद्बहुवचनानुपपत्तिरितिध्येयं ज्ञानमेवेतिएवकारेणविषयव्यवच्छेदः तदितिहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदक
त्वग्रहस्तदर्थः प्रतियोगितानवच्छेदकत्वादितिहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहत्वस्यैवप्रतिबन्धकतावच्छेदकत्वादितिभावः अत्रेतिप्रसंगइति
तादृशज्ञानस्य वह्नित्वविशेष्यकघटप्रकारकग्रहत्वावच्छिन्नप्रतिविरोधित्वादितिभावः घटकीभूतेतिघटकत्वंचभेदाभेदसाधारणं तेनप्रतियोग्यसमानाधिक
रणघटितानवच्छेदकत्वग्रहस्यग्रहः विषयितावच्छिन्नेति तादृशविषयिताशालिग्रहत्वपर्याप्तावच्छेदकताकेत्यर्थः तेनहेतुसमानाधिकरणवृत्त्यभावेतराभा
वप्रतियोगितावच्छेदकत्वस्यावच्छिन्नविषयकग्रहस्यावच्छिन्नप्रतिबन्धकतायाश्चापि व्याप्त्यभिकोटिमापन्नतादृशविषयितावच्छिन्नतयान्वाद्युपहितप्रतिबन्धकतामादायन
तादृशानवच्छेदकत्वग्रहेऽतिप्रसंगः तथाताद्दशपावकहित्वविषयितायाघटाभाववद्वह्नित्वमितिज्ञाने प्रतिबध्यतावच्छेदककोटिप्रविष्टत्वेनतादृशज्ञानातिप्रसंग
तादृशस्थलमादाय विरोधित्वस्यैतिविरोधितावच्छेदकतायवास्याधिकरणधर्मत्वसमर्थः तेनविरोधित्वस्यविरोधितावच्छेदकधर्मवत्त्वरूपत्वे तादृशज्ञानस्यादायनातिप्रस
गः अत्रत्वसंज्ञितादृशविषयितापटितो नामधर्मवत्त्वसंबन्धेनतादृशग्रहत्वस्यैवानुगमकं तेनप्रतिबध्यताविरोधितयोरवच्छेदकभेदेननानात्वेऽपिनानुगमानुपपत्ति
संबंधाननुगमस्यादोषत्वादितिध्येयं वह्नित्वविशेष्यकत्वंवह्नित्वविशेष्यकग्रहत्वे घटितत्वस्यवह्निविशेषणत्वम् निरासमाह साध्याभावघटितेति नीलघटेनाति

लज्ञानस्यतेनसंबंधेनसौरभत्वभावेनसामान्यलक्षणातोऽनिर्वाहइत्याशयात् नन्वेवमपिसौरभत्वपर्यंतानुधावनंव्यर्थं सौरभत्वप्रकारतानिरूपितसौरभविशेष्य
ताशालिचाक्षुषेसौरभत्वप्रकारकलौकिकचाक्षुषसामग्र्याअपेक्षणीयत्वेनयाथकृतेतद्रसंभवेनसौरभस्यापिसौरभत्वसामान्यलक्षणातोभानासंभवेनसौरभभानार्थ
मपिज्ञानलक्षणायाआवश्यकत्वात् नचज्ञानलक्षणाजन्यतावच्छेदककोटौसामान्यलक्षणाजन्यत्वानिवेशेव्यभिचारवारणायतद्वृत्तिधर्मप्रकारकत्वस्यनिविष्टतया
ज्ञानलक्षणातोपिकथंसौरभभानमितिवाच्यं सामान्यलक्षणाजन्यत्वनिवेशेनापिसर्वसामंजस्यसंभवादतआहतन्नवीनमतेइतिपूर्वोक्तयुक्त्याचक्षुःसंयुक्तसमा
ऽदेनोक्तयुक्त्याविशेष्यप्रकारताधारणाविशेष्यत्वानपेक्षणादित्तिसौरभमुख्यविशेष्यकचाक्षुषपर्यंतेसौरभांशेलौकिकचाक्षुषसामग्र्याहेतुत्वस्योक्तत्वादितिभावः
अमेतुसौरभत्वादेरपीत्यस्यायमाशयः सामग्र्यंतरप्रवेशेनलौकिकालौकिकसाधारणातद्धर्मप्रकारकबोधसामग्र्याएवोक्तत्वात्तथाचकृतेसौरभत्वप्रकारकलौकिकचा
क्षुषसामग्र्यभावेपितत्प्रकारकोपनीतभानसामग्र्याएवसत्वेनतन्महिम्नैवसौरभत्वसामान्यलक्षणयासौरभभानसंभवादितिनचज्ञानलक्षणायाःपृथक्कृप्तत्वासि
द्ध्यानभ्युपगमेकथमुपनीतभानसामग्र्याःसहकारित्वमितिवाच्यंतदनभ्युपगमेपितस्याःसामान्यलक्षणासहकारित्वेनतदुपयोगाभ्युपगमात् नचैवंमंधतम
सइत्याद्युक्तदोषदुर्वारएवतत्रापिद्रव्यत्वप्रकारकोपनीतभानसामग्र्याःसत्वादितिवाच्यंद्रव्यत्वप्रकारकोपनयमतेपिविशेष्यभासकसामग्र्यास्तत्राभावेनतत्रा
दृशापत्त्यभावात् नचद्रव्यत्वप्रकारकोपनयविशेष्यीभूतस्यैवधर्मिणोविशेष्यतयातद्भानसामग्रीतत्रास्त्येवेतिवाच्यंतदुक्तरीत्यालोकसंनिकर्षाभावेनलौकिक
सामग्र्याउपनयस्यतन्मुख्यविशेष्यकचाक्षुषज्ञानोत्पादकत्वासंभवेनोपनीतभानसामग्र्याद्रव्यत्वप्रकारकोपनयविशेष्यीभूतधर्मिविशेषणाकज्ञानसामग्र्याश्च
नरीपविशेष्यांतरभासकलौकिकसामग्रीविरहेणासंभवात् प्रकृतेचचंदनचक्षुःसंयोगदशायांसौरभत्वप्रकारकोपनयविशेष्यीभूतधर्मिविशेषणाकज्ञानसा

भा॰ प्र॰
२२८

मग्र्या एव सत्त्वात् नचांधकारविशेष्यकद्वयस्वप्रकारकोपनीतभानसामग्रीतत्त्वाच्यत्वे वेति वाच्यं तादृशज्ञानसम्भ्रमरूपतत्पादोषाभावेन तत्रापत्त्यसंभवात् तस्
त्विवक्षेपेऽप्युपपत्तेः अत एवांधतमसइत्यादिग्रंथस्य च तादृशदोषाभाववद्दशाभिप्रायकत्वादिमहुः केचित्तु ज्ञानलक्षणायाः सामान्यतोऽलौकिकामतद्विषयताशा
लिप्रत्यक्षत्वावच्छिन्नप्रतितद्विषयकज्ञानत्वेन हेतुता सामान्यलक्षणाजन्यातीतानागतादिज्ञाने व्यभिचारात् नापि तन्मकारकप्रत्यक्षत्वावच्छिन्नप्रतितया उप
नीतसमानप्रकारकज्ञानविशेष्यतायामभ्युपगमे तत्स्वेवासंग्रहात् न च तस्य सामान्यलक्षणायैवापपन्नोनदसंग्रहनक्षतिरिति वाच्यं सौरभत्वेन घटादिमुख्यविशेष्यकचं
दनादिप्रकारकोपनीतभानस्य सामान्यलक्षणाया निर्वाहात् न च सौरभत्वविशेष्यस्य घटादेर्विशेष्यतायाश्चंदनानिष्ठविशेष्यतानिरूपितप्रकारत्वस्यापि संभवेन क
थं तया निर्वाह इति वाच्यं तादृशप्रकारत्वस्याननुभवात् तस्मात् चंदनं सौरभवदिति धर्मप्रकारत्वानिरूपितत्वेन सौरभवत्त्वालौकिकविषयताशालिप्रत्यक्षत्वावच्छिन्नप्रतिचे
त्सौरभज्ञानत्वेन ज्ञानलक्षणाया हेतुत्वं वाच्यं एवं च सौरभत्वेन सौरभप्रकारकचाक्षुषादेर्ज्ञानलक्षणातोऽनिर्वाहे सामान्यलक्षणायाः सौरभत्वप्रकारतानिरूपि
तसौरभप्रकारताशालिप्रत्यक्षं प्रति कारणतावान् तरं कल्प्यं तत्र च तदिंद्रियकरणकतद्धर्मप्रकारकोपनीतभानसामग्रीसहकारिणी इत्थं च चक्षुरभिचंदनमित्यादौ सौरभत्वा
पनयघोऽरतसौरभत्वोपस्थितौ अलौकिकादृशविषयताशालिप्रत्यक्षसामग्रीरूपसहकारिविरहात् सामान्यलक्षणातः सौरभभानसंभवेऽपि अतः सौरभत्वपर्यंतानु
धावनं एवं सौरभत्वप्रकारतानिरूपितलौकिकविशेष्यताशालिप्रत्यक्षं प्रति सौरभत्वज्ञानस्य हेतुत्वांतरं कल्पनीयं तत्र च लौकिकतदिंद्रियकरणकतद्धर्मप्रकारकज्ञान
सामग्रीसहकारिणी तादृशसामग्र्याः सहकारित्वानभ्युपगमे एवांधतमसइत्यादिना चाक्षुषापत्तिर्दर्शितेति न तस्य चैमिदं ज्ञानस्य प्रमात्मनि तत्त्व एव संभवति तस्य
भ्युपगमे सौरभत्वप्रकारकज्ञानसामग्र्यंतराभावात् सौरभज्ञानसापि सामान्यलक्षणापाः संभवेत् सौरभत्वपर्यंतानुधावनमप्रकृतमेवेति केचित् सौरभत्वप्रकारतानिरूपितत्वेसौ

राम॰
२२८

२१

रमत्रकारतांशालिज्ञानजनने सामग्र्यन्तरस्य सहकारित्वानभ्युपगमात् विशेषणज्ञानविषयैव प्रकारसौरभज्ञानस्यापेक्षणीयत्वात् अतएव सौरभज्ञानशून्यतादृशा
यां सौरभत्वस्य प्रत्याकथंचिदुपस्थितौ चंदनादिसंनिकर्षेपि सामान्यलक्षणाजन्यचाक्षुषीयप्रतीतिरिति चंदनं इति सौरभत्वादेर्योत्यादिना सौरभपरीयहत्वापि कश्चित्तनुरभिचंद
नेमितसाकारकमानसज्ञानाभिप्रायेणादिमिसन्येषु रूपि चंदनमितिसस्मैसौरभं चंदनमितिसर्थे स्मरणेत्तज्ज्ञानावगाहिस्मरणमूलकोपनीतभाने मुक्तिरणनितज्ज्ञानात्मकधर्मस्य
ज्ञानेनतस्यासामान्यलक्षणायैव मुक्तेर्भानं तं भवतीमतत्र्याहप्रसृततत्राकेति मुक्तेरपि भानमितियत्तु तत्र स्मरणमूलभूतभ्रमात्मकप्रत्यक्षे सामान्यलक्षणायाऽजन्यत्वस्यापि
भानप्रसङ्गस्यापि स्मरणोत्तं भयेन स्मरणाजन्यमानेनोपनीतस्यैव भानोपगमेन मुक्तेर्भानमभावात्।कं मुक्तिरित्ति धर्मस्मरणस्थलएव मुक्तिभानोपगमादितिवचीनानां रूप
योगाद्धावनंतविशेषणत्वेकेचिन्नतिर्वधकत्वशेनतन्त्राहुः प्रत्यक्षसामान्यलक्षणायाजन्यत्वस्यापि भानं तत्रापि तन्मूलकस्मरणमूलकोपनीतभाने मुक्तिभानस्यानुभवसि
द्धत्वान्मुक्तिधर्मस्मरणस्थलएव मुक्तिभानोपगमात् इत्यस्यप्रयोगश्चितं प्रयोजनत्वाद्यदपि तत्र जन्यत्वसामान्यलक्षणाजन्यत्वादेवमुक्तिभानोपपन्नो किंज्ञानलक्षणाया
नत्र जन्यत्वसामान्यलक्षणायाजन्यत्वाश्रयप्रत्यक्षं प्रतिवहेतुत्वपाकथं तद्वत्वाद्यानतताज्ञप्रमुक्तिभानोपपत्तिराच्यं न च प्रमते निर्विकल्पकात्मकज्ञानस्यापि
सामान्यप्रत्यासत्तितयानुगमत्वावच्छेदकसंबंधविशेषानिवेशेन प्रमत्वापावच्छिन्नजन्यत्वप्रकारताशालिज्ञानादपि कालीकसंबंधेन जन्यत्वाश्रयीभूतमुक्ति
भानोपपत्तौरितिनप्रत्यतरेतरक्रांतरोपिनसम्यक् एवमपि एककालीनत्वादेः संबंधत्वे मानाभावेन प्रत्यरजन्यत्वेन नित्यविषयकतथाविधज्ञानं तत्र ज्ञानस्य प्रत्यक्षत्वं विना गमभूषा
तेन चरणप्रवणात्सेवत्तत्राजन्यत्वेन नित्यभानमितिवाच्यं प्रत्यक्षविषयत्वस्य संनिकर्षाश्रयत्वव्याप्यत्वपातिनित्यसंनिकर्षं विना प्रत्यक्षविषयत्वासंभवादिति द्विपातिचेप
क्षणीयेत्वमादिदोषितिसंप्रमेवयावच्छेने तथाहि घटत्वादिप्रकारकज्ञानद्विशेष्यलौकिकसंनिकर्षाद्युपगमेयावद्घटादिविषयकचाक्षुषादिवारणाया

त्वापेक्षणीयं चेत्तितद्धर्मप्रकारकज्ञानेन तदिन्द्रियजन्यतद्धर्मावच्छिन्नप्रत्यक्षजनने तदिन्द्रियकरणकतद्धर्मप्रकारकं किंचिज्ज्ञानजनकतावच्छेदकीभूतात्तत्सामान्यज्ञानत्वा
तिरिक्ताया वेत्तोधर्मोपलक्षितं तदवच्छिन्नत्वात्मकसामग्र्यन्तरस्य विशेषसामग्रीमुद्रया सहकारित्वे कल्पनीयमित्यर्थः तदिन्द्रियजन्यफलजनने च मनइन्द्रियकरणकज्ञानसाम
ग्र्यानपेक्षणात्तदिन्द्रियकरणकेति धर्मान्तरप्रकारकज्ञानसामग्र्यन्तरसत्त्वेऽपि तद्धर्मप्रकारकज्ञानसामग्र्यन्तरसत्त्वकालेन तद्धर्मावच्छिन्नप्रत्यक्षानुदयात्तद्धर्मप्रकारकेति प्र
त्यज्ञानत्वावच्छिन्नज्ञानत्वादीनामपि समूहालंबनात्मकघटत्वादिप्रकारकज्ञानजनकतावच्छेदकत्वसंभवात्तद्धर्मितया वह्न्याद्यवच्छिन्नानां चक्षुरादिप्रकारकत्वाद्यकिंचिदिति घटत्वज्ञान
त्वावच्छिन्नस्य घटत्वज्ञानादिसहकारित्वे यात तत्सामान्यज्ञानत्वातिरिक्ताइतितादृशज्ञानजनकतावच्छेदकीभूतात्तत्वातिरिक्तरूपं किंचिद्धर्मावच्छिन्नस्य सहचरितेव सत्त्वात् यत्तदिति
एवं च घटत्वप्रकारकप्रत्यक्षं किंचिज्ज्ञाननिष्ठकार्यतानिरूपितकारणतावच्छेदकीभूतघटत्वज्ञानत्वातिरिक्ताया वत्तो धर्माः प्रत्येकं तदवच्छिन्नकूटसमवहितघटत्वज्ञानत्वावच्छि
न्नं यत्तादृशप्रकारणतावच्छेदकसंबंधेन तदव्यवहितोत्तरक्षणोत्पन्नकार्यतावच्छेदकसंबंधेन कार्यतावच्छेदकावच्छिन्नमित्येवसामग्रीव्याप्तिः स्वीकरणीया विशेष्यभा
नकलौकिकसन्निकर्षादिसत्त्वकाले तादृशयावद्धर्मोपगतचक्षुःसंयोगत्वावच्छिन्नासत्त्वान्न घटत्वादिज्ञानाहरादिप्रसंभाव्यतिः अत एव चक्षुःसामग्र्यानुपभि
नतादेवमन्यथा तत्सामान्यमाश्रयचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयुक्तविशेष्यकतत्सामान्यप्रकारकचाक्षुषत्वादिनाहेतुतोपगमे युक्तस्थले चक्षुःसंयुक्त
विशेष्यकद्रव्यत्वादिप्रकारकचाक्षुषसत्त्वेन निखिलद्रव्यचाक्षुषापत्तेर्वारणासंभवात् सोऽप्यभिमतसंपाते त्वालोकसंयोगसामान्यताध्यवत्वप्रतिपाद
नायद्रव्यप्रसक्तेः द्रव्यत्वप्रकारकचाक्षुषेचरमं आलोकसंयोगनाशानंतरं तदानीमानसनिखिलद्रव्यप्रसक्तेः यथाचाक्षुषदर्शिता अननुभव
सीयमानेकद्विसाक्षात्कारोपगमेऽसंगति विरहादाह संतानरतिनतुसामान्यप्रत्यासत्तेर्ज्ञानात्मकत्वेज्ञानमध्यासत्तितोः साभेदानुपपत्तिरत आह इयं चेः

तिद्वयं सामान्यप्रत्यासत्तिः धर्म्मिणां प्रत्यासत्तिः स्वविषयधर्माश्रयनिष्ठस्वविषयीभूतघटत्वादिरूपप्रत्यासत्त्या साक्षात्कारजनिका इतराज्ञानलक्षणा
प्रत्यासत्तिः तस्यैव प्रत्यासत्तिरित्यन्वयः स्वविषयधर्मनिष्ठकारणतावच्छेदकप्रत्यासत्त्या साक्षात्कारजनिकेसर्थः तथा च ज्ञानप्रत्यासत्तिसामान्यप्रत्यासत्त्योः स्व
रूपतोऽभेदेपि कारणतावच्छेदकसंबंधभेदेन कारणताभेदादेव भेदव्यवहार इति भावः ननु ज्ञानलक्षणायाः प्रत्यासत्तित्वे मानाभावः घटो नास्ति सुरभिचंदनमि
त्यादौ घटसौरभादीनां ज्ञानस्य घटत्वसौरभत्वसामान्यलक्षणात एव निर्वाहात् न च सामान्यलक्षणाया फलतनने तद्धर्मप्रकारकप्रत्यक्षजनकसामग्र्यंतरस्यापेक्षि
तत्वात् घटो नास्ति सुरभिचंदनमित्यादौ घटत्वसौरभत्वादिप्रकारकप्रत्यक्षजनकलौकिकसंनिकर्षाभावात् सामान्यलक्षणानो घटादिभानमनुपपन्नमिति वा
च्यं लौकिकसंनिकर्षासत्वेपि घटत्वादिप्रकारकोपनीतभानात्मकयत्किंचिज्ज्ञाननिष्ठकार्यतानिरूपितकारणतावच्छेदकीभूतयावद्धर्मावच्छिन्नसामान्यकसामग्र्याः स
त्वेनानुपपत्त्यभावात् न च तद्धर्मप्रकारकोपनीतभानात्मकयत्किंचिद्व्यक्तिजनकतावच्छेदकीभूतयावद्धर्मावच्छिन्नसमवधानस्य तद्धर्मज्ञानसहकारित्वे घटो नास्ति सुरभि
चंदनमित्यादौ अनुपस्थितघटसौरभादीनां भानप्रसंग इति तत्प्रकारकलौकिकप्रत्यक्षसामग्र्या एव सहकारित्वं कल्पनीयमिति वाच्यं तदानीमनुपस्थितघ
टसौरभादीनां प्रकारतयाभानस्य विशेषणज्ञानविरहेणामुख्यविशेष्यतया तज्ज्ञानस्य च तद्धर्मप्रकारतानिरूपितलौकिकविषयताप्रत्यासत्त्या सिद्धात् तद्ध
र्मप्रकारतानिरूपितलौकिकविषयताशालिनो लौकिकसंनिकर्षरूपकारणविरहेणापादनासंभवात् अथ तत्प्रकारकप्रत्यक्षत्वावच्छिन्नं तन्मुख्यविशेष्य

रूपसम्बन्धत्वावच्छिन्नत्वेनापाद्यते किंतूपनीतभानात्मकघटत्वप्रकारकज्ञानरूपयत्किंचित्कार्यजनकतावच्छेदकतया तद्धर्मावच्छिन्नसम्बन्धिघटत्वादिज्ञानसम्बन्धविष
यीभूतघटत्वादिरूपप्रत्यासत्त्या यावद्घटास्थितैव सत्वात्तत्र तज्जन्यतावच्छेदकीभूतघटत्वादिप्रकारतानिरूपतद्विशेष्यत्वप्रत्यासत्त्या प्रत्यक्षत्वावच्छिन्नमापाद्य
ते तत्र च तत्तद्घटादिरूपविशेष्यकज्ञानस्य घटत्वादिप्रकारतानिरूपितलौकिकविषयताशालिज्ञानसामग्र्याश्च विरहोऽकिंचित्करः तद्विरहेपि घटत्वादिप्रका
रतानिरूपितविशेष्यतायास्तत्प्रत्यक्षस्योपस्थितघटादौ घटत्वज्ञानेन जनादिति चेन्न तद्धर्मिनिष्ठविशेष्यतासंबंधेन प्रत्यक्षं प्रति स्वविषयधर्मनिरूपिततत्तद्धर्मिनि
ष्ठाधिकरणात्वप्रत्यासत्त्यैव सामान्यज्ञानस्य हेतुता कल्प्यते एवं च तद्धर्मिनिष्ठधर्मप्रकारतानिरूपितलौकिकविषयताशालिज्ञानसामान्यसामग्र्यां तत्तद्धर्मप्रकार
तानिरूपिततद्धर्मिप्रकारताशालिप्रत्यक्षसामान्यं प्रत्यक्षसहकृतं सामान्यज्ञानं स्वविषयधर्मनिरूपिततद्धर्मिनिष्ठाधिकरणात्वसंबंधेन प्रत्यक्षं तत्तद्धर्मिनिष्ठवि
शेष्यतासंबंधेन प्रत्यक्षमिति संबंधभेदानानैव सामग्र्यावापत्तयः स्वीक्रियंते तथा च घटत्वेनास्तीत्यादावनुपस्थितघटादिभानापत्तिर्न संभवति घटत्वादिप्रकारतानि
रूपितलौकिकविषयताशालिज्ञानसामग्रीघटत्वादिप्रकारतानिरूपिततत्तद्घटादिप्रकार[illegible]ताशालिप्रत्यक्षसामान्यमतरसहकृतघटत्वज्ञानस्य तत्[illegible] तद्घ
टनिष्ठस्वविषयधर्माधिकरणात्वसंबंधेन तत्राभावादिति अत एव तत्तद्धर्मिभेदेन सामान्यलक्षणायाः कारणत्वं वा कुत्र प्रत्यक्षंगौरवमिति तु नाशंकनीयं तत्तद्धर्मि
भेदेन भिन्नभिन्नकारणताकल्पने घटत्वद्रव्यत्वादिरूपनिखिलसामान्यज्ञानानां ज्ञानत्वेनैकैकहेतुतायाएवकल्पनात्सामान्यभेदेन कारणताबाहुल्याभावात्

भवन्मते च सामान्यभेदेन विभिन्नकारणताकल्पनमावश्यकं विशेष्यतासंबंधेन प्रत्यक्षं प्रति स्वविषयवद्धर्मवत्त्वसंबंधेनैकहेतुताकल्पने घटत्वज्ञानकाले घटत्व
प्रकारतानिरूपितलौकिकविषयताशालिप्रत्यक्षसामग्र्यामसत्वाच्च पटत्वादिप्रकारतानिरूपितलौकिकप्रत्यक्षसामग्र्यां घटत्वेन पटवद्घटप्रत्यक्षापत्तेः पटत्वा
दिप्रकारतानिरूपितलौकिकप्रत्यक्षसामग्रीसहकृतस्यापि ज्ञानत्वावच्छिन्नस्य स्वविषयधर्मवत्त्वसंबंधेन प्रत्यक्षत्वावच्छिन्नव्याप्यतायाः स्वीकरणीयत्वात्तन्म
तेनु तत्तद्धर्मनिष्ठप्रत्यासत्त्या ज्ञानत्वावच्छिन्नस्य येन संबंधेन तत्तद्धर्मविशिष्टत्रियोधर्मस्तत्संबंधावच्छिन्नतत्प्रकारतानिरूपितलौकिकविषयताशालिप्रत्यक्षसामग्री
सहकृतस्यैव प्रत्यक्षत्वावच्छिन्नव्याप्यत्वोपगमात् तत्रातिप्रसंगाभावात् एवं भवन्मते ज्ञानलक्षणाया अपि तत्तद्विषयभेदेन नानाकारणताः कल्पनीयाः लौकिका
न्यविषयतासंबंधेन प्रत्यक्षत्वावच्छिन्नं प्रति विषयतासंबंधेन ज्ञानत्वेनैकहेतुतायाः कल्पने तद्घटज्ञानदशायां तद्घटस्य विशेष्यभासकसामग्र्यसत्त्वे घटांतर
स्य च विशेष्यभासकसामग्रीसत्त्वे तद्घटे लौकिकान्यविषयतासंबंधेन प्रत्यक्षापत्तिः तद्घटविशेष्यभासकसामग्रीं विनापि प्रकारतासंबंधेन प्रत्यक्षत्वावच्छिन्न
स्य घटांतरादावुत्पत्तेः घटांतरादिविशेष्यमात्रभासकसामग्रीसहकृतस्यापि ज्ञानत्वावच्छिन्नस्य विषयनिष्ठप्रत्यासत्त्या प्रत्यक्षत्वावच्छिन्नव्याप्यतायाः स्वी
करणीयत्वादिति न च तत्र तद्घटादिविशेष्यकमेव ज्ञानं तद्घटे लौकिकान्यविषयतासंबंधेन जायत इति तत्रैवापत्तिरिति वाच्यं मानसान्यज्ञानेऽपनीतस्य मुख्य
विशेष्यतया भानस्यानभ्युपगमादिति तस्मात् ज्ञानलक्षणाया विषयभेदेन हेतुत्वांतरकल्पनापेक्षया सामान्यलक्ष[illegible]णाया एव तत्तद्धर्मभेदेन कारणा

तावत्समनसमुचितं एवं चोपदर्शितातिप्रसंगविरहाज्जप्रकारतानिरूपितलौकिकविषयताशालिज्ञानसामग्री विनिर्मोकेणापि सामान्यप्रत्यासत्तेः फलोपधाय
कतायाः स्वीकरणीयतया तत्र एवेति अतएव घटो नास्ति सुरभिचंदनमित्यादौ घटसौरभादेर्भानोपपत्तेः किं ज्ञानलक्षणायाः पृथक्कारणतयोक्तस्तत्राह त्व
त एवेति अन्तरा च ज्ञानलक्षणात एव ननु सामान्यलक्षणातः सौरभत्वादिवृत्तिधर्मस्य तदानीमज्ञानात्तथा चैतत्तदुपपत्तये ज्ञानलक्षणायाः पृथक्कारणता
लौकिकसन्मात्रावश्यकमेवेति कृतं च द्रव्यत्वेन संयोगान्मेसादि अत्र निर्विकल्पके व्यभिचारणापत्तेश्च प्रथममजन्यांतं ज्ञानलक्षणाजन्योपनीतभाने व्यभिचारेणा
यद्वितीयमजन्यांतं अपरापरेति घटत्वद्रव्यत्वोभयातिरिक्तत्वं निवेश्य घटत्वद्रव्यत्वसत्त्वे तन्निरूपितयातिरिक्तत्वादिकं निवेश्येत्यर्थः तस्मादिति अत्र कार्यतावच्छेदक
संबंधादिकं पूर्वमुक्तमेव वक्तव्यं तत्र निरूढघटप्रत्यक्षं प्रतिघटत्वज्ञानत्वेन समवायेन निरूढविषयनिष्ठप्रत्यासत्त्याच हेतुताद्वयं आद्यहेतुतया पुरुषान्तरीयज्ञान
मादाय नातिप्रसंगः द्वितीयहेतुतया च प्रत्यक्षविषयत्वस्य सन्निकर्षाश्रयत्वव्याप्यत्वरक्षणं एवं च पुरुषभेदेन नानांतहेतुतापीति ध्येयं न चैवमपि घटदृतिलौ
किकप्रत्यक्षस्य लौकिकप्रत्यासत्तिसामान्यप्रत्यासत्त्युभयजन्यत्वापत्तिरिति चेष्टापत्तिमाह घटत्वनिर्विकल्पकेति तद्घटत्वमितिसामान्यप्रत्यासत्तिजन्यज्ञाने व्य
भिचारवारणाय प्रकारकांतं निर्विकल्पके व्यभिचारवारणाय जन्यांतं तद्घटत्वमिति स्वघटांतरेण तद्घटत्वनिष्ठधर्मप्रकारकस्य तद्घटेतरप्रकारकस्य प्रत्यक्षस्य
तद्घटज्ञानजन्यतावच्छेदकाक्रान्तत्वसंपन्नार्थं तत्र च गन्धापनीतभानस्य तत्प्रकारकसामान्यप्रत्यासत्तिजन्यत्वमेवेत्याशयेनाह प्रत्यक्षताकसेति नासम्य

हइति घटत्वस्य कालिकसंबंधेन तद्घट इत्तितया तादृशोपनीतभानस्य कालिकसंबंधेन तद्घटे घटत्वप्रकारकत्वापत्तिर्भावः अत्र वदंति प्रत्यासत्तय इंद्रियातां कारणा
तापां कारणतावच्छेदकसंबंधाः स्वातंत्र्येण कारणानि च तत्राद्यकल्पे सामान्यज्ञानं वा ज्ञायमानं सामान्यं वा प्रत्यासत्तिरिति विकल्पेन संभवति संबंधघटकाना
मुभयथापि तौल्यात् अयं विकल्पस्तु द्वितीयकल्प एव अत्र तत्र एवातिरिक्ते वदंति यथा द्वितीयकल्पमाश्रित्य कस्यद्ये प्रतीताश्रयासत्वेन कथं तेन संबंधेन तत्रेति
यसत्वं कथं वा प्रत्यासत्तेरत्र सत्वं विषयासत्वकालेपि तेषु ज्ञानादिविषयतासीकारवत् पदार्थांतराश्रयतापक्षेनाप्यसीकारादिति हेतोरेव परं वर्णितोपगमे
न संबंधघटकस्यासत्वेपि नानुपपत्तिरिति परे इति दिक् कृष्यामेर्नानात्वे त्वितादिव्यपमाणाहोषासहदोषितौ धूमत्वादिव्याख्यायां लाघवाभव्याप्यवह्निसमा
नाधिकरण वह्निधूमत्वेन व्याप्तिप्रकारकज्ञानहेतुत्वे गुरुशरीरधूमत्वविषयतायाः कारणतावच्छेदकघटकतया गौरवमिति तादृशवह्निसामानाधिक
रणप्रकारकविशेषणांतराविशेषितधूमत्वावच्छिन्नविषयकज्ञानहेतुत्वं लाघवात्सेत्स्यति तथा च सामान्यलक्षणाया प्रत्यासत्तित्वं दुर्वारं एतेन लघुशरीर
सर्वसाधारणव्याप्त्यंतरमाहवह्निमदितीत्याहुः अपरे तु नेदं सम्यक् स्वरूपतो धर्मितावच्छेदकीभूत धूमत्वे धूमविशेषणतापत्रस्य तादृशसामानाधिकरण्य
स्य पारतंत्र्येण प्रकारताशालिज्ञानहेतुत्वेन धूमत्वत्वं विषयतायामत्र निवेशात् अन्यथा रासभादिसाधारणपवारणाय धूमत्वविशिष्टतादृशसामानाधिक
रणप्रकारकत्वस्य तथापि विशेषणीभूततया धूमत्वत्वविषयतानिवेशस्यावश्यकत्वात् अथ पारतंत्र्येण तादृशसामानाधिकरण्यप्रकारकत्वेसति धर्मितावच्छेद

म·प्र·
२३२

कृतयास्वरूपतो धूमत्वावगाहित्वं निवेश्यत इति चेत्तु त्वंमम्मापो साहु [illegible] मदन्मेतीति निरुक्तगुरुत्वमते ऽभावस्याधिकरणरूपतया वह्निमदन्यवृत्तित्वाभावस्यैकस्य न
सर्वधूमसाधारण्यमिति वाच्यं एतस्या मीमांसकोक्तेत्तृतीयलिंगपरामर्श इत्यादिमूलस्य पर्यालोचनया नैयायिकमतमवलंब्य प्रवृत्ततया ऽदोषात् अतएव
त्वाद्यविसाधारण्यायेसग्रिमग्रंथोपि संगच्छते अन्यथा मीमांसकानां केवलान्वय्यनुमानाभावेनासंगतत्वापत्तेः एतेनायं ग्रंथो मीमांसकीयोपि न गुरुमताभि
प्रायकः उक्तानुपपत्तेः किंतु मुरारिमिश्रमताभिप्रायक इति नवीनोक्तिरपि हेयैव साध्यसंबंधितेतीनचैवमपि दंडादिरूपनानाहेतुतावच्छेदकस्यलेएवंगृहीतसा
ध्यसामानाधिकरण्यकत्वापि पक्षधर्मत्वादिर्दंडादावपूर्वसाध्यसामानाधिकरण्यावच्छेदकत्वग्रहानुरोधेन सामान्यलक्षणावश्यमुपेयेति वाच्यं तत्र साध्यसंबंधिता
वच्छेदकदंडत्वाद्यवच्छिन्नवत्वव्याप्तिरिग्राशयात् दीधितौ ग्रहणयोग्य इति तदानीं प्रत्यक्षशाब्दादिसामग्र्यभावात्सर्वमगृहीतत्वेन नैयायिकमतमवलंब्योपन्यस्या
प्यसंभवादितिभावः वह्निसामानाधिकरण्यत्वेनोपस्थितस्य महानसीयवह्निसामानाधिकरण्यादेर्ग्रहे त्वनाहार्यदोषेऽपि पर्वतभिन्नोये समर्थः प्रमत्वापत्तिरि
तिमीमांसकैरन्यथाख्यातेरस्वीकारात्तेषां पत्तिरितिभावः मीमांसकसामान्यलक्षणां विनापि नैयायिकमतमवलंब्यानुमितिं निर्वाह्यतदनवलंब्याप्तितांश्चे वीह
यइतिमूलेतदनभ्युपगमेपोतितृतीयलिंगपरामर्शानभ्युपगमे पोस र्थः आप्यनुभवतत्स्मरणोतिकुत्रचिद्व्याप्त्यनुभवात्कुत्रचिद्व्याप्तिस्मरणादनुमितिरित्युभयो
रेवव्याप्तिज्ञानत्वेन हेतुत्वं अन्यथानुमितिहेतुतादित्यत्र हेतुत्वपदं वा प्रयोजकत्वपरं तथा च व्याप्तिज्ञानपक्षधर्मताज्ञानयोः समानप्रकारकत्वेनानुमितिहेतुत्वमि

वह्निः २
राम०
२३२

त्तिभावः समानप्रकारकत्वेनानुमितिहेतुत्वे दृष्टान्तमाह गवादिपदेष्वपीति नव्यास्तु न तु सामान्यलक्षणानङ्गीकारे पूर्वं गवादिव्यक्तेर्गवादिपदशाब्दबोधानुपप
त्तिः शक्तिज्ञानपदार्थस्मृत्योस्तद्विषयकत्वानुपपत्तेः शक्तिग्रह पदार्थस्मरणयोरन्यविषयकशाब्दबोधजनकत्वे सम्मतिप्रसङ्गादिस्तत्राह गवादिपदेष्विती मा
हुस्तत्स्विति संशाब्दबोधे शक्तिग्रहादीनां समानविषयकत्वेन हेतुत्वेप्यनुमितौ परामर्शस्य समानप्रकारकतामात्रेणाहेतुतया व्यवहाराधीनगवादिपदशाब्दानुमि
तो गवादिपदात् पूर्वं गवादिव्यक्तिभानसंभवे न सामान्यलक्षणानङ्गीकारेपि गवादिपदात् पूर्वं गवादिव्यक्तिशाब्दबोधानुपपत्त्यभावात् एतेन शाब्दशक्तिग्रहाधो
नशाब्दबोधस्य तस्याः पूर्वं गवादिव्यक्तिभानानुपपत्त्या तत्र सर्वं गवादिव्यक्ति [struck out] विषयकशाब्दबोधस्यानुमितात्मकशक्ति
ग्रहाधीनत्वोपगमेनैव निर्वाहे तत्र शाब्दशक्तिग्रहाधीनत्वस्यैवासिद्धेः यत्तु मीमांसकैः शाब्दबोधेपि समानप्रकारकत्वेन हेतुत्वमुपेयत इति वस्तुगतिमनुरुध्येद
मुक्तमित्युच्यते तदा समर्थ्य कृतदृष्टान्तपरत्वेनैव पर्यवसानमिति दिक् शाब्दानुभवतत्स्मरणोभयत्र तमर्थं शक्यपरं न तत्प्रकारान्तं शक्तिपरं तस्मात्स्मरणमितिष्वपि समानसदस
शाब्दानुभवपरतया तत्स्मरणपदमेव वा शक्यस्मरणपरं यथाश्रुते ज्ञानत्वेनैव शब्दानुभवशक्तिस्मरणयोरुभयोरुपादानसंभवेनानुभवस्मरणयोः पृथगु
पादानवैयर्थ्यात् पदार्थस्मरणस्य समानविषयत्वेन शाब्दबोधहेतुतायां च नैतद्दनुरोधेन सामान्यलक्षणास्वीकारापत्तेश्च वक्ष्यत इति मूलस्य शक्तिग्र
ह पदार्थस्मरणशाब्दानुभवानां समानप्रकारकतामात्रेणाहेतुहेतुमद्भावावधारणादित्यादिनागोपदात् पूर्वं गवाननुभवं प्रसंगाद्वेत्यन्तेन ग्रन्थेन वक्ष्यत इत्यर्थ

कस्मासंगत्यापत्तेस्तदेसाशयेनाह दीधितौ शक्त्यनुभवस्य स्मरणस्य इति आख्यायांशस्मरणयोरिति परस्परमिति शेषः अगृहीतयाहितापत्तिः अगृहीतयाहि
त्वेन प्रमात्वापत्तिः अगृहीतस्मतासैवत तदनुभवविषयत्वेन धारावाहिकानुभवेऽप्यासमभावेन तत्स्मृतेः अगृहीतयाहित्वस्येव प्रमात्वस्मात्वादितिभावः हेतु
त्वाभावेपीतिष्टत्विज्ञानजन्यपदार्थोपस्थितेर्हेतुतयाशक्त्यनुभवस्य हेतुतावच्छेदकत्वादितिभावः लाघवात्मदज्ञानत्वेनैव हेतुत्वंनतुस्मरणापदार्थस्मृत्यापा
दकत्वेनेत्याशयेनाह कश्चिदिति उभयोः शक्त्यनुभवशक्यस्मरणयोः तदेवेतिगवादिपदे विस्सादिनाम्रत्वेनेतिशेषः दृष्टांतिदूतमितितथाच शक्त्यनुभवशक्यस्म
रणयोः परस्परं कार्यकारणभावो नत्वयं दृष्टांतोऽभिमतः अपितु उभयनिष्ठशाब्दबोधकारणत्वं समानप्रकारकत्वेनैव ग्रंथकृतोऽभिप्रेतमितिभावः केचित्तु न
नु दार्ष्टांतिके कारणयोः समानप्रकारकत्वेनासमानप्रकारककार्यंप्रतिकारणत्वं दृष्टांते च कार्यकारणयोः समानप्रकारकत्वेति वैषम्यमत आह श
क्त्यनुभवे सादिति तथा च कारणयोः समानप्रकारकत्वेन कारणत्वं दृष्टांतीकृतमिति वदंति भ्रमत्वापातादिति गोगौपदशक्येति शक्तिज्ञानस्येव गोत्व
प्रकारकशाब्दबोध समानप्रकारकतयातस्य च शक्यभावव्यापक्तौ शक्तिप्रकारकत्वादितिभावः कुजशक्तिवादिनो मीमांसकस्य मतमालंब्य
समाधत्ते दीधितौ जातौ व्यक्तौ चेति जातिविशिष्टव्यक्तौ शक्तिकल्पनेसंबंधांशेपि शक्तिकल्पनं जातिव्यक्त्योर्विशेष्यविशेषणभावे विनिगमनाविरहश्चे
त्याशयेन विशिष्टशक्तिमुपेक्ष्य जातौ व्यक्तौ चेत्युक्तं गोत्वं तदादिपदशक्तिमत्गोत्व न तु हादिपदशक्तिमतीतिज्ञानवतस्तदादिपदात् अरनुपस्थितेर्व्यक्तिय

वि

यंतानुधावनं ननु गोत्वस्य समवायेन गोपदशक्यत्वस्वीकारे शाब्दबोधे संबंधभाननियमो न स्यात् न चाकांक्षादिनैव संबंधभाननियमः स्यादिति वाच्यं तथा सति नैयायि
कमतेपि तेनैव संबंधभाननियमे तत्र शक्यत्वस्वीकारेण नैयायिकमतविशेषापत्तेः पापत्तेरत आह परं त्विति ज्ञानेति शक्तिरित्यनुषज्यते तदर्थस्तु जातिशक्तिवादस्याति
जातिविषयत्वेनैवेसादृश्यथाकृते प्रकारत्वस्य तृतीयार्थतया जातिविषयत्वप्रकारकशक्तिविशेष्यकज्ञानत्वेन हेतुतासंभवे तत्र व्यक्तेनैसादिवक्ष्यमाणदोषापादकव्या
ख्यायां जातिविषयत्वेनैसादिगोत्वप्रकारकाकारकशक्तिज्ञानत्वेनैवेति एवकारेण व्यक्तिविषयकत्वे शाब्दबोधप्रयोजकतयावच्छेदः तथा च शक्तिग्रहे विष
यितया प्रसशाब्दप्रयोजकत्वं तस्यैव वाच्यत्वमिति व्यक्तौ शक्तिसत्वेपि न तस्या वाच्यत्वमिति शक्तेः कुब्ज नेति कुब्ज नेति कुब्जशक्तिवादिनां व्यक्तेः शाब्दबोधप्र
योजकत्वभावेन नैयायिकमताद्विशेष इति भावः एतेन कुब्जशक्तिवादिमतेपि गोत्वप्रकारकशक्तिज्ञानत्वेनैव हेतुत्वे जातिविषयकत्वप्रकारकत्वस्य कारणता
वच्छेदककोटावनिवेशेन तन्मते शाब्दमतौ वक्ष्यमाणगौरवदोषस्यासंगमापत्तिरिति दूषणं निरस्तं वक्ष्यमाणगौरवदोषस्य यद्विषयकत्वे शाब्द
बोधप्रयोजकत्वं तस्यैव वाच्यत्वमिति नियमकत्वस्य नारूपगौरवपरत्वेनासंगमभावात् समानप्रकारकत्वविरोध इति इदमुपलक्षणं वक्ष्यमाणजातिविषयक
त्वज्ञानानुपपत्तिरपि द्रष्टव्या नवीनशक्तिग्रहस्य शक्यसंशाब्दधीप्रकारगोत्वप्रकारकत्वेन कार्यकारणभावविरोध इति वाच्यं यथाकथंचित्तमानप्रकारकत्वानाव प्र
र्ववादेपि उ शक्तिग्रहस्य कार्यत्वप्रकारकशाब्दघटादिविशेष्यकस्य कार्यत्वप्रकारेण पूर्वं शाब्दहेतुत्वस्य वक्ष्यमाणत्वेन इत्थं पूर्वं वक्ष्येन इति मतविरोधा

यत्ताशक्याशे शाब्दधी प्रकारप्रकारकत्वरूपसमानप्रकारकत्वे सैव वाच्यतया तद्विरोधस्य दुर्वारत्वात् शाब्दबोधीयसमवायसंबंधावच्छिन्नगोत्वप्रकारतातो शक्ति
ग्राहीय निरूपितत्वसंबंधावच्छिन्नगोत्वप्रकारताया विलक्षणत्वाद एतेन समवायेन गौः[illegible]कारकशाब्दं प्रति शक्तिसंबंधेन गोत्वप्रकारकगोपदविशेष्यकगोपदसंयो
गित्वाकारकशक्तिज्ञानत्वेन हेतुत्वोक्तौ न कोऽपि विरोध इति जातिशक्तिवादविरोध इति रीधितिरसंगतेति मैथिलोक्तावितरेषामपि निरस्तं तस्यापि शक्यांशे गोत्वाप्रका
रकत्वात् शाब्दबोधीयसमवायसंबंधावच्छिन्नगोत्वप्रकारतातो शक्तिज्ञानीयशक्तिसंबंधावच्छिन्नगोत्वप्रकारताया विलक्षणत्वाच्च जातिविषयकत्वज्ञा
नानुपपत्तिरिति शक्तिविशेष्यकजातिविषयकत्वप्रकारकज्ञानानुपपत्तिरित्यर्थः उपदर्शितरीत्या जातिविषयकत्वेनैवेत्यादिग्रंथाक्षरतः यंथे न तादृशज्ञानस्यैव हेतु
तायामादित्यभावः नितरामेवेति जातिविषयकत्वज्ञानानुपपत्तिरित्यनुपपन्नमते उक्तशक्तियत्वे शक्तिविशेष्यकत्वसत्वेऽपि न जातिविषयकत्वप्रकारकत्वमतत्तु न्यशक्तिवि
शेष्यकत्वमपीत्याशयेन नितरामित्युक्तिः निरस्तमिति तथा च कुत्रशक्तिमते गौर्गोपदशक्येति शक्तिग्रहस्यैव गोत्वप्रकारकशक्तिज्ञानत्वेनैव हेतुतेति भावः अन्यके
चित्समनेस्यग्रहीतयाहित्वापत्त्या शक्तिज्ञानस्य समानविषयकत्वेनैव स्मृतिहेतुत्वमिति शक्तिभ्रमवशात्स्मरतो हेतुः इति पूर्वग्रंथासंगतीयते इदानीं च जातिविषयकत्वे
नैवज्ञाता व्यक्तिस्मारयतीसमनेन शक्तिज्ञानस्य समानप्रकारकत्वेनैव स्मृतिहेतुत्वमुच्यते इति पूर्वापरग्रंथविरोधात् चिंत्यमेतदिति वदंति नरसस्मारयतीसमते
न स्मृतिहेतुत्वं समानप्रकारकत्वेनेति नोच्यते किंतु अनुभावयतीसमनेनोक्तं शाब्दबोधहेतुत्वं इति ज्ञानजन्यपदार्थोपस्थितेर्हेतुतया शक्तिज्ञानस्यानुभवजनकतारु

वच्छेदकतया न प्रत्यभिमार्शकानिराकरणं प्रस्मारयती सतेन स्मृतिद्वारानुभावकत्वेऽस्मा जनकजनकतावच्छेदकसाधारणप्रयोजकत्वरूपानुभावकत्वं शक्तिज्ञान
स्य संभवतीति तावन्मात्रं प्रतिपादनेन स्वर्वापरविरोधाभावात् एतेन व्यक्तिं स्मारयती सनुपयोगि न त्र पूर्वपक्षाकरणात् किंच मत्तो ऽसमानप्रकारकत्वस्य निरू
पितत्वत्वसंबंधेन शक्तांशे शक्तिसंबंधेन परांशे वा पपत्तया जातिप्रकारेण व्यक्तौ शक्तिग्रहस्य प्राग्कथनेन न चैवं जातिशक्तिवादविरोध इत्यप्यसंगतमित्यवि
केषांचिद्दूषणोद्भावनं परास्तं स्मारयती सत्योक्तरीत्यानुभावयतीति तदुपपादकत्वयोगित्वात् पूर्वोपदर्शितरीत्याश[struck through] भ्या
शक्त्यांशे समानप्रकारकत्वस्यैवापेक्षिततया शक्तांशे परांशे वा समानप्रकारकत्वस्य किंचित्करत्वेन व्यक्तौ शक्तिग्रहस्य शब्दतः प्राग्कथनेऽप्यर्थतः प्राप्तत्वान्नाद्य
तार्किकचक्रवर्तिनस्तु ननु जातिशक्तिवादिनां मीमांसकानां मते व्यक्तिराक्षेपलभ्या न तु शाब्दबोधविषय इति तन्मते समानप्रकारकत्वेनापि तन्मते शक्त्यनुभवस्मरस्म
रणयोः शाब्दबोधं प्रति कार्यकारणभावः कथं वा शाब्दबोधे योग्यताबलाद् पदार्थव्यक्तिलाभ इत्युक्तिमिमाशंकते दीधितौ न चैवामिति एवं शाब्दबोधेऽपि व्यक्तिविषय
तास्वीकारे तत्रोपरशाब्दबोधजनकत्वविशेषस्यैव तदवच्छेदकत्वरूपतया व्यक्तावपि शक्तित्वीकारादिति भावः समाधत्ते जातावित्यक्तौ चेत्यादिना अयं भावः प्रमेय
त्वादिजातिप्रकारकशक्तिज्ञानत्वेन कारणता नैयायिकानां तु घटत्वादिविशिष्टघटविषयकशक्तिज्ञानत्वेन कारणत्वमित्येव जातिशक्ति जातिविशिष्टश
क्तिवादयोरर्थाभेदेन तु शाब्दबोधे व्यक्तिर्भासत इति तन्मतं तदेकदेशिनामेव न तत्स्वीकारादिति वदन्ति नव्यमीमांसकमते व्यक्तेरसमानवित्तिवेद्यत्वरूपाक्षेपल

६

भ.प्र.
२३५

मत्वेपि शाब्दबोधविषयत्वाभावेनोक्तरीत्यावतारस्यानुत्थानात् अपरे तु जातिविषयकत्वेनैवेति जातिविषयकत्वप्रकारेणोवेत्यर्थः तृतीया च प्रकारित्वेऽ
वयवस्यास्य ज्ञातेन मन्त्रज्ञानेन तथा च गोत्वविषयकगोपदशक्तिमती गौरित्याकारकधीरेव हेतुर्न तु गोत्वविशिष्टविषयकगोपदशक्तिमती गौरितिधीरिति जातिश
क्तिवादार्थ इति भावः नवत्वविषयकांतवैयर्थ्यमिति वाच्यं अस्यैवैतन्मते दोषत्वात् शक्तिर्नगोत्वविषयिकेति बाधकाभावे शाब्दबोधापत्यातत्सार्थक्यात् न चैवं श
क्तिर्न व्यक्तिविषयिकेति बाधकाभावे शाब्दबोधापत्या व्यक्तिविषयकत्वमपि विशेषणं देयमिति वाच्यं गोदिशेषणतायत्र गोत्वविषयकत्वविशेषणेनैवाहोषार
न च नैयायिकैरपि तादृशबाधकसत्वे तदापत्तिवारणाय तादृशविशेषणप्रक्षेपेण तत्ताविशेषणतादवस्थ्यमिति वाच्यं गोत्वप्रकारेण तत्तद्विशेष्यकशक्तिज्ञानात्तद्रू
पगोविषयशाब्दबोधोदयेन तद्विशेष्यकत्वस्यापि विशेषणात् तथा विशेषसंभवादिति वदंतीत्यकेचित्तु शाब्दानुभवत्वस्यादिमत्वे यथा नानुभवस्यानुभवविषयाकार
णताबोधकः किंतु उद्बोधकविघयात उद्बोधकः तथा चोद्बोधकस्य समानप्रकारकत्वेन हेतुत्वेप्यनुभवस्य समानविषयकत्वेनैव हेतुतया न स्मृतेरस्पष्टहीनत्वया
हितयाहितापत्तिरिति नकश्चिद्दोष इति यथाश्रुतमेव मूलं साधितमाहुरिति संक्षेपः नियतसंस्थानव्यंग्यस्यैव जातित्वनियमे मानाभावादाह उच्चैःश्रवसीति
तदुरासंविज्ञानेति अन्यथा एवं वाद्येतिउः पदवत्गवादिपदमात्रस्यापि समानप्रकारकत्वेन हेतुत्वस्य वक्ष्यमाणत्वेन तदसंगत्यापत्तेरिति भावः अएवंग
वानुभवप्रसंगो द्वैतमेवं वाद्यंथाससंगतिः स्वरीतित्यागस्य त्राप्तरसरस्याशयेनाहहीधिन्मौकश्चिदिति विशेषणाज्ञानसाध्येत्यादिमूलस्य सविशेषणेत्या

राम०
२३५

गंगी

साध्यीसाध्यविशेषणताज्ञानसाध्येति व्याप्तितात्पर्यकतया सामान्यलक्षणानसिद्ध्यतीत्याशयेन शंकते नन्वेति व्याख्यायां विशेषणत्वादित्ति तथा च सामान्यलक्षणा
[illegible]कत्र पिनुमितौ परामर्शादिरूपस्य स्वविशेषणपर्वतत्वादिज्ञानस्य हेतुताया अंगीकारेणसामान्यलक्षणासिद्ध्यतीति भावः दीधितौ वह्निशिष्टेति यत्प्रका
रकेत्यर्थः विशेषणताधीजन्यतावच्छेदकं च प्रकारत्वं न निर्विकल्पज्ञान इति न तत्र व्यभिचारः सामान्येतिपत्तत्त्वरूपसामान्यघटितेनेत्यर्थः त्वभावत्वप्रतियोगित्व
योर्निर्विकल्पकानुपगमेनाघटप्रकारकप्रमस्य व्यभिचारान्नोक्तनियमः साधीयान तत्राह अभावत्वेति असाचत्वात्वादिर्दशः भ्रमप्रकारत्वादितिप्रकारत्वानुप
गमादित्यर्थः तथा च प्रतियोगित्ववदभावत्वस्यापि प्रथमतः संबन्धविधयैव भानमिति भावः यत्तु घटो नास्तीत्यादिविशिष्टबुद्धिपूर्वमभावत्वस्यापि निर्विकल्पको
पगमात्प्रतियोगितायाः संसर्गतयैव तत्र भानादित्ति भाव इति तन्वीनेरुक्तं तन्निंमांसिद्धांतविरोधात् व्याख्यायां अननुभवादितितथा चाभावत्वस्यापि संबन्धविधया भा
नासंभव इति भावः नन्वेवं घटत्वाद्यप्रकारकस्य घटादिप्रत्यक्षस्याननुभवाद्भूतत्वादेरप्यनपस्थितस्येव प्रकारत्वापत्तिः न च प्रमेयत्वादिना घटत्वादिज्ञानेपि घटत्वादि इसा
दिज्ञानविरहात्तत्रस्वरूपतो विशेषणाज्ञानं हेतुरिति वाच्यं प्रकृतेपि तुल्यत्वादत आह यत्तत्त्वेतियत्रेति तन्मतइत्यादिःनेन गुरूणामथ्याख्यामनभ्युपगमेपिनासंगतिः
दीधितौ तज्ज्ञानेतिवन्हिज्ञानेतितद्वह्निज्ञानेतिवार्थः अत्रवस्त्वादिज्ञाननिष्ठजनकतानिरूपितजन्यत्वस्यैवसाध्यत्वं न तु तादृशज्ञा[illegible]त्वावच्छिन्नजनकताद्य.
टितस्य गरुमतेऽप्रसिद्धेः अत एव गुरुमते सिद्धविशेषणतावच्छेदक[illegible]कत्वादिप्रकारकज्ञानत्वावच्छिन्नजन्यताघटितस्य ज्ञानजन्यत्वप्रसिद्धावसाजन्यतावं

ढीयेतिशेषः अभ्युपगमवादः मा पत्त्याभ्युपगमेन वादः गुरुमते तं आह वस्तुत इति अनुमित्यादिष्विति तादृशव्यतिलिंगविपरिणामेनान्वयजते आदिना
शाब्दबोधपरिग्रहः व्याख्यायां व्याप्त्यादिपरिग्रह इति दीधितिस्तु व्याप्त्यादिपरिग्रहादिस्तस्य विभक्त्यंशं विहाय प्रतीकधारणं आदिना शक्तिपरिग्रहः इत्यर्थः प्रतिभाव
र्थः अभ्युपगमवाद इत्येवीजमाह दीधितावत एवेति विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानस्य गुरुमते हेतुत्वाभावादेवेत्यर्थः इत्यादीति इदं ज्ञानिस
र्थकूविन्नयैव पाठः तज्ज्ञानार्थं विशेषणतावच्छेदकप्रकारकज्ञानादिविषयतार्थव्याख्यायां हेतुत्वं कल्पनीयमिति तथा च इदं उमानिसनुमितौ विशेषणतावच्छेदकी
भूतमहत्त्वइदंत्वाभावार्थ सामान्यलक्षणावश्यकीति भावः ननु समस्तसमानहेतुतायां तद्विशेषणादिविषयतानिवेशेपि सामान्यलक्षणाया असिद्ध्या तन्निवेश
कथनस्यानुपयोगापत्तिरत आह प्रत्यक्षस्थल इत्यादिधीयमित्यंतराको ग्रंथः इति निरस्तं इत्यपि निरस्तं एतेन विशिष्टवैशिष्ट्यबोधत्वस्य विशेषणतावच्छेदकप्रका
रकत्वनिष्पजन्यतावच्छेदकत्वेन तादृशस्मरणे व्यभिचारः अनुभवत्वजातौ मानाभावेन तथाविधानुभवत्वस्यापि कार्यतावच्छेदकत्वाभावादित्यतः प्रत्यक्ष इत्यु
क्तं तथा च तथाविधप्रत्यक्षत्वमेव तस्य कार्यतावच्छेदकमिति भावः इत्यपि परास्तं उपदर्शितापसो दुर्वारत्वात् न च स्मरणे व्यभिचारः विशिष्टवैशिष्ट्यवि
षयताया आसत्त्या न अभ्युपगमात् दीधितौ इदंत्वादिनेति ज्ञानं कारणमित्यग्रिमेणान्वयः यत्किंचिदिति ननु फलीभूतधीविषयस्य किं ज्ञानमपेक्षितमिति भा
वः ननु विशेषणज्ञानमिष्टहेतुताकत्वसाधने सिद्धसाधने विशेषणज्ञानत्वावच्छिन्नहेतुताकत्वसाधने न दोष इत्यत आह स्वलेन तु विशेषणज्ञा

नमपीति विशेषणज्ञानत्वावच्छिन्नमपीत्यर्थः तथा विशिष्टज्ञानहेतुः तथा च साध्याप्रसिद्ध्या नानुमानमिति भावः ननु निर्विकल्पकमिति तथा च अभिचाराद्विशे
षणज्ञानहेतुत्वं बाधितमिति भावः शंकते विशिष्टेति। प्राथमिकद्वंद्वत्वविशिष्टधीसत्त्वज्ञानपूर्विकान्तद्विशिष्टज्ञानत्वादित्यनुमानमेव निर्विकल्पके मानमिति
शंकार्थः तत्र च विशिष्टज्ञानत्वं यदि विशेषणज्ञानपूर्वकत्वव्यभिचारिस्यात् विशेषणज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकं न स्यादित्यनुकूलतर्कः स
एव तु न संभवति विशेषणज्ञानत्वेन हेतुत्वस्यैवासिद्धेरित्याशयेनाह दृष्टांताभावादिति विशेषणज्ञानत्वावच्छिन्नहेतुताकत्वेन निश्चितताभावादित्यर्थः तथा चाप्र
योजकसिद्धिरिति भावः दृष्टांताभावादित्यत्र हेतुं पूरयति दीधितौ विशेषणेति हेतुत्वस्येति निरस्तत्वादित्यग्रिमेणान्वयः व्याख्यायां विशेष्यज्ञानादीत्यादिनेति इद
वदीधितौ विशेष्यज्ञानादिकेनेति पाठाभिप्रायेण विशेष्यज्ञानत्वादिनेति पाठे आदिना संबंधज्ञानत्वपरिग्रह इति बोध्यं तद्विशेषणकज्ञानत्वस्येव तद्विशेष्य
कज्ञानत्वादेरपि क्वचित्सहचारसंभवेन विशेष्यादिज्ञानजन्यत्वानुमितेरपि संभवादिति भावः एतेनेत्यादि व्यस्य मारणारीत्या परेण ह दीधितौ मानाभा
वेन चेति निर्विकल्पकसिद्धौ विशेषणज्ञानत्वेन हेतुतासिद्धिः तत्सिद्धौ च तत्कथिताराद्धिर्विकल्पकसिद्धिरित्यन्योन्याश्रयेणाचेत्यर्थः तथा चेष्टापत्त्योक्तप्रतिबंधु
द्धारेपि न क्षतिरित्याह एतेनेति परास्तमित्यग्रिमेणान्वयः व्याख्यायां मानाभावेन उक्तरूपमानाभावेन दीधितौ विशेष्यज्ञानमपि विशेष्यादिज्ञानमपि व्याख्यायां वि
शेष्यत्वादिति इदमुपलक्षणं अतीतानागतसंबंधस्य संसर्गत्वादित्यपि द्रष्टव्यं तज्जन्यज्ञानस्य च सामान्यलक्षणाजन्यातीतानागतविशेष्यादिविषयक

भा

ज्ञानस्य च विशेष्यज्ञानं विशेष्यादिज्ञानं अज्ञाते। तथा च सामान्यलक्षणां जन्यतावच्छेदकं सामान्यप्रकारकतदाश्रयविषयकत्वस्स्वत्वं न तु सामान्यप्रका
रतानिरूपिततदाश्रयविषयताकत्वमसम्भवमितिभावः। एतादृशेति विशेष्यगोचरज्ञानव्यक्तिरूपेत्यर्थः। स्मृतिविरह इति तथा च सार्वज्ञ्यापादने इष्टापत्तिरि
भावः। संशयानुपपत्तिरिति स्वरूपतो घटत्वादिनिश्चयसत्वादिति भावः। प्रतिबंधादिति प्रतिबध्यतावच्छेदकं च निश्चयात्मकत्वं तज्ज्ञानित्वमिति भावः। ए
तेन हरत्वादिदोषस्य प्रतिबध्यतावच्छेदकं न तन्निश्चयत्वमार्थसमाजयस्त्वात् नापितहिशिरोधीत्वं संशयस्यैवानुपपत्तेरिति परास्तं। सामग्री स्वरूपतो
निखिलजातिधीरूपसामग्रीत्यर्थः। ननु घटत्वेपि तदन्यधर्मावगाहने कथं घटत्वांशेऽमात्रप्रकारकघटत्वप्रकारक[illegible]ज्ञानापत्तिरतआह अन्यथेति अ
न्यभावः स्वरूपतो घटत्वप्रकारकत्वं न घटत्वांशेऽमात्रप्रकारकघटत्वप्रकारकत्वं तथा सति जातिमान् घट इति प्रत्यक्षस्यैतत्त्वानुपपत्ते योगिनां सार्वज्ञा
नुपपत्तेश्च किंतु घटत्वनिष्ठनिरवच्छिन्नप्रकारताकत्वं तथा च यथा जातित्वप्रकारकज्ञानस्य स्वरूपतो घटत्वज्ञानस्य च सत्वेन जातिमान् घट इति प्रत्यक्ष
स्य घटत्वनिष्ठजातित्वावच्छिन्ननिरवच्छिन्नप्रकारताद्वयशालितया स्वरूपतो घटत्वप्रकारकत्वं यथा च योगजधर्मजन्यप्रत्यक्षे घटत्वादिवृत्तिधर्मज्ञान
सत्वेन स्वरूपतो घटत्वादिज्ञानसत्वेन वावच्छिन्नानवच्छिन्नप्रकारताद्वयशालितया स्वरूपतो घटत्वादिप्रकारकतया योगिनां सार्वज्ञ्यं तथा सामान्यल
क्षणाजन्यप्रत्यक्षे सामग्रीसत्वेन प्रकारताद्वयसत्वेन स्वरूपतो घटत्वादिप्रकारकतया निरुक्तसार्वज्ञ्यापत्तिर्दुर्वारैवेति दिक्। क्षितिरित्यर्थस्तु सामान्यल

स्यापत्तेरेव विनिगमकत्वात् न च तत्तद्घटादिज्ञानरूपोपनायकज्ञानकारणतायां व्यभिचार इति वाच्यं उपनायक ५

लक्षणाया निर्विकल्पकजनकत्वमेव समीचीनं तत्तद्घटादिज्ञानरूपोपनायकज्ञानजन्यतावच्छेदककोटौ सामान्यलक्षणाजन्यप्रत्यक्षे व्यभिचारवारणाय
घटत्वाद्यप्रकारकत्वानिवेशेन लाघवात् सामान्यलक्षणाया निर्विकल्पकजनने व्यभिचाराभावात् न च तन्निर्विकल्पक एव व्यभिचार इति वाच्यं अवच्छिन्नविषय
ताया ज्ञानलक्षणाजन्यतावच्छेदककोटौ निवेशात् न च यत्र प्रमेयत्वादिसामान्यलक्षणया प्रमेयत्वाद्याश्रययावत्प्रमेयगोचरं निर्विकल्पकं जनितं तत्र
सार्वज्ञापत्तिरिति वाच्यं प्रमेयत्वादिसामान्यलक्षणया निर्विकल्पकानंगीकारात् घटत्वादिसामान्यलक्षणायैव निर्विकल्पकोत्पत्तिस्वीकारात् न च वि
निगमनाविरहः सार्वज्ञ्यज्ञानकार्यतावच्छेदककोटौ प्रमेयत्वाद्यप्रकारकत्वनिवेशात् तस्मात् सामान्यलक्षणाया निर्विकल्पस्वीकारे तदुपनायकज्ञानका
र्यतावच्छेदककोटौ घटत्वाद्यप्रकारकत्वानिवेशेन लाघवात् सामान्यलक्षणातो निर्विकल्पकस्वीकार एव समीचीनः दीधितौ तदजनकत्वे वि
तिपाठे तु शाहस्तु वितथत्वरसोप्ययमेवेति तद्विशेष्यज्ञानमिति विशेषणज्ञानं तु बाधकाभावात्कारणमेवेति भावः दीधितौ निरस्तमिति यत्तु विशेषणा
ज्ञानहेतुत्वे ज्ञानलक्षणायाः स्वातंत्र्येण कारणत्वं न कल्पत इति लाघवाद्विशेषणज्ञानहेतुत्वमिति तदसत् तावतापि विशिष्टप्रत्यक्षत्वेनैव विशेषणज्ञा
नजन्यतावच्छेदकत्वसंभवेनानुमित्यादावपूर्वव्यक्तिभानानुरोधेन सामान्यलक्षणासिद्धेरसंभवात् इति श्रीमन्महादेवविरचिते भवानंदीप्रकाशे
सामान्यलक्षणापूर्वपक्षप्रकाशः

दोषितावनंगीकारेपीति संशयत्वस्यार्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वेन तद्धेतुत्वेमानाभावादि

तिभावः अपि नातद्धेतुत्वांगीकारसमुच्चयः संशय एवेति एवकारो वधारणे व्याख्यायां स्यादिति तथा च तद्धर्मितावच्छेदकप्रकारकत्वाद्धेतन्यप्रकारकज्ञानस्य हेतुतायां विशेषणताव
च्छेदकप्रकारकज्ञानविधया हेतुतायां समानविषयकत्वनिवेशप्रयोजनाभावेन तस्यैव स्वप्रकारवत्त्वसंबंधेन संनिकर्षत्वकल्पनात् ज्ञानधर्मिणां संशयविषयता
नुपपत्तिः प्रसिद्धधूमविशेष्यकधूमत्वप्रकारकज्ञानस्यैव सत्वादिति भावः धीर्धितावच्छिन्नावादिसामान्यलक्षणायाः प्रत्यासत्तित्व इत्यादिः तद्धर्मप्रकारकेति तथा च धर्मि
ज्ञानस्य धर्मिणां प्रत्यासत्तित्वमेव सामान्यलक्षणायाः प्रत्यासत्तित्वं न तु ज्ञानलक्षणाया इति भावः व्याख्यायां संप्रतिपन्नो सर्ववादिसिद्धत्वे लाघवात् हस्ताग्रपविशे
ष्यकेति नसावर्ह्येते निर्विकल्पकस्य जन्यतावच्छेदककोटौ अकीर्तनादिति भावः तत्तद्व्यक्तित्वादिति आदिना तद्वृत्तिधर्मप्रकारकत्वपरिग्रहः तद्वृत्तीत्यस्य च सामान्यवृत्तीत्यर्थः इति
धेयम् स्वत्वे च ज्ञानलक्षणावैयर्थ्यं ईश्वरज्ञानरूपसामान्यप्रत्यासत्त्यैवोपपत्तेरित्याह इत्थं चेति सर्वदा सामान्यप्रत्यासत्तिजन्यज्ञानापत्तेराह यदा चेति विशिष्यधर्मिनि
वेशप्रयोजनमाह नघटत्वादिति विशिष्येन्द्रियनिवेशप्रयोजनमाह नचेति तत्त्वापीति तत्त्वयापि घटत्वादेरिव प्रमेयत्वादेः प्रत्यासत्तित्वोपगमादिति भावः प्रत्यासत्तितायाः इति
विशेषणताविशेषेतो मादिः हेतुत्वस्येति धर्मितावच्छेदकप्रकारकज्ञानविधयेत्यादिः तेन घटत्वादेः प्रत्यासत्तित्वादिना प्याकाशाभावादीनां प्रत्यासत्तित्वोपगमे न तेषां प्रत्या
सत्तितापत्तिः कथमीश्वरज्ञानस्य प्रत्यासत्तित्वं इत्यभिप्रायेण शंकापि निरस्ता धर्मितावच्छेदकप्रकारकज्ञानस्यैव प्रत्यासत्तित्वोपगमात् सामानाधिकरण्येन सामानाधिकरण्य
मात्रेण एवमग्रेपि न तु तद्विषयतानिरूपितविषयतासंबंधेन तद्बुद्धिं प्रतितदभावविषयतानिरूपितविषयतासंबंधेन तदभाववन्निष्ठयस्य समानविषयकत्वमात्रेण प्रतिबंध

कत्वं कस्या तेन तु प्रतिबंधकतावच्छेदककोट्यवच्छेदकत्वविषयतापि निवेशपते गौरवात् तथा च प्रसिद्धधूमे संशयोनुपपन्न एव व्याप्तिनिश्चयसत्वादिति सामान्यलक्षणाव
गाहीमत आह दीधितौ कथमन्यथेति व्याख्यायां समानविषयकत्वेति उक्तरीत्या दि: संदेहोपपादने पो तिसामान्यलक्षणाये ख्यादि: कुत्र संदेह इति तथा चात्र सामान्यलक्षणा
पाधिनसंदेहोपपत्तिरिति भावः प्रवस्तु पक्षं भइति तथा चोक्तरूपविषयकसंशयानुपपत्तानत्सामानाधिकरण्यमात्रावगाहिविशिष्टबुद्धौ तदवच्छेदेन विरोधिनिश्चयसत्वेवि
रोधितयोक्तरीत्या समानविषयकतया विरोधित्वाभावेन प्रसिद्धधूमे एव संशयोपपत्तौ न तदनुरोधेन सामान्यलक्षणावश्यकत्वमिति भावः समानविषयकतामात्रेणैव विरोधित्वे
अतिरिक्तसंभावनायाउद्भेजकत्वाभ्युपगमाद्युक्तरूपविषयकसंशयानुपपत्तिरित्याशयेनाशंकते दीधितौ नचेति व्याख्यायां अनुपस्थितातिरिक्तेति कर्मधारयः अतिरिक्तसंभाव
नापदार्थं विकल्पयति दीधितौ यत इत्यादिना रूपेष्विति नचैतस्याः संभावनायाः पूर्वं यत्किंचिनभिमतत्वात् तस्या अतिरिक्तसंभावनापदार्थत्वं उनमिध्ययोजनमिति वा
च्यं वाद्विवक्षिया वंतोऽर्थाः संभवतितावतां द्रव्यत्वसंवदसां प्रत्यक्षपि कृत्वा तद्रूपान्नरूपमिति नचोद्देश्यतावच्छेदकविधेययोरैक्येनास्मच्छाब्दत्वानुपपत्तावस्मत्वमेव वाच्यं तथा
चरूपामेत्वेन सकलतद्रूपामोपस्थितमर्थं सामान्यलक्षणावश्यकीति वाच्यं अस्मानुमितित्वरूपतया तन्मतस्य मप्रत्यक्षरूपतया वा तस्याश्चनावश्यकत्वात् द्रव्यादय इत्यादिपदं कर्मादिपर
मित्याशयेनाह व्याख्यायां द्रव्यकर्मेति दीधितौ रसादय इत्यादि परात्तगंधादिसकलगुणपरिग्रहः समानविषयकत्वेन प्रतिबंधकत्वेपि समानधर्मितावच्छेदकत्वं निवेशनीयमित्या
शयेनाव्याख्यायां संशय इति तद्धि तद्रूपे रोतिसमानविषयकत्वेन प्रतिबंधकमते महानसीयधूमो वह्निव्याप्य इति निश्चयस्यापि धूमत्वेन तद्विषयके धूमो वह्निव्याप्यो न

सर्वमित्युक्तं नतु धर्मितावच्छेदकावच्छिन्नत्वबोधनाय समानविषयकतामात्रेणाप्रतिबंधकतामतेन स्यात् १५

वेतिसंशयेप्रतिबंधकतयातदुपपत्तयेतदवच्छेदकं समानधर्मितावच्छेदकत्वं नययोसिद्ध दित्यमिति सूचनायतत्पक्षे येरोसमनुत्थानात दृष्टितरूपेरोसुक्तं अतराव समानधर्मिताःवच्छेदक
त्वांतर्भावेराप्रतिबंधकतादेवतद्रूमत्वेनतद्रूमव्यक्तित्वेन एतदपि संशयस्य साध्यो क्तं विशेषित्वमपि समानविषयकतामात्रेणाप्रतिबंधकतावादिमते वस्तुगत्या तन्न न समानध
र्मितावच्छेदककत्वांतर्भावे इत्याशयेनाहाभ्युपेत्येति उपपादयति प्रसिद्धरूपभिन्नत्वधर्मितावच्छेदकक विशेषदर्शनप्रदर्शनेनातिरिक्तसंभावनायाअप्रयोगमुपपादयति
प्रसिद्धरूपेक्षि पृथिव्यादिरूपे वा युक्तताभावव्याप्यता निर्णायसत्वे इत्यादि संशयायोगात् रूपं वायत्वाभावव्याप्यं न वेति संशयायोगात् तत्स्वरूपं वायुरन्नित्र वेतिसंशय प्रर्मवसा
नेनतदानीमननुभवादिति भावः तद्धटितेति प्रसिद्धरूपभिन्नत्वघटितेन मर्थः इत्यादिवेतिप्रश्नादिनागंधादिसकलगुणात्कर्मादिस्वसकलपदार्थपरिग्रहः दीधितौ तत्सर्वमि
त्यत्र तेषां सर्वेषां विशेषदर्शनविषयत्वबोधनाय योगादिति ज्ञेयं आख्यायां इमर्थः इति भावार्थः केचित्तु गौरवेरोतिहपत्वावच्छेदेन वायुत्वाभावव्याप्यत्व निश्चयेपि क
दाचिदतिरिक्तसंभावना संभवेनतादृशनिश्चयाभावविशिष्टासौ ते जिकृत्वायात तथाच लाघवेन रूपत्वावच्छेदेनैतन्निश्चयएव रूपवायुत्वाभावव्यभिचारीतिग्रहे विरोध्यस्ति
तिभावइत्याहुः दीधितौ नापुक्तइति तथा वोक्तसंशयासंभवान्नुपपद्यमानसामान्यलक्षणासिद्धस्संभवतीति भावः सामान्याभावेतिघटादिसामान्याभावेन र्थः आख्यायां
संनिकर्षार्थ वेति सामान्यलक्षणास्वीकार इतिशेषः नैयायिकस्येति मीमांसकेस्सामान्यलक्षणानंगीकारादिति भावः मानाभावादेतीति अथ प्रतियोगिज्ञानमूलकं
लेनेसाकारकप्रतियोग्यमिश्रिताभावप्रसक्तापत्तिरेवतत्रमानं न चतादृशप्रसक्तापत्तिरेव न तरापत्तिरितिवाच्यं अभावत निर्विकल्पस्य सिद्धांतेनंगीकारेणोद्दियस

वद्धविशेषणतेंद्रियसंबद्धविशेषणताविशेषणताभ्यामभावाभाववत्त्वयोर्विषयतयाभावप्रत्यक्षापत्तेरेवंतादृशापत्तिपर्यवसानादिति चेन्न तदंगीकारेपि भूतले घटवत्व
प्रमकाले इत्यादिवक्ष्यमाणरीत्येंद्रियसंबद्धविशेषणताया विशिष्टहेतुत्वस्यावश्यकतया तादृशापत्तिवारणात् व्यभिचारइति तज्ज्ञानं विना तत्वकारकज्ञानासंभवा
दिति भावः नन्वेवमपि केवलाभावत्वादिना तत्वस्य व्यभिचारो दुर्वार एवेति वाच्यं तद्धेतोः किं प्रत्यक्षे तन्निष्ठेदंत्वस्य नियमेन भानांगीकारात् लाघवादाहत्ताव विशेषइति दी
धितिविरहत्वादिनेति आदिना तत्वादिपरिग्रहः इदंत्वस्य ज्ञानविशेषात्मकतया तुल्यमायेन तत्वादेरपि तद्रूपतया तद्रूपेन तत्वादेरिदंत्वस्य च भिन्नत्वादिति भावः एतेन
तत्वादेरिदंत्वस्य चाभेने तत्वादेनीपदेन परिग्रहस्संभवति तथा सति तत्वादेरिदंत्वभिन्नत्वेन द्रुमयोर्नजोभाववत्वात्मकत्वमभेदापत्तेरितितेजोभाववत्वेनेति ग्रंथविरोधापत्तेरिति
केषांचिद्दूषणोद्धारणपरास्तं वस्तुगत्याभेदेपीदंत्वस्य तेजोभाववत्वात्मकत्ववादिमते तत्वादेरपि तदात्मकतयाभेदांगीकारेणात्मनत्वहानाप्रत्यक्षस्य तेजोभाववत्वेनेति ग्रंथस्या
विरोधात् उपस्थितइति इदंत्वसंशयनिर्वाहकधर्मितावच्छेदकप्रकारकज्ञानसत्वस्य चनाय व्याख्यायां तमेभिन्नइति अभावे इति शेषः तेन तमोभिन्नो घटाद्यभावे इदंतेन भा
नेविवादाभावेपि न क्षतिरिति ध्येयं संशयायोगादिति अभावत्वधर्मितावच्छेदककाभाववत्संशयायोगादिति भावः प्रतियोगिनिर्विकल्पकानंतरमनुभवविरुद्धस
घटाद्यभावप्रत्यक्षस्यापत्तेरेवाभावप्रत्यक्षे प्रतियोगितावच्छेदकरूपेण प्रतियोगिज्ञानस्य हेतुत्वे मानं तत्र तद्धेतुत्वे वीन्द्रियसंबद्धविशेषणतायां अभावप्रत्यक्षत्व
स्यैवकार्यतावच्छेदकत्वेन तद्दत्वाद्घटनिर्विकल्पकानंतरं घटाभावप्रत्यक्षापत्तिर्दुर्वारा घटत्वरूपेणाद्य घटज्ञानं विनापि यापटत्वादिरूपेण यटादिज्ञानसहकारेणापटा

घभावप्रत्यक्षं न तेन घटत्वरूपेण घटज्ञानविरहस्य किंचित्करत्वादित्याशंकार्या तस्मा अपि तु तद्धर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे तन्निष्ठहेतुताया आवश्यकतया तस्मा
त्तद्रूपेण प्रतियोगिज्ञानसहकृतायास्तद्धर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षोत्पादकत्वांगीकारेण प्रतियोगिज्ञानहेतुत्वेनोक्तापत्तिरिति समाधानमित्याशयेनाह ननु
भूतल इत्यादि अभावत्वप्रकारकस्येति योगितया घटीय इत्याकारकस्येत्यर्थः पटाभावत्वादिना घटाभावावगाहिनिश्चयसत्त्वे पटो नास्तीत्यादिप्रत्यक्षे व्यभिचारवारणाय घट
त्वरूपेण घटज्ञानकार्यतावच्छेदके घटत्वावच्छिन्नप्रतियोगिताकत्वावगाहित्वस्यावश्यं निवेशनीयतया इंद्रियसंबद्धविशेषणताया अपि कार्यतावच्छेदकेऽवश्यं निवेश
नीयमन्यथा तत्रैव व्यभिचारेण घटत्वरूपेण घटज्ञानस्य तस्याः सहकारित्वासंभवादित्याशयेनाह प्रतियोगिताकत्वावगाह्यभावप्रत्यक्षत्वमित्यनेनैवेति वाच्यमिति शेषः घ
टत्वावच्छिन्नप्रतियोगिताकेति घटत्वावच्छिन्नप्रतियोगिताकत्वावगाहीत्यर्थः तेनोक्तभ्रमे न व्यभिचारः इत्येव इत्याद्येव पर्यवसितमिति दुरुद्धरो व्यभिचार इति भावः व्यभिचा
र इति सामान्यलक्षणापेदंत्वादिनावगाहने इत्यादिः तस्मात्तद्धर्मावच्छिन्नप्रतियोगिताकत्वावगाहित्वाभावेन प्रतियोगिज्ञानकार्यतावच्छेदककोटौ नाकांक्षितत्वादिति भावः तेनेति तथा च
विशेष्ये विशेषणमित्यादिविषयताशालिभावप्रत्यक्षानंगीकारेण विशिष्टवैशिष्ट्यबोधात्मकं च विशेषणतावच्छेदकप्रकारकनिश्चयसापेक्षत्वेन निर्विकल्पकोत्तर
मभावप्रत्यक्षापत्त्यसंभवेन तत्प्रतियोगिज्ञानहेतुत्वसामान्यमपि कल्पकमेवेति भावः ननु प्रतियोगिज्ञानस्य सत्त्वांगीकारे हेतुत्वेऽपि विशेषणतावच्छेदकप्रकारकविशेषणानिश्च
यस्य हेतुत्वानुरोधेनैव सामान्याभावभाने यावत्प्रतियोगिरूपविशेषणनिश्चयार्थं सामान्यलक्षणांगीकारस्यावश्यकत्वात् तत्राह नन्विति तथा च विशेषणतावच्छेदकप्रकारकनि

श्रूयमाणत्वस्यैव तत्रापेक्षणीयत्वेन विशेषणतानिश्चयस्यानावश्यकतया न सामान्यलक्षणासिद्धिरिति भावः द्वितीये तु सामान्याभावधीविषयीभूतत्वरूपप्रतियोगिसंनिकर्षार्थं सामा
न्यलक्षणाङ्गीकारे तु अन्वयव्यतिरेकाभ्यां तज्जनकतायां विशेषणाविषयकत्वनिवेशस्यावश्यकत्वमित्याशयेनाह पूर्वोक्तेति घटत्वप्रकारकज्ञानत्वरूपेणेत्यर्थः अन्वय
व्यतिरेकाभ्यामेवासिद्धावित्याशयेनाहाभ्युपेयमिति तदाशयेनोक्तं दीधितौ हेतुत्वेपीत्यपि शङ्कापादानं एवं दीधितौ प्रतियोगिज्ञानस्य हेतुत्वेपीत्यस्य प्रतियोगिघटादिरूप
विशेषणाविषयकत्वस्य विशिष्टवैशिष्ट्यबोधजनकतावच्छेदकत्वेपीत्यर्थ इति ध्येयं केचित्तु ननु विशिष्टवैशिष्ट्यबोधीयविलक्षणाविषयतानभ्युपगमेन प्रतियो
गितावच्छेदकप्रकारकयावत्प्रतियोगिज्ञानत्वेन हेतुत्वमावश्यकं अन्यथा सामान्याभावभानस्य यावत्प्रतियोगिविषयकतानुपपत्तिः संनिकर्षाभावादिति प्रागल्भ्या
भिप्रायस्तदाशंकायां तद्दूषयति दीधितौ प्रतियोगिज्ञानस्येति विशिष्टवैशिष्ट्यबोधीयविलक्षणाविषयतानभ्युपगमेन प्रतियोगितावच्छेदकप्रकारेणोत्पादितं संभ
वात् सामान्याभावप्रत्यक्षसंभवात् इदं चाहेतुत्वादित्यत्र हेतुः तथा च यावत्प्रतियोगिविषयकत्वमेव तस्यासिद्धमिति भावः एतादृशव्याख्याने च ग्रन्थे द्वितीयकल्प
दूषणाप्रयुक्तोनसंदर्भविरोधः प्रतियोगिज्ञानस्येतिग्रन्थस्यापि द्वितीयकल्पीयत्वेन तद्दूषणासमर्थत्वाभावादिति प्राहुः अन्ये तु प्रतियोगिज्ञानशून्यकाले इन्द्रियसंबद्धविशेष
णतारूपसंनिकर्षसत्त्वे प्रतियोग्यमिश्रितनैराकारकप्रत्यक्षवारणार्थमभावप्रत्यक्षे प्रतियोगिज्ञानहेतुत्वमावश्यकं तन्वैवमपि तस्य घटत्वाद्यवच्छिन्नप्रकारताशाल्यभावप्रत्य
क्षत्वमेव जन्यतावच्छेदकं वाच्यमन्यथा घटाभाववत्तादिना घटाद्यभावप्रत्यक्षे व्यभिचारापत्तेरिति तद्धेतुत्वेप्युक्तापत्तिर्दुर्वारेति वाच्यं इन्द्रियसंबद्धविशेषणताया अप्युक्तरी

सैवविषयभेदेनहेतुतयोक्तोभयसंभवादतआहस्वीयेतिप्रतियोगिविशेषितेति तथाचविशिष्टवैशिष्ट्यबोधस्यलौकिकत्वहेतुतयैवनिर्वाहेहेतुहेतुमद्भावएवेतिभावः नन्वेव
मिंद्रियसंबद्धविशेषणतायाअनंतहेतुतापत्तौगौरवेणास्वीकार्यत्वेऽपि तद्धेतुत्वमेवसम्यक् नचतत्वाप्युक्तरीत्यातस्याअनंतहेतुत्वमावश्यकमितिवाच्यं मन्मतेऽभावत्वावच्छि
न्नप्रतियोगितयाघटप्रकारकत्वेसतिघटातिरिक्तप्रकारकं यत्तद्भिन्नाभावत्वप्रकारकाभावलौकिकप्रत्यक्षत्वादेरेवघटत्वप्रकारकघटज्ञानादिकार्यतावच्छेदक
त्वेनतेनैसाकारकप्रत्यक्षस्यघटपटादिरूपयावत्प्रतियोगिज्ञानकार्यतावच्छेदकाक्रांततयाप्रतियोगिज्ञानेऽसत्त्वकालेऽभावप्रत्यभावेनतस्याएकहेतुत्वेपर्यवसानात् अथै
वमपियत्रपटाभावत्वादिनाऽत्मात्मकेऽपिपटोनास्तीत्याकारकंघटाभावप्रत्यक्षंजायतेतत्रघटोनास्तीत्याकारकघटाभावप्रत्यक्षापत्तिः तादृशज्ञानस्यघटाप्रकारकघटाति
रिक्तप्रकारकज्ञानभिन्नत्वाभावेनघटत्वप्रकारकज्ञानजन्यतावच्छेदकानाक्रांतत्वादिति चेन्न प्रतियोगितासंसर्गावच्छिन्नघटत्वावच्छिन्नप्रकारतातिरिक्तप्रकारत्वानिरूपि
ताभावत्वावच्छिन्नविषयताशालिप्रत्यक्षत्वावच्छिन्नेघटत्वप्रकारकज्ञानस्यहेतुतयोक्तापत्त्यभावात् इत्थंचनानाधर्मावच्छिन्नप्रतियोगिताकसमनियताभावानामैक्ये
पिनक्षतिः उपदर्शितरीत्याकार्यकारणभावेनैवतत्रव्यभिचारवारणसंभवात् नचैवमपिकार्यतावच्छेदकगौरवमितिवाच्यं इंद्रियसंबद्धविशेषणतायाअनंतकारणता
कल्पनेनैवलाघवस्यापरामृष्टत्वादिति मिश्रानुयायिनांमतमवलंब्याह प्रतियोगिज्ञानस्यहेतुत्वेपीति अत्रापिशब्दोऽस्वरससूचनायतथाहि इंद्रियसंबद्धविशेषणताया
एकहेतुत्वेप्रतियोगिज्ञानहेतुतामतेऽपिघटज्ञानकालेऽभावोनघटीयइतिसंसर्गग्रहेनेसाकारकप्रत्यक्षापत्तिर्दुर्वारा नचघटपटादिरूपयावत्प्रतियोगिज्ञानरूपकारण

बाधादेव नोक्तापत्तिरिति युक्तमेवेति वाच्यं यावद्व्यक्तिप्रतियोगिज्ञानं विनापि घटो नास्तीति प्रत्यक्षोदयेनेंद्रियसंबद्धविशेषणतायाः फलजनने यावद्व्यक्तिप्रतियोगिज्ञानस्य विशेषसामग्रीता
संभवेन तथापत्तिसंभवात् पटादिव्यक्तिज्ञानसहकृतस्याभावो न घटीयइतसंसर्गाग्रहादेरेवं पटज्ञानसहकृतस्याभावो न पटीयइतसंसर्गाग्रहादेरेकैकस्य विशेषसामग्रीत्व
मभ्युपेत्योक्तापत्तिवारणं संभवतीति विभाव्यते यत्ते तदा प्रतियोगिज्ञानस्य त्वावच्छेदेन हेतुत्वानभ्युपगमेपि न क्षतिः विशेषणतावच्छेदकप्रकारकज्ञानविधया तस्यावश्य
पेक्षणीयेनेंद्रियसंबद्धविशेषणतायाः फलजनने विशेषसामग्रीतया तस्यापेक्षणसंभवात् इत्थं च मयापींद्रियसंबद्धविशेषणताया विशिष्य कार्यकारणभावो नांगीक्रि
यते किंत्वलौकिकचाक्षुषत्वाद्यवच्छिन्नं प्रत्येव घटज्ञानादेरेव विशेषसामग्रीतया सहकारित्वोपगमे न तदुक्तरीत्यैव नैसाकारकप्रत्यक्षवारणसंभवात् इदंत्वप्रकारकाभाव
प्रत्यक्षानुपगमादिदंत्वोपस्थितेरपि विशेषसामग्रीत्वाभ्युपगमाद्वा न तदनुपपत्तिरपि एवं च मन्मते विशिष्येंद्रियसंबद्धविशेषणतायाः कार्यकारणभावएव नास्ति
कुत्रास्तु रकल्पनप्रयुक्तलाघवं मिश्राणामिति तन्मतमनुपादेयमेवेति वदंति अधिकमनुमितिलक्षणएव प्रागभिहितं तद्घटप्रतियोगिकेति तद्घटव्यक्तिप्रतियोगिकेत्यर्थः त
द्घटज्ञानत्वेन तत्तद्व्यक्तिज्ञानत्वेन हेतुत्वेति तज्ज्ञानस्य भ्रमकाले तदभाववैज्ञानापत्तिवारणाय वस्पष्टीति शेषः दीधितौ माभावादिति एकरूपेण तज्ज्ञानादस्तद्रूपावच्छिन्नतस्या
व्यक्तसत्त्ववारणाय तद्रूपावच्छिन्नाभावप्रत्यक्षे तद्रूपप्रकारकज्ञानस्य हेतुत्वावश्यकत्वे व्यक्तिभेदेन हेतुत्वांतरे प्रमाणाभावइत्याशयः व्याख्यायां प्राचीनेरेवेति स्वमते समनि
यताभावैकैकेन व्यभिचारो बोध्यः यावत्तेजोज्ञानादिति तादृशेत्यादिः एवमग्रेपि तदर्थं यावत्तेजोज्ञानार्थं सामान्यलक्षणां अंगीकार्येति तथा च प्रतियोगिज्ञानहेतु

तमस्तेंधकारप्रमक्षानुरोधेनसामान्यलक्षणासिद्धिरितिभावः स्वपरेति अत्रचक्षुरालोकद्वारा कुड्यादिसंबंधकारसत्तापरस्वप्रकाशकत्वमुक्तं तच्चोद्भूतरूपवन्महत्त्वंसुवर्णादिम
तितत्सत्तायपरप्रकाशकत्वमुक्तं तच्चसंयोगेनचाक्षुषजनकत्वं तथाचद्रव्यवृत्तिद्रव्यवैजात्यविशेषावच्छिन्नसामान्याभावोंधकारइतिपर्यवसन्नं नचात्रयत्किंचि
त्संबंधेनतादृशाभावस्तेजोविशेषवत्यपिसंबंधसामान्येनतादृशाभावश्चनांधकारस्यसत्त्वापीतिवाच्यं संयोगेनतादृशाभावस्यैवांधकारत्वात् नचैवमालोकेंधकारप्रस
पात्तिः स्वस्मिन्संयोगेनस्वाभावादितिवाच्यं तच्चाक्षुषानुरोधेनतत्रापिसंयोगेनालोकांतरसत्त्वस्यावश्यमभ्युपेयत्वात् यत्तुतेजोविशेषत्वमुद्भूतानभिभूतरूपवत्तेजस्त्वं
तरावच्छिन्नसामान्याभावएवांधकारइतिनव्यैरुक्तं तच्चिंत्यं आलोकद्वाराकुड्यादिसत्त्वेंधकारासत्त्वप्रसंगात् नील[illegible]मरकतादिप्रभारूपस्यनीलत्वापादिरूपाभिभूततत्त्वान्नीलम
रकतादिप्रभासत्त्वेप्यंधकारसत्त्वप्रसंगाच्च अत्रेदमवधेयं तेजोविशेषसामान्याभावत्वंनांधकारत्वं तथासतिरूपादावप्यंधकारप्रसक्षापत्तेः नचचक्षुःसंयुक्तविशेषतात्ता
स्यैवतद्ग्राहकत्वांगीकारान्नोक्तापत्तिरितिवाच्यं एवमप्यनुमानादिनातद्गृहेरूपादौतद्व्यवहारस्यदुर्वारत्वात् नचांधकारादिपदसमभिव्याहृतसप्तम्याद्यनुयोगिक
विशेषणतावच्छिन्नाधेयताबोधकत्वस्यांगीकारान्नोक्तव्यवहारइतिवाच्यं तथाप्यंधकारेंधकारइतिप्रतीतिव्यवहारयोरनुपपत्तेः नचेष्टापत्तिरनुभवविरो
धात् अंधकारद्वयसत्त्वादिनाखंडनकारैराद्येइयसत्त्वेनांधकारेंधकारसत्त्वेनतत्प्रतीतिव्यवहारयोःस्वीकाराच्च किंचतादृशाभावत्वस्यांधकारत्वाभ्युपगमेतेंधकार
स्तेजोविशेषसामान्याभावइतिसहप्रयोगानुपपत्तिः एवंतेजोविशेषत्वाननुसंधानेप्यंधकारप्रतीत्यनुपपत्तिस्तस्मात्तदभाववत्त्वस्यरूपंविषयताविशेषेणज्ञानविशे

घोवांधकारत्वं यत्रांधकारप्रतीतिव्यवहारौ तत्रैव तादृशांधकारत्वविशिष्टाधिकरणस्याभ्युपगमाच्चानानुपपत्तिः अत एव पूर्वमतएवेदं त्वादिनोपस्थितद्रव्येति ग्रंथव्याख्या
नादृशरीत्ये जो भावत्वं न द्रव्यत्वं किंतु स्वरूपेणानंतद्रभावव्यक्तिव्यक्तित्वानि विशेषो वेत्यिव्याख्यापि तादृशाशयमूलिकास्वरसतस्संगच्छत इति दिक् ननु ध्वंसप्रागभा
वयोरन्यताभावविरोधेन ध्वंसप्रागभावाधिकरणे सामान्याभावासंभवेन कथमुक्तसामान्याभावस्यांधकारत्वसंभव इत्यत आह ध्वंसेति प्राक् व्यधिकरण
धर्मावच्छिन्नाभावघटितप्रथमलक्षणे दीधितौ नाभावसमुदायइति संयोगासंबंधावच्छिन्नतेजस्त्वावच्छिन्नप्रतियोगिताकत्वेजो विशेषाणां त
तदन्यत्वभावसमुदाय इत्यर्थः तेन ध्वंसादेः प्रतियोगितावच्छेदकसंबंधानंगीकारेपि न क्षतिः व्याख्यायां प्रागभावध्वंसयोरिति आद्यपनाशजन्यध्वंसस्या
प्यत्र संभवोपि संभवति न तु प्रागभावस्येति प्रागभावस्याभ्यर्हितत्वमिसाशपेन प्रागभावस्य पूर्वनिपातः यत्र यावद्व्यक्तित्यावद्व्यधिकरणतेज
सांध्वंसप्रागभावयोरंधकारपदार्थानंतर्भावेनात्रासंभवेपि न दोष इत्याशयः कुत्रचिद्व्यक्तिजो भावे त्वमोव्यवहार इत्यस्य सिरोंतुमशक्यतादृक्
चेति तथाचेत्ति तथाचाभावेयावत्तातानिवेशेनेव्यधिकरणतेजसांध्वंसप्रागभावयोरन्यत्रासंभवेपि न दोष इति भावः दीधितौ अननुगमादिति नानात
रननुगतधर्माभावादित्यर्थः व्याख्यायां यावदभावेति तत्सामान्याभावप्रसक्त्या एवं निष्प्रमतत्वाद्विशेषाभावकूटेपि संनिकर्षसत्वादिति भावः अंशतः कत्वादिति
सामान्यलक्षणया पायीसादिः तथा चांधकारस्यासर्वतापमेयत्वापत्तिरिति भावः तदधिकरणोत्पत्तितेजस्त्वादिनेति व्याख्यायां नाम्नाधिकरणान्यत्पत्तितेजस्त्व

परीयत्वात्तेजस्त्वस्य व्यधिकरणत्वात्तेजःसाधारण्येन ध्वंसप्रागभावप्रतियोगितावि प्रसक्तेरतस्तदनतिप्रसक्तं धर्ममाह तत्कालीनावच्छेदेनेति ध्वंसप्रागभा
वकालावच्छेदेनेत्यर्थः व्यधिकरणत्वात्तेजोनिष्ठतदधिकरणवृत्तित्वस्य तत्कालानवच्छिन्नतया नैतस्यातिप्रसक्तत्वमिति भावः तत्प्रतियोगितावच्छेदको
वच्छिन्नेति अत्रावच्छेदकत्वं च स्वरूपसंबंधरूपं बोध्यं तेन तेजस्त्वादेस्तन्नष्टत्वादिरूपावच्छेदकत्वेपि न क्षतिः कथमिति तेजस्त्वादेस्तादृशप्राग
भावादिप्रतियोगितावच्छेदकत्वाभावादिति भावः अस्मंताभाव इति अग्रेतनेन्वकारोत्र संबध्यते तथाभावात् तत्प्रतियोगितावच्छेदकावच्छिन्नाभावप
त्पक्षत्वस्य कार्यतावच्छेदकत्वात् अत एव अस्मंताभाव एव तथाभावादेव घटत्वाद्यवच्छेदेनैव घटत्वाद्यवच्छिन्नप्रकारताक[illegible]हेनैव त
थाच यथा घटध्वंसप्रागभावादीनां घटत्वाद्याश्रयप्रतियोगिकत्वेन प्रत्यक्षं तथांधकारघटकतेजोध्वंसप्रागभावयोरपि तेजस्त्वाश्रयप्रतियो
गिकत्वेन प्रत्यक्षसंभवान्नानुपपत्तिरिति भावः अनावश्यकत्वादिति तथा च तेजोभावकूटेंधकारप्रतीतिविषयत्वं न संभवतीति भावः मात्रेति अ
नेन सामान्याभावभानानुरोधेन सामान्यलक्षणाया आवश्यकत्वेपीति सूचितं अन्यथा न्यायसामान्यलक्षणां विना मदुक्तदिशा अस्मंताभावे
इंद्रियसंबद्धविशेषणताया एवमुक्तरीत्या दीधितौ न प्रतियोगिज्ञानमिति इदं च वक्ष्यमाणगतिमनुरुध्योक्तं वस्तुतस्तत्प्रतियोगिज्ञानापेक्षा सापि न क्षतिः
अनागतानामप्यनुमानाज्ज्ञानसंभवस्य स्वयमेव वक्ष्यमाणत्वात् विनापि ना सामान्यलक्षणां शेषवक्ष्यमाणत्वादिति ध्येयं व्याख्यायां सन्निकर्षार्थमेव सामा

मलक्षणेति वचसामान्यलक्षणाया एव संनिकर्षत्वे कथं सन्निकर्षार्थित्वोक्तिरिति वाच्यं तदिंद्रियकरणकतद्धर्मवत्त्वबोधसामग्रीसापेक्षाया एव तस्याः संनि-
कर्षत्वेन प्रकृते तादृशसामग्र्यभावेन तस्याः स्वतः संनिकर्षत्वासंभवेन तथोक्तेः इदं घटमुख्यविशेष्यकं घटो भविष्यतीत्याकारकं उपनीतविशेष्यकेति
उपनीतमुख्यविशेष्यके सत्यर्थः मनसेति इदं प्रत्यक्षमित्यनुषज्यते व्यंजकत्वेति नचैत्यादिनेत्यादिः विरोधादिति लौकिकप्रत्यक्ष एव सामग्र्या व्यंजकत्वेन
बहिर्विषयकस्य तस्य लौकिकतया तत्र सामग्र्या व्यंजकत्वविचारासंभवादिति भावः घटविशेषणकेति घटेन भविष्यत इत्याकारकमित्यादिः अनेन
घटो भविष्यतीत्यनेन ननु भविष्यत्ताविशेष्यकप्रत्यक्षं सामग्र्या व्यंजकतापर्वणाविरोधाय भविष्यत्तांशे लौकिकमेव वाच्यं तच्च न संभवति भविष्य-
त्तायाः वर्तमानप्रागभावप्रतियोगित्वरूपतया तदानीं प्रतियोगिनोऽसत्त्वेन तदंशे लौकिकसंनिकर्षासंभवात् तत्राह ध्येयमिति निरूपकतासंबंधावच्छिन्ना-
नुयोगित्वस्यैव प्रतियोगित्वरूपतया नोक्तदोषः नच विनिगमनाविरहः उक्तप्रत्यक्षान्यथानुपपत्तेरेव विनिगमक[illegible]त्वादित्याशयः अव-
गाहतामासत्तां हि क्षितौ भ्रमत्वमिति तादृशप्रत्यक्षस्येत्यादिः स्यादिति शेषः तथा च तादृशभ्रमात्मकप्रत्यक्षानुरोधेन सामान्यलक्षणासिद्धिरिति हृदयं अ-
मागतप्रतियोगिकत्वमेवास्तामत आह नचेति प्रत्यासत्त्यंतरं सामान्यलक्षणाजन्यज्ञानप्रत्यासन्नभिन्नं अस्तीति येन तत्सास्याकारः स्यादिति शेषः सा-
मान्यप्रत्यासत्त्या घटत्वेनेति आद्यतृतीयार्थोऽभेदः घटत्वाश्रया इति तृतीयार्थो जन्यत्वमनुभूतपदार्थैकदेशानुभवाद्वेपि अनुभूतं तदिंद्रियकरणक

भ॰ प॰
२४४

तद्धर्मवत्त्वबोधसामग्रीकाले प्रागनुत्पन्नं ताद्दशानुभवस्य प्रागभावप्रत्यक्षपर्यन्तप्रसत्त्वाराहस्यं तच्चेति व्याख्यायां हेतुत्वाभिप्रायेणोक्ति सामान्यमात्रसमनंगीकर्तृमतेनेदं तु सामा
न्यादिति भावः ननु सामान्यलक्षणयैवानागतघटमानं न संभवति तदानीं तद्विद्रि प्रत्यक्षाकृतद्धर्मवत्त्वबोधसामग्र्या असत्त्वात् अत एवाथैतस्यावतरणोज्ञानरूपसंनिक
र्षाधर्मिवत्सामान्यलक्षणानुकूलमत आह ध्येयमिति आश्रयमाशयः पूर्वोपदर्शितरीत्या तद्धर्माश्रयमुख्यविशेष्यकत्वात्प्रत्यक्ष एव — तद्धर्माश्रयलौकिकत्वात्प्रत्यक्षसाम्ग्रा
अपेक्षणेनानतिविनापि सामान्यलक्षणया घटविशेषणताकप्रागभावप्रत्यक्षसंभवत्वे वप्रवृत्तारतोऽसंनिकर्षाधर्मिवेनुक्तिरूपथा अनेघटो भावि इति प्रतीतिघटमुख्यविशेष्य
कप्रत्यक्षाभिप्रायेणोक्तिः पूर्वापरविरोध इति प्रागभावप्रत्यक्षस्यैवाभावात् तदनुरोधेन सामान्यलक्षणोपाशयेनाशंकते दीधितौ नचेति वाच्यमिति सन्निमेणान्वयः
घटमकारणास्येति विजातीयरूपालद्दृयसंयोगादिरूपेत्यर्थः सामग्रीयेग्यः साम्ग्री जन्यलौकिकसाक्षात्कारविषयः वाच्य इतित्वयेमादिः व्याख्यायां प्रागभावव्या
प्यत्वेनेति व्याप्तिश्चयत्नयत्प्रकारावच्छेदेन घटादिविरमकारणांतगततृणावच्छेदेन घटादिप्रागभावत्वाकारिकेति प्येवं दीधितौ प्रागभावस्यानुमितिरेवेति स्व
कारेणाप्रत्यक्षयवच्छेदः अनुमितिश्चैककपाले घटप्रागभावस्य घटेप्रागभावप्रतियोगित्वस्यवा अनुमितौ च पक्षधर्मताबलात्पूर्वव्यक्तेरपिभानमिति न तदनुरोधेन
सामान्यलक्षणेति भावः व्याख्यायामनिपतनाधिकरणोक्तिपाठे इतीमं तस्य प्रतीत्यादिमन्वयः नियताधिकरणोक्तिपाठे तु इहैतस्यान्वयो यथास्यादिः प्रत्यक्षानुपपत्या दिति स्व
प्रत्यक्षानुदयप्रसंगादित्यर्थो वाभ्यः वलवत्वादिति नचानुमितमनुपन्नविषयकलौकिकप्रत्यक्षसामग्र्या एव वलवत्त्वेन प्रकृते प्रतियोगिंशे लौकिकप्रत्यक्षसामग्र्यभावा

राम॰
२४४

त्कर्थवत्त्ववत्त्वमिति वाच्यं तथापि स्वांप्रागभावलौकिकप्रत्यक्षेच्छायां तत्प्रत्यक्षसंभवेत स्तु रीत्येन सामान्यलक्षणया याश्रावत्वप्रकारकत्वमिसत्वता सर्यात त्रासत्वेन नैति घटादि का
र्येति स्मरणोत्तरचरमकारणाप्रत्यक्षं ततस्तत्व्याप्तिस्मरणात् ततः पक्षधर्मताज्ञानमिति तदानीं प्रागभावस्यासत्वमिति भावः दीधितौ प्रत्यक्षायोगादिति लौकिकप्रत्यक्षे विष
यस्यापि हेतुत्वादिति भावः ननु प्रागभावकाले पुपनीतभानात्मकव्याप्तिग्रहसंभवेन कथं तावत्कालं प्रागभावस्यासत्वेन प्रत्यक्षायोग इति चेत्र चरणांशे उपनीतभानात्म
कव्याप्यत्वग्रहस्य सर्वत्र संभवेन सर्वत्रैव प्रागभावप्रत्यक्षापत्तिर्वारणाय चरमकारणांशे लौकिकविषयताशालिव्याप्यत्वग्रहस्यैव व्यंजकत्व पातृपाता दृशप्रत्य
क्षस्य चरमकारणोमन्तावेव संभवेभवेन चरमकारणोमत्तोत्र दृश्ये लौकिकविषयताशालिव्याप्यत्वग्रहकाल स्व प्रागभावनाशात् न च चरमकारणांशे उपनीतभानात्
मकव्याप्यत्वग्रहस्य हेतुत्वेपि सर्वत्र प्रागभावप्रत्यक्षापत्तिवारणाय चरमकारणस्यापि व्यंजकत्वांगीकारेण विषयस्यकार्यसहभावेनैव हेतुत्वे व्यक्तिकालस्वरूपय
जकत्वांगीकारेण संभवति तथा च तादृशानुमितिसामग्रीकाले समानविषयकप्रत्यक्षसामग्र्या अपि सत्वात् कथं तत्प्रागभावानुमितिरपीति वाच्यं प्रागभावस्यानु
मितित्वीकर्त्तप्रागभावस्यायोग्यतया लौकिकप्रत्यक्षस्वीकारेण तत्सामग्र्याः प्रतिबंधकत्वास्वीकारात् व्याख्यायां ज्ञानस्य कपालादौ ज्ञानस्य तेन निश्चयताधिकर
णकप्रत्यक्षोपपत्तिः ननु कार्योपधानव्याप्यत्वग्रहपर्यंतं प्रागभावस्यासत्वेन तत्प्रत्यक्षायोग एवेमत आह तत्रकार्येति अथैवं चरमकारणांशे तादृशकार्योपधाने
व्याप्तज्ञानमुपनीतभानात्मकमेव संभवतीति तस्यैव व्यंजकत्वे स्वीकरणीये तथा च सर्वत्र तादृशज्ञानसंभवेन सर्वत्रैव प्रागभावप्रत्यक्षापत्तिरिति चेत्र तादृशसाम

म॰प्र॰
२५५

ग्याऽऽपि इत्यादिग्रन्थं जनकत्वात्तन्नैवं किं तादृशज्ञानस्य हेतुत्वेनेति वाच्यं तथाविधाव्याप्यत्वज्ञानकाले फलानुत्पादानुरोधेन तादृशज्ञानस्य हेतुत्वावश्यकत्वात्त
द्वेतिकार्येऽपिधानव्याप्यत्वेन ज्ञाने चेत्यर्थः अनेन प्रागुक्तं समाहितं नोतिं तत्पक्षासंभवस्तथैतनोऽपि न चाकार्यांशे तादृरूपभिन्नविषयकानुमितिसामग्र्याः स
त्वात्कथं प्रागभावप्रत्यक्षमिति वाच्यं ज्ञानद्वयसाधारण्यासंभवे रूपेण व्याप्तिपक्षधर्मतयोर्ज्ञानस्य व्यंजकतया तादृशज्ञानद्वयकालेऽपि भिन्नविषयकानुमिति
सामग्र्या असत्वात् मान्यास्त एतदस्वरसादेवो तं कार्यमात्रं इत्यादिकस्य समस्येच्छया सन्निष्ठितं इत्यर्थः कार्यमित्यविवक्षितं तथा चेत्य तत्र ह्यागो प्रागभा
वप्रत्यक्षेनानुपपत्तिरिति भावः इमाहुः विनिगमनेति लाघवादिरूपविनिगमनेत्यर्थः तथा च गुरुशरीरे सति घटितकार्येऽपिधानव्याप्यत्वज्ञानस्य व्यंजकत्वे लाघवविरहा
त्समघटितप्रागभावव्याप्यत्वज्ञानस्य व्यंजकत्वे लाघवेन तत्त्वे व्यंजकत्वमित्यादिस्वरतामप्यां विनिगमनेत्यादिस्त इत्यर्थः यथाश्रुते विनिगमनाविरहादुभयसि
द्धौ प्रागभावव्याप्यत्वज्ञानमेवेत्यस्यासंगतेः वस्तुतस्त एवकारस्यापूर्थकतया यथाश्रुतेऽपि मेवसमंजसम्। नन्वेवमपि प्रागभावलौकिकप्रत्यक्षे बाधकाभावः कार्येऽपि
धानव्याप्यत्वस्यैव ज्ञेयत्वात् हेतूनां तर्भावे त्रापि प्रागभावव्याप्यत्वस्यापि प्रागभावकाले ज्ञानसंभवादत आह एवं चेति प्रत्यक्षाभ्युपगमे लौकिकप्रत्यक्षाभ्युपगमे संनि
कर्षाभावात् लौकिकसंनिकर्षस्य कारणत्वेतिलौकिकप्रत्यक्षे विषयसंनिकर्षयोः कारणत्वसम्बन्धमत्वादिति भावः गौरवादिति तथा च प्रागभावस्यायोग्यत्वेन लौकिकप्रत्यक्षा
संभवदृष्टान्तः अनुमितिरेवेति तत्त्वेऽव्यवहारसंभवादिति भावः आदिना विनाशप्रयावत्स्वरूपप्रागभावस्य परियेहे विनाशत्वस्य प्रागभावप्रतियोगिभावत्वरूपतया

राम॰
२५५

ध्वंसमात्रं पदस्य तत्राह आदिमेति मतभेदेन नव्यमते न प्राचीनमतानुसारेणाह पदेति प्रागभावप्रतियोगित्वस्येति प्रथमकल्पे प्रागभावनिष्ठघटप्रतियोगिकत्वस्येत्यर्थः घट
विशेष्यकानुमानकल्पे यथाश्रुतमेवेति ध्येयं दीधितावनुमानासंभवाद्वेति तथाचोपदर्शितगौरवस्य प्रामाणिकतया प्रागभावप्रत्यक्षे बाधकाभाव इति भावः न
च घटध्वंसे भविष्यतीति प्रत्यक्षमित्यादिना प्रत्यक्षप्रतीतिमुपक्रम्य ध्वंसपक्षे भविष्यत्वं हीत्यादिना वक्ष्यमाणशाब्दबोधप्रक्रियोपदर्शितसमाधानमनुपपन्नमत
स्तत्राह प्रामाण्यार्थं व्याख्यायां नावितादिना घटो नास्तीत्याकारकमिति प्रागभावप्रत्यक्षमिति मनेनान्वयः अतीतवर्तमाने च भविष्यत्वप्रतीतिरेव नेत्याह दीधितौ वर्तमाने इति प्राग
भावविशेषणं वर्तमानत्वं च तत्र शब्दप्रयोगाधिकरणतत्क्षणरूपकालस्य ह्येवं समानार्थकत्वानं तत्त्वेनानुभवात् ननु तन्मते एव प्रागभावप्रतियोगितयोत्पन्नो ह्यसौ तन्मते
भावेन प्रागभावप्रतियोगित्वासंभवाद्वर्तमानप्रागभावप्रतियोगुत्पत्तिकत्वमित्यसंगतमतः प्रतीकस्थ ध्वंसेवतदाशयमाह व्याख्यायां उत्पन्न इति क्रियात्मकतये तिक्षणा
संबंधस्य क्रियात्मकक्षणारूपत्वादिति भावः अप्रागभावः उत्पत्तिप्रागभावः प्रामाणिक इति तथाचोत्पत्तेरव्यवहितमत्वाभिप्रायमेवेति भावः अस्वीकारान् सामान्यलक्षणानगीकर्तृ
मितिसादि इदं भविष्यत्वमिति दीधितौ तर्कं भविष्यत्वमिति हरतां दीधितावध्याहार्यमिति लौकिकप्रत्यक्षविषयः नचोत्पत्तिभविष्यत्वस्य लौकिकप्रत्यक्षविषयत्वाभावेनुमित्यादि वि
षयत्वमेववाच्यं तच्च तादृशेनानुमानायोगाद्वेसनेन दूषितमेवेति वाच्यं अनागतत्वाप्रमेयं प्रमेयवदित्याद्यनुमितिमूलकप्रमाप्रमेयत्वादिकस्मरणेन तदनुमानसंभवद्
साशयात अत एवास्य लौकिकप्रत्यक्षासंभवेप्यलौकिकमानसप्रत्यक्षसंभवेन तदनागतघटादिभागानुरोधेन सामान्यलक्षणादशकोत्पत्तिपरास्तं उक्तादिशा सामान्यलक्षणा

८

भ॰प्र॰
२५६

क्विनैवत उपपत्तेः अतीन्द्रियत्वादिति न चैवमुक्तभविष्यत्वस्याप्यतीन्द्रियकालादिघटितत्वेन तत्त्वंउन्नमनुपयुक्तमिति वाच्यं वस्तुगतिमनुरुध्य तत्त्वंऽनात् कपालसंयोग
नाशाजन्यघटनाशस्थले इह कपाले घटध्वंसो भविष्यतीति प्रतीतावित्यापत्तिरत आह कपालनाशजन्येति बुद्धिः बुद्धिमूलकयोगः एवमग्रेऽपि नवा भवनेऽस्य इति न चा
भभवनेऽघसमुत्पद्य प्रागगोत्वाभावमिष्यतीति मैत्रेऽयांग रोम्य्वा भविष्यतीति प्रयोगापत्तिरेव कुतो न हते निवाच्यं तत्रध्वस्तनी संज्ञायात्नुयो विषयत्वेन तयाऽस्टोवाधेनता दशाप्रयो
गापत्त्यसंभवात् व्याख्यायां नाशप्रागभावेति यद्यपि भविष्यत्वस्याऽत्यन्तिदेघटित तत्र यानाशोत्पत्तिप्रागभावेति वक्तुमुचितं तथापि समनेऽप्यनेन नाशप्रागभावस्यैव नाशोत्प
त त्तिप्रागभावरूपत्वात् तथोक्तं ग्यधितिगतेवेति वर्त्तमानादिदिनस्यापि गतध्वंसः परदिनत यावरध्वंसःप हार्थत्वादिति भावः वर्त्तमाने सादि उत्पत्तेरित्यादिः अत्र न परइतिउत्पत्तेरुत्प
त्तिमत्वाभावेन वाधादिति भावः अभिहितत्वादिति ससम्बन्ध इतिकारिकायाममतरसम्भस्य दमधीकभूतिमनमसादः असंबद्धसंबंधो पहिताक्रियाउत्पत्तिरितिव्यावृत
तदेव माधीकृतस्य भूरूपत्तिस्थानमिति ग्रंथेन भस्य रपदस्यो समर्थकतया भूपदस्योत्पत्तिस्थानार्थकतया व्याख्यानेनोत्पत्तेरध्युत्पत्तिमत्वमभिहितमिति मभिमानः
वक्तृतमक्तत्र भसंरपदस्योत्पत्तिसमर्थकस्योपि कृदभिहितइतिमायेनोत्पद्यमानपरत्वमेव अन्यथा माधीकपदेन चोक्तेच्छाविषयत्वं दर्शयते मादितत्रसाग्रिमग्रंथविरोधा
पत्तेः तद्रूपेणोत्पद्यमानमोक्षे उत्कटेच्छाविषयत्वप्रतीत्यापादनादिति कुसुमाञ्जलिप्रकाशेऽत्पत्तेरध्युत्पत्तिमत्वमनभिहितमेवेति ध्येयं इदमुपलक्षणाद् उत्पत्तेरघक्षणत्वं
घरूपाया इत्यादि पूर्वोपदर्शितयुक्तिसद्भावाद्वेमपि द्रष्टव्यं नाशोत्पत्तिमत्वस्य वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकोत्पत्तिमत्वस्य दीधितौ पत्ताप्तन इति स्पष्टाग्रापे

राम॰
२५६

वर्तेतेऽभावश्च ह्रस्वत्वेन तदर्थस्यानुपगमात् समभिव्याहारविशेषानन्तर्भेदत्वावच्छिन्नप्रतियोगिताकाभावस्याप्रवृत्त्यात्सलट्समस्तद्‌र्
तिशेषः अत्र भूसत्तायामिति शास्त्रिकस्मृतिवलेन लाघवेन च भूधातोः कालसंबंधितरूपसत्तायामेव शक्तिर्न तु सत्तामात्र इत्याशयेनोक्तमिति विज्ञाय प्रसाध्य तदस्तु तत्त्वं केचित्तु
भूधातोर्लाघवेनाभेद एव शक्तिः आकाशं द्रव्यं भवतीत्यादावेव च मुख्यः प्रयोगः न चाभेदेऽभेदत्वावच्छिन्नप्रतियोगिताकाभाव[struck through]ः सचाप
सिद्ध इति वाच्यं एवकारस्य शास्त्रिकस्मृतिविरोधात् आकाशं द्रव्यं भवतीत्यादावभेदस्य संसर्गमर्यादयैव लाभसंभवाच्च धात्वर्थनिरूपितत्वस्य च धात्वर्थे तदन्वयप्रदर्शना
य प्रागभावानंगीकारात् तादृशकालीनत्वमिति व्याख्यायां एवं इहाघघटो भविष्यतीत्यादौ धात्वर्थे देशविशेषकालविशेषयोरधिकरणत्वेनान्वये नश्यतीत्यादौ नश्यती
त्यादावपि अन्वये अधिकरणत्वेनान्वये न तु भविष्यतीत्यादाविव नश्यतीत्यादावपुत्पत्तिर्न प्रत्ययार्थः स्मर्तव्याः तत्र हे इति नश्यतीत्यादावित्यर्थः एवमग्रेऽपि केचित्तु नश्य
तीत्यादौ प्रत्ययार्थोत्पत्तौ कालविशेषादेरधिकरणत्वेनान्वये सर्वत्र कारकविभक्त्यर्थस्य धात्वर्थ एवान्वय इति व्युत्पत्तिभंगापत्तिरित्युत्पत्तेर्धात्वर्थत्वमंगीकृत्य तत्रैव का
लविशेषादेरन्वय उचित इत्याहुस्तन्मतं निराकरोति न चात्रेति प्रत्ययार्थेति आख्यातत्वेनाख्यातार्थस्य ध्वंसप्रतियोगित्वे प्रथमान्तार्थघटाद्यवृत्तिप्रतियोगित्वे अन्व
यापातादिति धात्वर्थनाशोत्पत्तेरित्यादिः सच वाधित इति भावः अन्वयापातादित्यादिपाठे वा धेनेत्यादिः न चैवमुत्पत्त्युत्पत्तिभंगो दुर्वार इति वाच्यं आगत्यानतत्त्वं कोचकत्वाना
न्यतरत्वेन घटः इत्यादौ व्यभिचारेण तादृशव्युत्पत्तेरसिद्धेश्च एतेन नश्यतीत्यादौ धातोर्ध्वंसोत्पत्तिमत्तांशे लक्षणा तादृकदेशोत्पत्तावनागतत्वादेः प्रत्ययार्थस्य कालविशेषाद्यधि
करणत्वस्य चान्वय इत्यपि निरस्तं प्रत्ययार्थः प्रत्यर्थेनान्वेतीति व्युत्पत्तिभंगापत्तेः केचित्तु नशधातोर्नैव शक्तिः लक्षणायां नाशोत्पत्ती युगपदेव बोध्येते युगपद्वृत्तिद्वयवि

रोध्यसमभिव्याहारादिभिरिवानभ्युपगमादित्याहुस्तद्ध्वंसस्य तद्धात्वर्थयोःपरस्परान्वयस्याव्युत्पन्नत्वात् प्रत्ययार्थे तत्त्वाभावेति अत्रेदं रहस्यं अत्रो मते प्रत्ययार्थत्वाभिधानं
घनाशत्वमनुयोगितादिशेषो रखंडोपाधिर्वा तद्विशिष्ट एव नशधातोः शक्तिप्रिमभिप्रायेण नशधातोरुत्तरमित्रं भावत्वविशिष्टशक्तौ चानागतत्वादिकमेव प्रत्ययार्थः सच
धात्वर्थे विशेषणं वेत्यन्यदेतत् किंतादृशोत्पत्तिः क्वापि न प्रत्ययार्थ इति चेन्न प्रतिपदाहाघटाविनष्टश्चैत्रस्य स्पर्शो सिद्धः सन्नत्र नष्टौ प्रतियोगिश्चैत्रः क्रियमाणीति प्रयोगवारणाय
नादृशास्य लेप वक्तादृशोत्पत्तेः प्रत्ययार्थत्वस्यावश्यकत्वादिति दीधितौ कालविशेषादेरिति आदिना देशविशेषपरिग्रहः तेन भवने सत्युत्पन्न प्रागसतोगमिष्यतीति प्रागभाव
नाशात्मकघटे प्रागसत्त्वात् प्रागभावो नंक्ष्यतीति न प्रयोगः प्रागभावानंगीकारेनुत्पन्न देशोत्सन्निकनाशस्याप्रदेशवृत्त्वाभावादुत्पन्नो नाशो वा देशविशेषस्यान्वयेपि नंक्ष्यति
रा रित्याशयेनैवादिपदेयानं नष्टश्चैत्रन् नंक्ष्यतीति अत्र वार्तिककारानुयायिनः घटो नंक्ष्यतीत्यादौ घटादेरुत्पत्त्यर्थवर्तमानकालावच्छेदेनैव नाशप्रतियोगित्वस्याभ्युपगमे
न नष्टश्च वर्तमानकालावच्छेदेन नाशप्रतियोगित्वाभावान्न नष्टो नंक्ष्यतीति व्यवहारापत्तिः एवंचैव नंक्ष्यतीत्यत्र वर्तमानोत्पन्नोत्पत्त्यर्थत्वाभिधानं दीधितिकारोक्तमसंगतमेवे
त्याहुस्तच्चिंत्यं अवच्छेद्यावच्छेदकतासंबंधस्यावच्छेदकत्वाभावेन वर्तमानकालावच्छेदेन नाशप्रतियोगित्वान्वयाभ्युपगमासंभवमाशयेन दीधितिकारोक्तिसंगतेः व्याख्या
यातस्य धात्वर्थस्य अभेदान्वयानुरोधाद्वेति वस्तुतोर्थद्वंद्वतिरूपेति पुरुषेत्यादिः ध्मयन्त्र हुत्वाख्यातयोः ध्वस्तानो दितिर्हा घटः घटोभविष्यतीत्यादावपीत्यादिः सन्नेवेतिएवका
रेणोत्पन्नेत्यवच्छेदः प्रयोगः स्यादिति तथाच सर्वत्र भूधातोरुत्पत्तिरेवार्थः अनुशासनस्य सत्तापरत्वमभ्युपेत्यपरमेवेति भावः प्रत्ययार्थ भविष्यत्वस्य तार्थः लक्षणा वे

तिआख्यातस्येत्यादिः नन्वेवं देशादिविशेषकालादिविशेषयोर्धात्वर्थत्वरूपसत्तायामन्वयेभवनेभ्यः सम्प्रसद्येतिभाग्युपदर्शितेहेयोर्दुर्वारइत्यत आह इत्याद्येति प्रागभावरति
तेनभवनेष्वइत्यादिदेशवारसांप्रतियोगिनिस्वरूपसत्तात्मकप्रयोगिनि अनेन भाग्युपदर्शितस्यैवाभावितीत्यादिदोषस्यकृपाणनाशेत्यादिदोषस्यचवारणं तथाचयतद्दे
शाद्यतनकालाधिकरणिकायाएतद्देशाद्यतनकालाधिकरणकवर्त्तमानप्रागभावप्र [illegible] ति योगिनीस्वरूपसत्तनतत्प्रयोगइत्याद्यबयवोधः अन्वय
संभवप्रयोगादितिवक्तुं ब्रीहिगर्भकर्मधारयः तादृशप्रयोगेऽभयत्रान्वयसंभवादितिसर्थः ऽभयत्रान्वयेनैवतादृशप्रयोगसंभवादितियावत् नाशतत्प्रतियोगिनोरिति
नाशेन्च भाकृतेक्रियंस्पतीत्यादिर्न प्रयोगः तत्प्रतियोगिनन्वयेनध्वंसाविनाशकेपरन्धोर्नंस्पतीन प्रतियोगः तथाचाद्यतनकालेहरतिरघतनकालहरतिर्भविष्यत्रा
शप्रतियोगीघटइत्यन्वयवोधः अन्वयासंभवादिति तथाचभाविष्यतीत्यादावुत्सम्पर्धकत्वंभूभातोरावश्यकमितिभावः नन्वेवंभूधातोरुत्सम्पर्धकत्वे भूसत्तायामित्यनुशा
सनविरोधोदुर्वारइत्यत आह भूधातोष्विति सत्तामात्रेति तथाचाकाशंभवतीत्यादौसमानरूपार्थसंभवेनन तत्परोक्तानुशासनविरोध इति भावः आनुभविकत्वादिति इदमुप
लक्षणांउत्सम्पर्धकत्वंविनोत्करीत्यादिनिर्वाहाश्चेत्यदिदमयभूधातोरुत्सम्पर्धकत्वेनानार्थत्वापत्तिरनुशासनविरोधितादवस्थ्यं चेत्यत आह तत्रचेति अन्यदेतद्धि तथा
चभूधातोर्लक्षणायोत्सम्पर्धकत्वेननानार्थत्वं नवापुरस्त्वार्थपरानुशासनविरोध इतिभावः अतएवानुनेनीतिइदमुपलक्षणांअत एवाहपत्या प्पनइतीत्यपिद्रष्टव्यं न
तूत्पतइत्याशयः स्वरूपसत्तायाउत्पत्तसंभवमाशंक्याहस्वरूपात्मिकायामितिव्यवस्थापितत्वादिति हि नित्यस्यसन्नम्पर्थत्वे शरदादिप्रसुप्यं तिचप्रकाइत्यपिप्रसज्जे

नेतिभावः उत्पन्नमिति अद्यतनकालोत्पत्तिको यो वर्त्तमानप्रागभावप्रतियोगी नाशस्तत्प्रतियोगी त्यास्त्वित्युपबोध इतिभावः न कस्त्रीयइति तत्कस्यानंविनैवो
पपत्तेरितिभावः अनापत्तेरिति अन्यथा नष्टेन्द्रपतीत्यपि प्रसज्येतेति भावः पूर्ववृत्तेरिति चिरविनष्टेपीत्यादिना प्रागुपदर्शितेत्यर्थः आहुरित्यस्वरसबीजं घटोभवि
ष्यतीत्यादौ हि ध्वंसस्य मानस्यानुभवविरुद्धत्वात् इति तत्वरसो बोध्यः प्रागभावप्रत्यक्षमिति तथा च तदनुरोधेन सामान्यलक्षणा अवश्यं स्वीकार्येति भावः दीधितौ सामान्य
कमिति समयविशेषावच्छिन्नघटत्वादिकमित्यर्थः व्याख्यापा पूर्वमेव प्रागल्भमतखण्डनावसर एव नचैवमपि भाविघटविषयकेदानीन्तनज्ञानोत्पत्तिः साकारकास्ता
भावभानार्थं सामान्यलक्षणावश्यकत्वे वेति वाच्यं तद्भानेऽपि तस्य सामान्यलक्षणायापि दुर्ज्ञेयत्वेन तादृशभानासिद्धेः तत्र इह कपाले एवमयेपि दीधितावभाव
मात्रमिति मात्रपदेन घटत्वावच्छिन्नप्रतियोगिताकत्वव्यवच्छेदः अथ तादृशप्रमयस्य घटप्रतियोगिकाभावमात्रावगाहित्वेपि न सामान्यलक्षणासिद्धिः तस्य
सात एवं घटप्रतियोगिकाभावावगाहितयैवोपपत्तेरिति निरुक्तावगाहित्वखण्डनमयुक्तमिति चेन्न तादृशप्रत्यक्षस्य स्वलगतमात्राभावतीतद्घटप्रतियोगिकप्रागभा
वध्वंसावगाहितया सामान्यलक्षणावश्यकत्वस्याभिमानेनैव निरुक्तावगाहित्वखण्डनात् व्याख्यायां घटत्वावच्छिन्नप्रतियोगिताकमिति॥ इत्थञ्च प्रतीकं अचयइति अनुप
गेऽनाद्वयः अत्र न नगतिकत्वादिति सामान्याभावावगाहि तादृशप्रत्ययानुरोधेन प्रागभावध्वंसयोः प्रतियोगितया अपि घटसामान्यस्य स्वीकारादिति भावः दीधितौ सम्भव
नोवेति नयेतसनुपपत्ते तत्र कपालइति नचेत्सनुपपत्ते ततः इदानीं तनकपालान्तरे व्याख्यायां चाभ्यघटेति महाप्रलयइत्यादिः अत्र इदानीं तनकपाले प्रागभावसघट

प्रागभावस्य सामान्याभाववता घटसामान्याभाववता एवमग्रेऽपि सर्वावधिकालेति संसारस्यानादित्वादिति भावः ध्येयमितीत्येतन्मतं सिद्धान्तलक्षणे निरूपितं । अनुक्तीतिमुद

घटत्वावच्छिन्नाभावस्यैव नत्वत्यन्ताभावविषयत्वादिति भावः ननु पटाद्यसंताभावस्यैव पटध्वंसाद्यसंताभावत्वकल्पना दुरुपपन्नेरत आह दीधितावसंताभावस्येति अ

विरोधित्वादिति ध्वंसाद्यसंताभावत्वासंभवादिति शेषः ध्वंसाद्यविरोधिनि ध्वंसाद्यसंताभावत्वकल्पने ध्वंसादिकालेऽपि तद्धीतिप्रसक्ताबुद्धिप्रसंगादिति भावः व्याख्या

यां न स्यादिति पटासंताभाव एवेत्यादिः पटध्वंसाद्यभाव इत्यर्थः सिद्धान्तेति अभावप्रतियोगिकातिरिक्ताभावानंगीकारपक्षसिद्धान्तेत्यर्थः भावे वेति अननुग

तानामेवाधिकरणानामनुगतघटादिध्वंसाद्यभावत्वेन तादृशधीविषयत्वसंभवेनेत्यर्थः अमतेति भावात्मकाधिकरणेषु भावत्वाभावादिति भावः भावाभा

वसाधारणाभावत्वांगीकारे त्वाह अन्ये केषामिति दीधितावतिरिक्तादेवेति अथ पटाद्यसंताभावातिरिक्तस्य तद्ध्वंसाद्यसंताभावस्य कल्पने गौरवेणात्यन्ताभावस्य ध्व

साद्यविरोधित्वमंगीकृत्य पटाद्यसंताभावस्यैव तद्ध्वंसाद्यसंताभावत्वकल्पनमनुचितं न चैवं भाविविनिर्विनष्टे वा घटे इह कपाले घटो नास्तीति प्रत्ययानुपपत्तिरूप

दर्शितरीत्या दुर्वारेति वाच्यं ध्वंसादेः सामान्याभावच्छिन्नप्रतियोगिताकत्वस्य सामयिकत्वाभ्युपगमेनोपपत्तेरिति चेन्न तथा सति पटादिकालेऽनन्तध्वंसाद्यभावप्रतीत्यनुपप

तोपदर्शितगौरवस्य प्रामाणिकत्वेनादोषत्वादिति दिक् इतिवत्प्रसव इति इत्याकारकासंताभावप्रसवपदे लक्षणाप्रसंग इत्यर्थः न लोकानामिति तथा च प्रागभा

वस्य कथं विरूपितप्रसक्तमिति पर्यवसितं व्याख्यायां शब्देति प्रागभावशब्द इत्यर्थः संभवद्विषयांतरतया प्राक्कालीनाभावादिविषयकतया तादृशेति अत्यसंताभा

वविलक्षणप्रागभावरूपेत्यर्थः अन्यथा संभवद्विषयांतरत्वेऽपि शक्यस्वस्वत्वं तत्साधकत्वे प्रागभावं खंडयति अन्याशंकते दीधितावत्येति व्याख्यायां कार्यसमूहत्वव्यवहारादेः
अन्यथासिद्धिं साधयति तत्वेनैवानुपपादनेऽपि उपपादयितुमशक्यत्वेऽपि प्रमत्वेऽपि निरूपत्वेऽपि सत्येऽर्थः नातिरिच्यतेति तथा च तत्सूर्वत्वादिव्यवहारस्य ध्वंसघटितत्वेनैव
प्रागभावघटितत्वेनाप्युपपादयितुं शक्यत्वाद्विनिगमनाविरहेण प्रागभावस्यापि सिद्धिर्निराबाधैवेति भावः तादृशप्रमयस्यामसंभवेऽन्तमत्वमाशंक्याह तथा चेत्यादि अ
तिरिक्तत्वाद्वेति असंताभावातिरिक्ताभावेत्यर्थः मामात्मकस्य तिप्रमयस्य स्वसमवेतगुणाद्यधिकरणसमयसंबंधरूपध्वंसाघटितो मते विषयकत्वे संभवे ध्वंसप्रागभा
वयोरुभयोरप्यसिद्धो विनिगमनाविरहेण प्रागभावघटितो मते विषयकत्वसंभवेन चातिरिक्तध्वंससाधनाय दीधितौ तादृशविलक्षणताप्रसत्यांतरानुसरणमिति शहुरु
सत्वेऽपीति अतीद्रियत्वे तथेति शेषः अनन्यथासिद्धं अन्यथानुपपद्यमानं तत्वविवंदीति घटोत्पत्ति प्रतिवंदीत्यर्थः दीधितावतिरिक्त्वताभिति अत्यंताभावभिन्नतया सिद्धत्वेत्य
र्थः प्रागभावस्वीकारे अतिरिच्यत इति पूर्वानुषंगेणान्वयः घटप्रागभावो नष्ट इत्यादिविलक्षणनाशप्रमयस्यासिद्ध एवेत्याशयः अन्ये त्विति संदिग्धदृशप्रमयस्यासिद्धत्वेता
दृशप्रमयस्याप्यसिद्धत्वस्य तुल्यत्वात् विनिगमकाभावादिति तन्नूर्वत्वादीति आदिनाएतद्दिनपूर्वत्वादिपरिग्रहः व्याख्यायां ध्वंसेतीति नवीनमपि महाप्रलयेतिप्रसंगः घ
टादिध्वंसमेतत्कल्पनाद्ध्वंसप्रतियोगि घटादिध्वंसस्य नित्यत्वादिति वाच्यं ध्वंसपदस्य ध्वंसत्वनिरूपकप्रतियोगित्वपर्यंतत्वाभ्युपगमेन नकत्वाभ्युपगमात् दीधितौ दुः
खात्यंताभावस्येति अयमाशयः दुःखप्रागभावस्यापि यच्छिन्नफलत्वे यच्छिन्नोत्तरं नत्वतियोगिदुःखस्यामनो मायच्छिन्नस्यानर्थकं अतः समो व प्रतियोगिसामग्रीरूपना

शक्याभावेन तद्धर्मावच्छिन्नतया प्रतियोगितं विनाभावत्वानुपपत्त्या सिद्धदुःखप्रतियोगिकत्वेन चात्यन्ताभावत्वमेव ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वेमानाभावा
दिति अत्यन्ताभावस्य नित्यस्य फलत्वासंभवात् तद्दृत्वस्मिन्निमादि ध्वात्मावच्छेदेनेत्यर्थः दुःखसाधनध्वंसमिति पापध्वंसमित्यर्थः क्रियाविशेषे मंगलप्रायश्चित्तादौ ॥ ननु सुख
दुःखाभावान्यतरस्यैव स्वतःपुरुषार्थतया पापध्वंसस्य तदन्यतया स्वतःपुरुषार्थत्वासंभवेन तत्साधनतया च गौणपुरुषार्थत्वासंभवेन प्रायश्चित्तफलत्वासंभवात्
पूर्वकल्प एव सम्यक् न चोक्तहेतुः नित्यस्यापि योगक्षेमसाधारणजन्यत्वसंभवात् तत्राह व्याख्यायां नवीनमतमिति स्वतःपुरुषार्थत्वादिति वलवद्द्वेषविषयाभाव
त्वस्यैव स्वतःपुरुषार्थत्वप्रयोजकत्वेन सुखाभावयोरिव पापध्वंसस्यापि स्वतःपुरुषार्थत्वसंभवस्यैवानएवाहि कंटकध्वंसादेः स्वतःपुरुषार्थत्वं तत्र न तत्रोक्तं संगच्छते इत्याशयः
यत्तु पापध्वंसस्य प्रायश्चित्तफलत्वं न सम्यक् तथाहि न तावत्सामान्यतः पापध्वंसत्वं प्रायश्चित्तजन्यतावच्छेदकमतिप्रसंगात्तन्नापि ब्रह्महत्यादितत्पापध्वंसत्वं तत्तत्प्रायश्चि
त्तजन्यतावच्छेदकं तत्तत्प्रायश्चित्तं विनापि प्रकारान्तरेण तत्तत्पापध्वंसेन व्यभिचारात् किंतु तत्तद्विजातीयपापध्वंसत्वमेव तत्तत्प्रायश्चित्तजन्यतावच्छेदकं तत्र हेतुतासंच तत्तत्राश
क्तिमाने नित्यसाकर्म्यमपि। एवंच तत्तद्द्विजासमसंदेहेन तद्विजातीयपापरूपनिमित्तसंदेहेन वहुवित्तव्ययायाससाध्ये तत्तत्प्रायश्चित्ते प्रवृत्त्यनुपपत्तिः निमित्तसंदेहस्य प्रवृत्ति
प्रतिबंधकत्वादिति न च ब्रह्महत्यात्वादिसामान्यधर्मपुरस्कारेण निमित्तनिश्चयसत्वान्न कृच्छ्रादिस्थले सतीष्टसाधनतानिश्चये प्रवृत्त्यादिसंदेहेपि प्रवृत्त्युदयेन निमित्तसंदेह
स्य सहकारिसंदेहतया फलसंदेहपर्यवसन्नतया प्रवृत्तावप्रतिबंधकत्वात् अत एव वहुव्ययायासादिसाध्यापादनसंभवादेव आपाद्येति तु न सह दोषानिरूपणाद्येत्यर्थः आपादनात्

आपादनसंभवात् प्रथमक्षणस्थापाद्यापादकयोरप्रसिद्धिसत्वादितिभावः तद्भावादेव तद्बुद्धित्वसामान्याभावादेव दीधितौ कार्याद्दरिति जन्यद्रव्यं जन्यत्वादिकं च प्रति
द्रव्यत्वादिना रूपत्वादिना च प्रतिबंधकत्वेन तत्तज्ज्ञानव्यक्त्यादिकं प्रति तत्तद्व्यक्तित्वेन प्रतिबंधकत्वेन चेत्यर्थः । तेन कार्याधिकरणे पूर्वं संयोगादिरूपकार्यस्यावश्यकतया
सामान्यतः कार्यत्वेन कार्यस्य प्रतिबंधकत्वासंभवेपि न क्षतिः व्याख्यायां कालीनेति कालोत्पत्तिराः तेन स्थूलकालमादाय न दोषः सविकल्पकस्य चतुर्थादिक्षणे पुनरुत्पादापत्ति
र्न संभवतीत्यतिप्रोक्तं पर्यनिर्विकल्पकहायावश्यकतया अनित्यत्वावच्छिन्नहेतुताकविशेषणाज्ञानविरहादिरूपाश्रयेणाह निर्विकल्पकस्य स्वोत्पत्तिद्वितीयतृतीयक्षणयोः पुनरुत्पादप्रसक्ते निर्वि
कल्पकप्रतिबंधकतयैव निरास संभवादाह चतुर्थक्षणाद्यनिचतुर्थादिक्षणाः इत्यर्थः तत्र वस्तुतः संयोगादिघटिततन्निर्विकल्पकसामग्र्यास्तृतीयादिक्षणेपि सत्वादितिभावः ती
कालीनेति कालोत्पत्तिकालीनो सन्निकर्षः ध्वंसादीति ध्वंसामग्र्यापिताद्दशस्य विनिगमनाविरहेण प्रतिबंधकतयाविनाशस्य हतौ विनिगमनाविरहेणेति तेषां हेतुतया पुन
रुत्पत्तेरुत्सादृशानां संभवादितिभावः । हेतुताया इति अनंतहेतुताया इत्यर्थः । प्रागभावहेतुतामते पुनरुत्पत्तेरपि तत्कार्येष्यलिंगितप्रागभावसत्वेन पुनरुत्पत्तेः कार्याभावसाहचर्याय वि
शिष्टैव तस्यवाच्यत्वादितिभावः मिथ्याज्ञानवासनाया इति मिथ्याज्ञानजन्यसंस्कारस्येत्यर्थः मिथ्याज्ञानं चात्मादौ शरीराद्यभेदाद्यवगाहिज्ञानं कल्पतरु इति तथा च तत्वज्ञानिनां तत्वज्ञाने
नेन वासनानाशान्न धर्माद्युत्पत्तिरितिभावः अनंतत्वादिति तथा चानंतहेतुताकल्पने गौरवमितिभावः अथ तासामनंतत्वेपि वासनात्वरूपसंस्कारत्वव्याप्यमिथ्याज्ञानजन्यसंस्का
रगतजातिविशेषस्य जनकतावच्छेदकतया नानंतहेतुताकल्पनमिति चेन्न पटुतरत्वजातौ मानाभावात् पटुतरत्वजातावेव मानाभावादित्यिवाच्यं पुनःपुनःस्मरण

जन्यतावच्छेदकतयैवतत्सिद्धेः ननुस्वसमानकालोत्पन्नपदार्थानां प्रागभावसमनियतत्वादेकेनैवनानंतानां कारणताकल्पनमत आह किंचेति नचेति तत्स्वभाववत्त्वरूपविशेषः ध्वंस
प्रतियोगीति जन्यसत्वस्य कार्यतावच्छेदकत्वे प्रागभावानंगीकारे जन्यत्वस्य प्रागभावप्रतियोगित्वरूपत्वासंभवेन ध्वंसप्रतियोगित्वरूपत्वमित्याशयेनेदं अनादित्वेति विना
शिसमवेतस्य सादित्वनियमादितिभावः अनुपपत्तिरिति इति तेन तत्स्वभाववत्त्वविशेषः अत एव तत्स्वभाववत्त्वाभावादेव स निरुक्तो धर्माधर्महेतुः सामान्यादि तु सत्वेति विनाशित
या सामान्यादित्वाभावेन नतु सत्वोत्कीर्तनं भावत्वेनाभावत्वेन वेति विनाशिसमवेतभावस्य सादित्वनियमे तद्घटकत्वेनानिर्णायकः सम्भवेन तत्वाद्भावत्वेनानिर्णायकः उक्तमिति तेषाम्
नाघविघावादित्यात्तस्यैवानाघविघानामकत्वादितिभावः अधिकमग्रे वक्ष्यामः सामग्र्या अव्यवहितोत्तरकालस्य सामग्रीसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वे
सति सामग्रीसमयध्वंसाधिकरणसमयस्यानतिरिक्ततया च नोक्तरीत्या पुनरुत्पत्तिरितिभावः अवच्छिन्नत्वसाधिकमुत्पत्तिपर्यन्तनिवेशस्य वैयर्थ्यं तथा च स्वाग्रिम
मनुरुध्योक्तेन निरुक्तसामग्र्यव्यवहितोत्तरकालस्य कार्याधिकरणत्वेन नियमेऽपि द्वितीयादिक्षणस्य निरुक्तसामग्र्यव्यवहितोत्तरकालत्वाभावेन तत्र पुनरुत्पत्तिवा
रणासंभवेऽपि न क्षतिः एतेन सामग्र्यव्यवहितोत्तरकालत्वं यदि यथाश्रुतं तदा कार्यवत्त्वेन नियमेऽपि निर्विकल्पकस्य चतुर्थादिक्षणोत्पत्त्यादितं तु संयोगनाशनष्टस्य विशेषादि
तं तु कपत्स्यावस्थितत्वादितं तु कपदोत्पत्तिकाले पुनरुत्पत्तिर्दुर्वारा यदि च तन्निरुक्तरूपं तदा कार्योत्पत्तिमत्त्वेन नियमेऽपि नोत्पन्नपुनरुत्पत्तिर्द्वितीयक्षणस्य निरु
क्तसामग्र्यव्यवहितोत्तरकालत्वाभावादिति नतु कार्योत्पत्तिमत्त्वेनेत्यसंगतमिति हृदयं निरवकाशं ननु व्यापकेऽव्यर्थविशेषणतास्यादेव तयोः सति निवेशस्याव्यर्थत याव

क्षणसमनुरोधोपि कथमिति चेत्तत्र ब्रूमः उद्देश्यासिद्धिरेव तस्माद्दोषतया वीजं यथा सुंदरयत्किमाऽनिस्सारो यत्र प्रकारांतरेणोद्देश्यसिद्धिस्तत्र न स दोषस्तन्मेव एवं च महतेस्वाधि
करणासमयध्वंसाधिकरणात्वस्य द्वितीयादिक्षणेत्वसामग्रीसिद्धतया तदनधिकरणात्वस्य प्रथमक्षणाएव संभवेन स्वाधिकरणासमयध्वंसानधिकरणासमयसंबंध
रूपोत्पत्तिमत्वस्यार्थसिद्धतयोत्पत्तिनिवेशवैयर्थ्यं सुवचमेव अतएव न च व्याप्यकेनव्यर्थविशेषणतावीजाभावादिसादिप्राचीनग्रंथाश्रयुक्ताभिप्रायकाएवेति दिक् तद
धिकरणाक्षरोति अत्र द्वितीयादिक्षणासंबंधेऽतिव्याप्तिवारणाय द्यादत्संभवप्रागभावविशेषणं प्रथमक्षणप्रागभावस्याप्यतद्धिकरणमहाकालवृत्तितयाऽसंभववारणा
यक्षणोत्पत्तिघटसमानकालोत्पत्तिकक्रियाद्यात्मकस्थूलकालसंबंधेऽतिव्याप्तिवारणाय चरमक्षणापदं महाप्रलयोत्पत्तिसाधारणं चेदं महाप्रलयात्मकचरमध्वंसात्मकक्ष
णमादायैव तत्र लक्षणासमन्वयात् महाप्रलयानंगीकारे तु स्वक्षणात्वघटितनिरुक्तविसाशयेन लाघवाद्यप्रागभावतदधिकरणयावत्कालेति अत्र द्वितीयादिक्षणासंबंधेऽतिव्या
प्तिवारणाय चरमाधिकरणांतं कालविशेषणं प्रथमक्षणस्यापि यावत्कालप्रागभावानधिकरणत्वाद्यसंभववारणाय प्रागद्धिकरणेति प्रागभावविशेषणं तदधिकरणतायस्मि
तिवकृद्धीहिणात द्रूसर्थकं वृत्तित्वं वकालिकसंबंधेन प्रथमक्षणप्रागभावस्य तद्वृत्तित्वाभावान्नासंभवः यथाश्रुते तदधिकरणात्वस्य यावत्कालविशेषणात्वलाभेन यावदंत
र्गतमहाकालस्य प्रागभावाप्रसिद्ध्या प्रथमक्षणस्य तादृशयावत्कालांतर्गतप्रथमक्षणप्रागभावानधिकरणात्वेन चासंभवस्य दुर्वारत्वात् द्वितीयादिक्षणासत्तादृशतृतीयादिक्ष
णप्रागभावाधिकरणतयाऽतिप्रसंगनादवस्थ्यमतो पावदिति प्रागभावविशेषणं कालिकसंबंधेन तद्वृत्तित्वाभाव प्रथमं कालपदं कालिकसंबंधेन प्रागभावाधिकरणा

तत्ताभावयच्चरमकालपदं नच महाकालस्यापि तादृशप्रागभावाधिकरणत्वात्तत्संबंधेऽतिप्रसंग इति वाच्यं तादृशप्रागभावावच्छिन्नकालसंबंधस्य विवक्षणेन तादृशमहा
कालसंबंधस्याप्रसक्तसंबंधपर्यवसन्नतया लक्ष्यत्वेनादोषात् केचित्तु प्रथमक्षणस्य न तदधिकरणत्वं किंतु तन्नसद्वितीयादिक्षणानामेवाधिकरणत्वमिति मैकदेशिमतात्
मरणोत्तरं यथाश्रुतार्थसम्भवं तदधिकरणत्वस्य यावत्कालविशेषणत्वमेव समग्रमित्याहुः घटाद्यधिकरणोत्पत्तिघटादिसंवद्धे समर्थः अधिकरणानां पर्यन्तनिवेशे गौरवात्तत्प्रयोग
गभावावच्छेसाश्रयः यथाश्रुते विषयितायाः अधिकरणत्वानियामकतयाऽसंगतेः असंभव इति द्वदमुपलक्षणां संयोगादिना घटाधिकरणस्य योध्वंसस्तदनधिक
रणस्य योध्वंसस्तदनधिकरणत्वस्य द्वितीयादिक्षणेपि सत्त्वेनातिव्याप्तिः स्यादिममपि दूषणं एतेन कूटमारणाधिकरणत्वानादरेणासंभवं संपाद्य समयपदोपादाने सं
प्रविरोध इति दूषणमप्यनवकाशं जन्ममात्रस्य कालोपाधितया ज्ञानस्यापि समयत्वात्ऽकटोषतादृक्स्यमत आह कालिकसंबंधेनेति दीधितौ ध्वंसानधिकरणेति
ध्वंसावच्छिन्नभिन्नेसमर्थः अधिकरणतानिवेशे गौरवान्नाभावाच्च अघक्षणस्यापि द्वितीयादिक्षणात्मकत्वाधिकरणसमयासंताभावाधिकरणतयाऽसंभववारणाय ध्वंसे
तिआरव्याप्तं भावीति तद्कूटपूर्वकालीनस्येत्यादिः भावीति तद्कूटविशेषणं ऽकरीता ज्ञानस्यापि समयत्वादाह कालिकसंबंधव्यापकमिति तद्कूटमितीति तद्कूटमित्यादी समर्थः
कालिकायां द्वितीयादिक्षणयोगे गतिआप्तिवारणाय सप्तमं तदुपादानं तथाच एवं ध्वंसत्व इति तथाच स्वक्षणध्वंसानवच्छिन्नस्वक्षणायोग इति फलितार्थः ननु सामान्यतः क्षणः स

मयद्दमभिधानमयुक्तं द्वितीयक्षणोत्पन्नध्वंसप्रतियोगित्वस्थूलकालसंबंधेऽतिव्याप्तिवारणाय द्वितीयक्षणपदस्य क्षणत्वविशिष्टार्थकतया आवश्यकत्वादत आह अत्र चेति
उत्पत्तिर् इति तादृशस्थूलकालसंबंधस्याप्याद्यक्षणसंबंध एव पर्यवसानेनोत्पत्तित्वमिष्टमेवेति भावः उभयपत्रउ भयत्रापि अत्रेदं बोध्यं ध्वंसप्रतियोगित्वविशिष्टसंबंधावच्छिन्नप्रतियोगि
ताककालिकसंबंध एव समानामत उत्पत्तिस्तेनोभयसमर्थकपदस्य ननानार्थत्वं द्वितीयादिक्षणसंबंधप्रतियोगितावच्छेदकत्वं न तादृशध्वंसाभावः द्वितीयक्षणोत्पन्नध्वंसस्यैव ते
न संबंधेन घटादौ सत्त्वात् तनीसत्वेनतदभावासत्वादिति यथाश्रुते न तु चि रपीमनेनोक्तातिव्याप्तिवारणासंभवादाह प्रदीपस्य समसंबंधत्वावच्छेदेनेति प्रथमसमयपदमिति न
च जन्ममात्रस्य कालोपाधित्वेनोक्तज्ञानस्य समयत्वात्तदोषतादवस्थ्यमिति वाच्यं प्रथमसमयपदोपादानेन यदीयसमयसंबंधस्तेनैव यदीयस्य कालिकसंबंधस्य विवक्षितत्वेन दोषाभा
वात् घटोत्पत्तिपूर्वकालीनतज्ज्ञानसंबंधस्य घटोत्पत्तित्वाभावादाह घटोत्पत्तिक्षणे इति अविनश्यदवस्थज्ञानसंबंधस्योत्पत्तित्वं मध्यसमयपदोपादाने च संभवी तत आह किंच
स्वस्थमिति तज्ज्ञानहानीति इदं च संबंधरूपमेव न तु निर्विशिष्टमित्याशयेन विषयितापि वृत्तिनियामिकेत्याशयेन वा इदं चोध्यं अन्यथा पुनः समयपदं च स्वरूपकथनपरमे
वस्यादर्थमत एवाग्रिमक्षणोत्पन्नहानीत्येव वक्तव्यमिति ध्येयं मध्यमसमयपदमिति तथा च कालिकसंबंधेन वृत्तित्वाभावात् दोष इति भावः तृतीयसमयपदमिति ता
मर्थ्यमुक्तमेव नन्वत्र यदीयसमयसामान्य इत्यस्यैव सम्यक्त्वेन संबंधपदं व्यर्थं न च जन्ममात्रस्य कालोपाधित्वेन भाविघटविषयकज्ञानस्यापि घटीयसमयत्वेन
न त्राद्यक्षणावृत्तिध्वंसप्रतियोगित्वसत्त्वेनासंभववारणाय तदिति वाच्यं समयपदस्यापि व्याहारेणाप्रदीयसत्त्वकालिकसंबंधलाभेनैव तदुद्धारणादिति चेन्नैवं
य

मेवसामग्रीव्याप्तिघटकंवाच्यमित्युक्तसामग्रीव्याप्तेरसंभवः क्वापितंतुरूपसामान्यसामग्र्यांयावत्तत्तत्तंतुतत्तत्संयोगवैशिष्ट्या
संभवादित्यतआहतथापीतिअयमाशयः यादृशविशेषसामग्र्यायेनसंबंधेनहेतुतानस्यात्सएवसंबंधोवैशिष्ट्यमिति
नानुगमः तंतुरूपसामान्यसामग्र्यांप्रत्येकंयावत्तत्तत्तंत्वादिरूपविशेषसामग्रीवैशिष्ट्यंनिवेश्यनानासामग्रीव्याप्तीनामनु
पगमात्त्वनचरमोपिदोषइति सर्वत्रैवकारणतायांव्यापकतारूपमेवनिविशतइतिनियमवादिनांमतमाहकेचित्विति व्यभि
चाराभावादितितत्तंतुत्वेनतत्पटत्वेनकार्यकारणभावेकालिकदैशिकव्यापकतारूपमेवनिविशनइतिशेषः नन्वेवमपिक्रि
यासंयोगयोः कार्यकारणभावेव्यभिचारेणव्यापकतारूपनिवेशासंभवेनपूर्वोक्तप्रकारस्यावश्यकत्वेक्रियमर्थमेतावान्प्रया
सइत्यतआहएवमिति आहुरित्यस्वरसोद्भावनंतद्बीजंचैवमपिसमवायेनकार्योत्पत्तिनियामकालाभः तादात्म्येनकार्योत्पत्तौ
कारणेत्वस्मिन्पूर्वक्षणेकारणसत्त्वासंभवश्च स्वस्यपूर्वमसत्त्वात् किंचविशेषरूपेणसंबंधत्वाभावात्स्वानुयोगिकसमवायेन
हेतुत्वासंभवएवएतेनतत्तंतुनिरूपितसमवायेनपटंप्रतितादात्म्येनतत्तंतुत्वेनहेतुत्वमितिनव्यभिचारइत्यपिनिरस्तं
नव्यास्तुनतत्तंतुजन्यतावच्छेदकंतत्तत्तंतुसमवेतत्वविशिष्टपटत्वमितिनव्यभिचारइत्याहुस्तदपिचिंत्यंतत्पटत्वावच्छिन्नकार

म॰ प्र॰
२५३

रणतयैव दीधितिकृतोक्तस्य तत्पदोत्पादवारणस्योचितत्वात् सामानाधिकरण्येति समवायविशेषणतोभयघटितेत्यादि दी॥
धितौ प्रतियोगीति जन्यभावत्वावच्छिन्नेत्यर्थः जनकत्वादिति तत्पात्रयद्विशेषयोरिति स्वाश्रयेन समवायेन जन्यभावत्वावच्छिन्नं प्रति
विशेषणतया प्रागभावत्वेन हेतुत्वमित्याशयः यत्तु विलक्षणप्रतियोगितासंबंधेन कारणता तादात्म्येन च कार्यतेत्याशयइति त
च्चिन्त्यं स्वाश्रय एव प्रतियोगिजनक इति यथा स्यात् तस्मात् समवायेन कार्योत्पत्तिनिर्वाहाच्च ननु द्वयोस्तंत्वोः कारणत्वकल्पने म
पेऽस्यैकस्य प्रागभावस्य कारणत्वासंभवश्च सत्यपि वैसत्वात् किंच विशेषणरूपेणासंबंधत्वाभावात्वानुयोगिकसमवायेने
हेतुत्वासंभव एव एतेन तत्तत्तंतुनिरूपितसमवायेन पटं प्रति तादात्म्येन तत्तत्तंतुत्वेन हेतुत्वमिति न व्यभिचार इत्यपि निरस्तं
न्यायाक्त तत्तत्तंतुजन्यतावच्छेदक तत्तत्तंतुसमवेतत्वविशिष्टपटत्वमिति न व्यभिचार इत्याहुस्तदपि चिंत्यं तत्पटत्वावच्छिन्नका
रणतयैव दीधितिकृतोक्तस्य तत्पदोत्पादवारणस्योचितत्वात् सामानाधिकरण्येति समवायविशेषणतोभयघटितेत्या
दि दीधितौ प्रतियोगीति जन्यभावत्वावच्छिन्नेत्यर्थः जनकत्वादिति तत्पाचयद्विशेषयोरिति स्वाश्रयेन समवायेन जन्यभाव
त्वावच्छिन्नं प्रतिविशेषणतया प्रागभावत्वेन हेतुत्वमित्याशयः यत्तु विलक्षणप्रतियोगितासंबंधेन कारणता तादात्म्ये

राम॰
२५३

राम॰

ध्वस्तोत्पादिकारिकारिकाभ्यां संबंधोपादानेनात्रापि तदुपादानात् पस्वदार्थेन समं समयस्यानन्वयेन यथासंनिवेशे वैयर्थ्याभावाच्च
नन्वक्रियेति अत्र क्रियामात्रस्येति ध्वंसस्येति च सावधारणं अन्यथा जन्यमात्रस्य कालोपाधित्वाप्रतिक्षेपेणावक्ष्यमाणाति
व्याप्त्यसंगतेः अनुपदमेव चैतद्व्यक्तीभविष्यति ननु प्रतिक्षणं कस्यचिद्विनाशेन जन्यमात्रस्य कालोपाधित्वेन तद्दोषात् द्वि
तीयादिक्षणाविनष्टपदार्थसंबंधस्यापि तद्दोषसमयसंबंधत्वाक्रांततया तस्य च द्वितीयादिक्षणावृत्तिध्वंसप्रतियोगित्वा
भोक्त्याति व्याप्तिरत आह तद्दोषादेति कालोपाधित्वाभावादिति जन्यमात्रस्य कालोपाधित्वानंगीकारादित्याशयः अ
तएव पूर्वं क्रियामात्रस्येत्याद्युक्तं प्रतिक्षणं क्रियाया विनाशाभ्युपगमे द्वित्रिक्षणमध्ये क्रियाया विनाशेन ज्ञानादेस्त्वेवास्मिन्
मते आह प्रतिक्षणमिति उत्क्षणं उत्पत्तिलक्षणं निरुक्तेति अवच्छेदकत्वस्यानतिरिक्तवृत्तित्वरूपस्य व्याप्यत्वे पर्यवसानादि
ति भावः न वित्ति तथा च सत्येवेति निर्देशोनुपपन्न इति भावः न तदधिकरणेति न च चिरातीतनिष्ठा निरुक्तप्रतियोगिना तदधिक
रणक्षणावृत्तित्वव्याप्येवेति वाच्यं स्ववृत्तिध्वंसप्रतियोगितात्वेन तदधिकरणक्षणावृत्तित्वव्याप्यतावच्छेदकत्वविवक्षणात
अत्र व्याप्यत्वं तदभाववदवृत्तित्वं तदधिकरणक्षणावृत्तित्वाभावश्च तदधिकरणक्षणावृत्तित्वमेव एवं च तदधिकरण

भा॰ प्र॰
२५४

क्षणावृत्तित्वमेव निरुक्तं व्याप्यत्वमिति पर्यवसितं एतेन तदधिकरणक्षणावृत्तिवृत्तित्वस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं
तदधिकरणक्षणावृत्तिस्ववृत्तिध्वंसप्रतियोगिकसमयवृत्तित्वमेव वोत्पत्तिक्षणमस्तु व्याप्यत्वाप्रवेशेन लाघवादित्यपिप
रास्तं तस्य क्षणांतरत्वेन एतद्ग्रन्थक्षणीय पाशं निवेशे वैयर्थ्याभावात् यत्तु अनतदवृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताक
त्वमेव विवक्षितं लाघवात् एवं च तदवृत्तिस्ववृत्तिध्वंसप्रतियोगिताकत्वोक्तौ हि तीयक्षणादावतिव्याप्तिरिति तन्न जन्यमात्र
स्य कालोपाधित्वाभावमभ्युपगम्यैतद्ग्रन्थक्षणावतारणेन कालिकसंबंधेन तद्वृत्तित्वाप्रसिध्यानवृत्तित्वघटितजक्षण
संभवात् पाशं निवेशे वैयर्थ्याभावाच्च अत एव तदवृत्तिप्रतियोगिकत्वव्याप्यस्ववृत्तिध्वंसत्वकसमयवृत्तित्वमेवोत्पत्ति
लाघवादित्यपि निरस्तमिति दिक् पूर्वोक्तेति यत्र घटोत्पत्तिक्षणद्वयाघुक्तेः स पर्षः तद्वारणायापीति अपिना कालिक
संबंधेन ध्वंसस्य स्ववृत्तित्वलाभसमुच्चयः स्वजन्येति नचैवं विभागोत्पत्त्यनंतरं कर्मक्षणव्यवहार इति वाच्यं तादृशक्रियांतरै
रेव तद्व्यवहारात् आद्यक्षणावच्छिन्नस्य कर्मणः एव क्षणत्वमित्याशयेन क्षणत्वं क्षणामुक्त्वा तादृशस्य स्थिरमात्रस्यैव क्षण
त्वमित्याशयेन लक्षणांतरमाह स्ववृत्तीति द्वितीयादिक्षणोत्पन्नपदार्थमादायासंभववारणायाप्रतियोग्यंतं पदार्थविशेषणं

एम॰
२५४

अतीतपदार्थमादायतद्वारणायस्ववृत्तीति लक्षणद्वयाघात्मकस्थूलकालेऽतिव्याप्तिवारणाययावदिति इदंचलक्षणद्वयंमहा
प्रलयानंगीकारेबोध्यंतदंगीकारेतुतदुत्पत्तिक्षणेऽव्याप्त्यानोक्तंलक्षणंकिंतुस्वावृत्तिप्रागभावप्रतियोगिस्ववृत्तियावत्पदार्थ
विशिष्टसमयत्वमितिलक्षणंलक्षणंबोध्यं अंत्यशब्दादीति क्षणिकमित्यादिः आदिनाज्ञानादिपरिग्रहः स्ववृत्तिरितिस्ववृ
त्तित्वंचवक्ष्यमाणरीत्याकालिकसंबंधेनबोध्यं अत्रध्वंसप्रतियोगिनोरेकक्षणावृत्तित्वाभावेनस्थूलकालवृत्तित्वेनचनासंभ
वातिप्रसंगौः सत्त्वादितिअसंभववारणायेतिशेषः नचतथापिध्वंसाद्यात्मकघटाभावादिभेदप्रतियोगिघटाभावाद्याधार
त्वेनासंभवतादवस्थ्यमितिवाच्यं ध्वंसत्वनिरूपकत्वस्यप्रतियोगितायांनिवेशेनोक्तदोषाभावात् अथात्राव्याप्तेरवृत्तिधर्माव
वच्छिन्नभेदमादायातिप्रसंगवारणायस्ववृत्तिध्वंसप्रतियोग्याधारत्वावच्छिन्नभेदस्यविवक्षणीयत्वेतथापिचमहाप्रलयोत्पत्ति
क्षणेऽव्याप्तिस्तत्रलाघवेनध्वंसप्रतियोग्याधारत्वस्यैवावच्छेदकतयामहाप्रलयवृत्तिध्वंसप्रतियोग्याधारत्वावच्छिन्नभेदास
त्त्वादितिचेन्नः विशेषणभेदकूटस्यैवलक्षणेनिवेशात् गुरोस्यावच्छेदकत्वमित्याशयात् अत्रस्वप्रतियोग्यधिकरणावृत्तिस्व
त्वसंबंधेनध्वंससामान्याभाववैशिष्ट्यमनुगतंलक्षणत्वंबोध्यं अनंगीकारेत्विति तथाचभेदस्याव्याप्यवृत्तितयास्थिरस्यक

भा॰ प्र॰ २५५

मदिः कपालमपि स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वासंभवादसंभव इति भावः यत्तु प्रतियोग्यनाधारभिन्नत्वं किंतु प्रतियोग्याधारताविरहः
प्रतियोगिविरह एव वा उपांत्यादिक्षणावच्छेदेन स्ववृत्तिध्वंसप्रतियोग्यधिकरणस्यापि घटादेरंत्यक्षणावच्छिन्नस्य तादृशाभाववि
शिष्टत्वान्नासंभव इति नवीनैरुक्तं तच्चिंत्यं स्वजनककालेऽपि तादृशध्वंसानधिकरणदेशावच्छेदेन तादृशध्वंसकालेऽपि तादृशध्वंसप्र
तियोग्यनाधारत्वसत्त्वेनातिप्रसंगात् यावानिति इदं च तादृशयत्किंचित् ध्वंसवैशिष्ट्यमादायातिप्रसंगवारणाय लक्षणत्वे लक्षण
त्वसंभवे किंचित्कालावृत्तित्वं किंचित्कालावच्छिन्नभावत्वं पूर्ववदिति कालिकसंबंधेन स्ववृत्तित्वस्य यावदभाववैशिष्ट्यस्य चलाभाये
त्यर्थः अतिरिक्ताभावानंगीकार इति तथा चातिरिक्ताभावघटितमुक्तलक्षणं न संभवतीति भावः न चैवमप्यधिकरणात्मका
भावघटितमेवोक्तलक्षणमस्त्विति वाच्यं प्रतिक्षणं कस्यचिदुत्पत्तिविनाशेन च तादृशलक्षणस्यासंभवग्रस्तत्वात् ग्रंथविरोधा
दिति इदं चातिरिक्तध्वंसघटितं स्वपूर्वत्वमित्याशयेन वस्तुतस्तु तस्याधिकरणात्मकध्वंसघटितत्वेन कोऽपि ग्रंथविरोध इति
ध्येयं केचित्तु स्वस्वपूर्ववर्त्तीति ग्रंथोऽतिरिक्ताभावानंगीकार एव स्वपूर्वत्वं चेत्यादिकं तु अतिरिक्ताभावपक्ष एव वक्ष्यतीति न त
ग्रंथविरोध इत्याहुः उभयं स्ववृत्तिस्वपूर्ववृत्तित्वोभयं द्वितीयादिक्षणेऽपि स्वस्वपूर्ववर्त्तियत्किंचित्पदार्थवैशिष्ट्यसत्त्वादित्यर्था

राम॰ २५५

मिरतोपावदिति कालिकसंबंधेन स्वपूर्ववृत्तित्वमिति विशेषप्रयोजनमाह तेनेति कालिकसंबंधेन स्ववृत्तित्वविशिष्टस्य निवेशयोः प्रयो-
जनमाह न वेत्यादिना असत्त्वेपीति अव्याप्तिरित्यनेनान्वयः सत्त्वेपि उक्तस्थाने सत्त्वेपि अतिव्याप्तिर्वस्यनेनान्वयः स्वपूर्वत्व-
मिति क्षणत्व क्षणानुविष्टमित्यादि उत्पत्तिलक्षणानुविष्टक्षणस्येति उत्पत्तिघटितत्वादित्यस्य क्षणघटितो स्थितिघटितत्वादि-
त्यर्थः स्थानं तरोत्पन्नस्य स्वद्वितीयक्षणोत्पन्नस्य चासंभवेनोक्तरीत्या महाप्रलयक्षणेनाव्याप्तिरित्याशयेनाह महाप्रलया-
तिरिक्तक्षणेति यावदितीति कालविशेषणमिति शेषः अत्र नव्याः स्वानधिकरणत्वे सति स्ववृत्तिध्वंसप्रतियोगित्वं स्वपू-
र्वत्वमिसेवक्ष्यायः एवं स्ववृत्तिप्रतियोगिकध्वंसाधारत्वाभाववैशिष्ट्यं स्वप्रतियोगिमत्तादात्म्यसंबंधावच्छिन्नध्वंसाभाववैशि-
ष्ट्यात् एकं महाप्रलयसाधारणमप्याद्यक्षणावच्छिन्नकर्मादिसाधारणं क्षणत्वमवश्यमिति प्राहुः तस्मादिति घटपूर्वकाल-
प्रसिद्धेरिति भावः स्थिरघटादिस्थले क्षणद्वयमध्ये क्रियाया उत्पत्तिविनाशाभावेपि तत्क्रियादिक्षणोत्पत्तं भवेन तदधिकरण-
प्रसिद्ध्यात दुत्पत्तौ नाव्याप्तिरित्याशयेनाह ज्ञानाद्युत्पत्ताविति अस्थिरेत्यादिः प्रतिक्षणं क्रियोत्पत्तिविनाशयोः संदिग्धतया
नोक्तदोषनिष्पत्तपत आह महाप्रलयोत्पत्ताविति अव्याप्तिरिति महाकालस्य क्षणत्वाभावात्तत्संबंधस्योत्पत्तित्वाभावा-

त्येत्यर्थः अव्यावर्त्तकत्वादितिमहाकालीयघटाद्यधिकरणतायाइत्यादिः एवमग्रेपि अनुप्रवेशेतिअवच्छेदकतयेत्यादिः तेषा
मेवेतिआवश्यकत्वादितिभावः मात्यात्क्तजन्यमात्रस्यैवेतिइदानींघटइत्यादिप्रतीतेर्यदिशुद्धमहाकालोधिकरणत्वेनवि
षयस्तदातदैवत्वादृशप्रतीत्यापत्तिः यदिचक्रियपदार्थावच्छिन्नस्तदापिनित्यस्याव्यावर्त्तकतयासएवदोषइतिव्यावर्त्तकत
त्कालीनजन्यपदार्थेनव्यावर्त्तकेनावच्छिन्नमहाकालएवविषयइतिकालविशेषणामेवकालोपाधिः विनिगमनाविर
हादुपाधावधिकरणत्वमित्याशयइतिमाकुः उक्तरूपेतिस्ववृत्तिध्वंसप्रतियोग्यनाधारत्वादिरूपेत्यर्थः दोषइतिपूर्वोक्तइत्या
दिः चरमध्वंसस्यैवक्षणत्वादितिइदमुपलक्षणंचरमध्वंससंबंधस्यैवचरमध्वंसरूपमहाप्रलयोत्पत्तित्वादित्यपिद्रष्टव्यंमतां
तरमाहतन्विति कश्चिदितिअत्रमहाकालेक्षणत्वव्यवहारविषयत्वस्यकेनाप्यनंगीकारात्तदप्रसक्तप्रतिषेधायत्तिरेवास्य
रसः क्षणघटितमितिलाघवादित्यादि अत्रव्याख्यातमतेदीधितावुत्पत्तिरित्येवपाठः उत्पत्तिरित्यपिकेचिदितिपाठस्तु प्रामा
दिकः एतत्क्षणोत्पन्नेदृष्टत्वादितिध्येयं अत्रापिक्षणघटितोत्पत्तिलक्षणेपि इतिबोध्यंइत्यतोजन्यमात्रस्यैवकालोपाधि एम०
त्वंबोध्यं दीधितौनेवमितिएवमस्माकंकिंचिन्नापचीयतइत्यत्वयः तथाचप्रागभावानंगीकारइष्टापत्तिरितिभावः पदार्थानां

देशनियमोपपत्तये प्रागभावांगीकारस्यावश्यकतया कथमेकदेशिनां प्रागभावानंगीकारस्त्वाशयेन एकदेशिमते एवत्तटस्थः
शंकानेऽन्यथेति परस्येति सहस्त्वनेनाधारत्वस्येति शेषः स्वानधिकरणेष्विति मिथस्संयुक्तेष्विति शेषः स्वानधिकरणकपा
लादीनां स्वरूपायोग्यत्वादेव न तन्तूपटोपादानसंभव इत्यत आह तंतुष्विति व्याख्यायां तेषामपि स्वानधिकरणतंतूनामपि
यत्किंचिद्व्यक्तेः यत्किंचिद्व्यक्त्युत्पत्तेः स्वानधिकरणेषु तादृशतंतुषु तत्पटोपादनं तत्पटोत्पत्त्यापादनं वस्तुतस्तु यत्किंचि
द्व्यक्तेरिति तत्पटोपादानमित्यपि च यथाश्रुतमेव सम्यक् पूर्वोपदर्शितरीत्या लाघवेन सामग्र्याः कार्यस्यैव व्याप्यतया कार्योत्पत्ते
र्व्याप्यत्वात् तथा च तत्पटत्वस्य कार्यतानवच्छेदकतया तदवच्छिन्नापत्तिर्न संभवतीति भावः कादाचित्कत्वं किंचित्कालानुत्पत्ति
कत्वं कारणेति तत्कालाव्यवहितपूर्ववृत्तिकारणाभावप्रयोज्यमित्यर्थः कादाचित्कत्वस्य किंचिद्देशानुत्पत्तिकत्वस्य कारणेति नदे
शवृत्तिकारणाभावप्रयोज्यत्वादिति भावः सामानाधिकरण्येति समवायघटितेत्यादिः उक्तक्रमेणैवेति तादृशधीमतितादृशे
च्छाऽस्त्यैव तच्छून्ये तत्त्वापादकाभाव इति रीत्येत्यर्थः सामग्र्यात्मककारणवैचित्र्येण कार्यस्याप्यवैचित्र्येण यावत्पटानामेकत्वेन तत
त्पटत्वस्यैव पटत्वरूपतया तत्पटत्वावच्छिन्नापादनं संभवत्येव न चैवमिष्टापत्तिरिति वाच्यं फलतः सर्वेषां पटानामभेदाप

त्तोपपर्यवसानादिति प्राहुः तत्वेनतत्वेनतत्तद्व्यक्तित्वेन कथमितिसामान्यसामग्र्याएवापादिकायाः सत्वादितिभावः तत्परत्वे
नितद्धर्मावच्छिन्नविशेषसामग्रीसहकृतायाएवसामान्यसामग्र्यास्तद्धर्मावच्छिन्नफलव्याप्यत्वादितिभावः तत्पदानधिक
रणतंतुरूपविशेषसामग्र्येवतत्राप्यस्तीत्यतआहतत्पदानधिकरणेतिअभावादितिविशेषधर्मावच्छिन्नहेतोरेवविशेषसाम
ग्रीत्वेनतादृशतंतूनांनविशेषसामग्रीत्वमितिभावः ननुतत्पटस्यसमवायेनस्वाधिकरणतंतुंतरेष्वपिसत्वेनतत्रतादा
त्म्येनतत्तंतोरभावेनव्यभिचारात्कथंतत्तद्व्यक्तित्वेनतत्तत्तंतूनांतत्पटजनकत्वमतआहअग्रेदमवधेयमित्यादिव्याघवा
दाह उत्पत्तिसंबंधेनेति तत्पूर्वकाले तदव्यवहितपूर्वकालेनत्वितितत्पाच्चदैशिकव्यभिचारस्यदैशिकव्यापकताविघ
टकत्वेनहेतुताविघटकतयाविशेषकारणतायांकालिकव्यापकतायादैशिकसामानाधिकरण्यमात्रस्यचनिवेशत्वे
नदैशिकव्यापकतायाअनिवेशेनोक्तदैशिकव्यभिचारस्यनदोषत्वमितिभावः एककालीनत्वादिरूपंविशेषसामग्रीवैशि
ष्ट्यंसामान्यसामग्र्यामस्त्येवेत्यतआहविशेषसामग्रीवैशिष्ट्यंचेत्यादि नन्वेवंकस्याश्चिद्विशेषसामग्र्यास्तादात्म्यरूपंवैशिष्ट्यम्
स्यकस्याश्चित्समवायरूपंतदित्यननुगमः किंचयत्किंचिद्विशेषसामग्रीवैशिष्ट्यस्यातिप्रसक्ततयायावद्विशेषसामग्रीवैशिष्ट्य

नैयकोमेवसामग्रीव्याप्तिघटकं वाच्यमित्युक्तसामग्रीव्याप्तेरसंभवः क्वापि तंतुरूपसामान्यसामग्र्यां यावत्तत्तत्तंतुतत्संयोगवै
शिष्ट्यासंभवादित्यत आह रूपमूह्यमिति अयमाशयः यादृशविशेषसामग्र्या येन संबंधेन हेतुता तस्या स एव संबंधो वैशि
ष्ट्यमिति नाननुगमः तंतुरूपसामान्यसामग्र्यां प्रत्येकं यावत्तत्तत्तंत्वादिरूपविशेषसामग्रीवैशिष्ट्यं निवेश्य नानासामग्रीका
र्यतानामभ्युपगमाच्च न चरमोपि दोष इति सर्वत्रैव कारणतायां व्यापकतारूपमेव निविशत इति नियमवादिनां मतमाह के
चित्त्विति व्यभिचाराभावादिति तत्तंतुत्वेन तत्पटत्वेन कार्यकारणतायां व्यापकत्वाभावे कालिकदैशिकव्यापकतारूपमेव नि
विशत इति शेषः नन्वेवमपि क्रियासंयोगयोः कारणाभावे व्यभिचारेण व्यापकतारूपनिवेशासंभवेन पूर्वोक्तप्रकारस्याव
श्यकत्वे किमर्थमितावान्प्रयास इत्यत आह एवमिति आहुरित्यस्वरसोद्भावनं तद्बीजं चैवमपि समवायेन कार्योत्पत्तिनियामका
र्यसत्त्वाधिकरणे तस्मिन्पूर्वक्षणे कारणसत्त्वासंभवश्च स्वस्य पूर्वमसत्त्वात् किंच विशेषरूपेण संबंधत्वाभावात्स्वानुयोगि
कसमवायेन हेतुत्वासंभव एव एतेन तत्तंतुनिरूपितसमवायेन पटं प्रति तादात्म्येन तत्तत्तंतुत्वेन हेतुत्वमिति न व्यभिचार इत्यपि नि
रस्तं नव्यास्तु तत्तत्तंतुजन्यतावच्छेदकतत्तत्तंतुसमवेतत्वविशिष्टपटत्वमिति न व्यभिचार इत्याहुस्तदपि चिंत्यं तत्पटत्वावच्छि

म॰ प्र॰
२५८

कारणतापैवद्दीधितिकृतोक्तस्य तस्य दोषादवारणस्योचितत्वात् सामानाधिकरण्येति समवायविशेषणतोभयघटितेत्यादि दीधि
तौ प्रतियोगीति जन्यभावत्वावच्छिन्नेत्यर्थः जनकत्वादित्तिन पाचयद्विशेषयोरिति स्वाप्येन समवायेन जन्यभावत्वावच्छिन्नं प्रतिवि
शेषणतया प्रागभावत्वेन हेतुत्वमित्याशयः यत्तु विलक्षणप्रतियोगितासंबंधेन कारणतातादात्म्येन च कार्यतेत्याशय इति
तच्चिंत्यं स्वाश्रय एव प्रतियोगिजनक इतियं पारवारस्यात् समवायेन कार्योत्पत्त्यनिर्वाहाच्च ननु द्वयोरनयोः कारणत्वकल्पने म
पेऽप्येकस्य प्रागभावस्य कारणत्वे लाघवमिति युक्त्यानेकत्र प्रागभावासिद्धावपि द्वित्वं तु क्व एव प्रागभावसिद्धिसंभवेनान्यत्र प्रा
गभावसिद्धाविस्यादिना द्वितंतुके प्रागभावसिद्धेरन्यत्र प्रागभावसिद्धिमूलकत्वोक्तिरयुक्तेत्यत आह व्याख्यायांद्वयोरेवेति आ
शयः अनेकत्रेत्यादिग्रंथस्याशयः प्रागभावसिद्धिरिति यत्तु तावतापि द्वितंतुकस्य प्रागभावासिद्धिरेव तत्रत्यद्वित्वादिप्रागभा
वेनापि तस्य दोत्पत्तिसंभवादितितन्न विनिगमनाविरहेण बहुविधद्वित्वादिप्रागभावहेतुतामपेऽप्येकविधद्वितंतुकप्रागभाव
तुत्वस्यासिद्धौ बाधकाभावात् अयोक्तयुक्त्यासिद्धस्यापि यदार्थस्य विनाशित्वे भावत्वे च मानाभावेन प्रागभावासिद्धिरेवेति चेद
त्रसांप्रदायिकाः उत्पन्नपुनरुत्पादवारणाय कार्यादेः प्रतिबंधकत्वकल्पने गौरवापत्तोक्तयुक्त्यासिद्धस्य पदार्थस्येवोत्पन्नपुन

राम॰
२५८

हत्वादेवारकत्वंकल्पनेलाघवात्तथाचतस्यविनाशित्वसिद्धिरावश्यकी अन्यथा तद्वारकत्वस्यैवासंभवात् एवं तस्य जन्यभावत्वेऽन
वस्थापत्त्यात्तस्यानादित्वसिद्ध्याऽनादिभावस्यनाशासंभवादभावत्वमपि सिध्यतीत्याहुः नवीनास्तु तस्य टादिनाशानंतरं तदा
अयतंतुघुपटांतरोत्पत्तिसमये पूर्वपटव्यक्तेरापत्तिवारणानुरोधेन तस्य विनाशित्वसिद्धिः अन्यथा तादृशकारणस्य सामान्य
सामग्रीसहितस्य सत्वेन तदापत्तेस्तत्पटादिव्यक्तिध्वंसस्य प्रतिबंधकतामंतरेण दुर्वारत्वात् एवं च सप्रतियोगिकत्वमप्यावश्यं
कं अन्यथानुगतप्रागभावनाशकत्वदुर्वचत्वात् सप्रतियोगिकत्वे च स्ववृत्तिप्रतियोगिकत्वसंबंधेन कार्यत्वेनैव सामान्यतः प्रा
गभावनाशकत्वासंभवात् सिद्धे च सप्रतियोगिकत्वेऽभावत्वमपि सिद्धमेवेत्याहुः तन्नात्मविभुमनोरसंयोगादेस्तथारणासप्र
तियोगिकत्वांगीकारेणाप्युपदर्शितरीत्या कार्यस्य तन्नाशकत्वसंभवेन सप्रतियोगिकत्वसिद्धावप्यभावत्वासिद्धेर्दुष्परिहरत्वा
दितिदिक् तटस्थाः शंकते नन्वेवेति तत्र नवतंतुकपटे तत्वेन दशतंतुकपटध्वंसत्वेन हेतुत्वादि नचैवं तत्र दशतंतुकपटोत्प
त्तिपूर्वं नवतंतुकपटोत्पत्तिर्न स्यादिति वाच्यं इष्टापत्तेः अन्यथाद्यव्यक्तिद्व्यानुसस्मात्तत्र दशतंतुकपटानुपपत्तिः नन्वेवं
यत्र संयुक्तनवतंतून् परिधाय आद्यक्षणे तदनंतरं च दशमतंतुवपनेन दशतंतुकपटोत्पत्तिस्तत्र पूर्वपटाभावेन आद्यकर्तुः

म० ७०
२५९

पटापिहितत्वरूपनश्यत्ताश्रयत्वेनाद्वैगुण्यप्रसंगः तत्र पूर्वं नवतंतुकपटोत्पत्त्यभ्युपगमे तु तस्य नवतंतुकपटपिहितत्वेनानश्यत्तया
नतद्वैगुण्यमिति महापटपूर्वं स्वल्पपटोत्पत्तिरवश्यमुपेयेत्याशयेनाह इदं चावधेयमिति आद्यकालेपीति अपिनोत्तरकाल
परिग्रहः भवतिभवत्येव एतेन महापटपूर्वं तदाश्रयतंतुषु पटएवनांगीक्रियनेनत्तन्महापटसामग्रीपूर्वकालावच्छिन्नतत्पटा
रंभकसंयोगस्य पटमात्रप्रतिवंधकत्वकल्पनादिति निरस्तो नोक्तिरपि परास्ता नन्वेवं द्व्यवतिद्व्यंतरानुत्पत्त्या कथं तत्र दशतंतुकप
टोत्पत्तिरत आह इदं तु इतरेति अभिघातेन वेमाद्यभिघातादिना तदसमवायिकारणसंयोगनाशेनेति शेषः तन्नाशेत्र नवतंतुकप
टनाश एवत्र दशतंतुकपटोत्पत्तिरिति तदानीं द्रव्याभावरूपप्रतिवंधकाभावस्य हेतोस्तत्र सत्वादिति एतेनात्र तन्नाशइत्यादि
ग्रंथपर्यालोचनया स्वल्पपटनाशस्य महापटहेतुत्वं लब्धं तथा च तुरेष्वित्यादिदीधितिग्रंथासंगतिः तत्र त्रितंतुकादिपटसत्वस्थि
तिकाले न तदुत्पत्तिकालेच स्वल्पपटनाशरूपकारणाभावेन महापटोत्पत्तिप्रसंगासंभवादित्याशंका निरवकाशा नन्वाशइत्या
दिग्रंथस्य प्रतिवंधकाभावात्मकद्रव्याभावहेतुत्वतात्पर्यकतया त्रितंतुकादिपटोत्पत्तिकालेतादृशकारणसत्वेन महापटोत्पत्तिप्र
संगसंभवेन त्रिचतुरेष्वित्यादिग्रंथसंगतेः तार्किकचक्रवर्त्तिनस्तु दशतंतुकपटोत्पत्तिपूर्वं नवतंतुकपटोत्पत्तिर्भवत्येवेति स

एम०
२५९

स्यंपरंतुनवतंतुकनाशेएवनष्टांशतंतुकोत्पत्तिः तत्कालेपितदुत्पत्तौबाधकाभावात् नचद्रव्यस्यप्रतिवंधकस्यसत्वेकथंद्रव्यांतरोत्प
त्तिरितिवाच्यं मूर्त्तवृत्तिकद्रव्येविद्यमानेप्यधिकदेशवृत्तिद्रव्योत्पादस्यानुभवसिद्धत्वेनद्रव्यत्वेनद्रव्यप्रतिप्रतिवध्यप्रतिवध्यप्रति
वंधकभावेस्वाधिकदेशावृत्तित्वविशिष्टसमवायस्यैवप्रतिवध्यतावच्छेदकसंवंधत्वकल्पनेनादोषादित्याहुः विनिगमनाविर
हेणनानाध्वंसानांप्रतिवंधकेगौरवादाहतन्नाशकेति तत्रचतद्व्यक्तित्वावच्छिन्नएवचतत्वेनतद्व्यक्तित्वेनदीधितावुत्पत्ति
प्रसंगइति तथाचतदानींतंतुतत्संयोगादिरूपसमवायिकारणासमवायिकारणसत्वेनतत्पटप्रागभावसत्वेनचतत्पटोत्प
त्तिप्रसंगवारणायप्रागभावांगीकारेपितावत्तंतूनांतत्तद्व्यक्तित्वेनहेतुत्वस्यावश्यकत्वेतेनैवतन्नाशाधिकरणेतंतुघटितप
टोत्पत्तिवारणासंभवेप्रागभावकल्पनंनिरर्थकमितिभावः ननुतत्कार्याव्यवहितपूर्वक्षणावच्छेदेनैवतदधिकरणेतत्प्रागभा
वसंवंधोंगीक्रियतेप्रतियोगिसमवायिपूर्वमिवतत्कालेपिकालएवप्रागभावोवर्त्ततेएवंचतदानींतत्पटप्रागभावस्यतत्रा
सत्वादेवतदुत्पत्तिप्रसंगवारणेनतावत्तंतूनांतत्तद्व्यक्तित्वेनहेतुत्वस्यावश्यकत्वमितिप्रागभावकल्पनंसार्थकमेवेतिचे
दत्राहुः तथासत्येककारणापरिशेषापत्तौजितंवेदांतिप्रभृतिभिः तस्यैवानाद्यविद्यादिनामकत्वादितिप्रागभावस्यसंवंधः

मं० प्र०
२६०

प्रतियोगिपूर्वतत्तत्समवायिपायत्कालावच्छेदेनैवतत्तत्संमवायापत्तिर्वाच्यइत्युक्तापत्तिवारणायतादृशहेतुत्वमावश्यकमेवेतिकप
प्यपिनप्रागभावप्रत्याशेति नचैवमपितस्यटोत्पत्तिप्रसंगवारणायचरमतंतुव्यक्तेरेवतद्व्यक्तित्वेनहेतुत्वमास्तांकृतमन्यतंतुत्वा
तादृशहेतुतयेतिवाच्यं तत्सहस्यतावत्तंतुवृत्तित्वनियमोपपत्तयेउपदर्शितरीत्याप्रत्येकतत्तत्तंतुंनिवेशयनानासामग्रीव्याप्ति
स्वीकारस्यावश्यकतयातन्निर्वाहायतावत्तंतूनांतादृशहेतुतायाआवश्यकत्वात् नचैवंत्रिचतुरेष्वित्यादिग्रंथस्यतादृशहेतु
तावश्यकत्वप्रतिपादकत्वानुपपत्तिरितिवाच्यं तेनग्रंथेनप्रागभावस्यप्रसंगवारकत्वप्रतिपादनेपितत्तत्तदावश्यकत्वस्यापि
प्रतिपादनेनानशंकतेतावदितिकतिपयेतितयाचयावदाश्रयविरहादेवनापत्तिरितिभावः यावदाश्रयविरहोऽकिंचित्करइत्या
शयेनाहकार्यानुत्पादस्येतिनवीनास्त्वकतिपयेति तथाचतावत्तंतुवृत्तित्वानुपपत्त्यातावन्नंतुवृत्तिपटोत्पादस्यत्रिचतुरादितं
तुमात्रेवायान्नापत्तिरितिभावः आपत्तौबाधोनुगुणएवेत्याशयेनाहकार्यानुत्पादस्येतात्पादृत्ताच्छिंसंतयासतिबाधानुगु
णत्वोक्तेरेवौचित्येनकार्यानुत्पादस्येत्यादिग्रंथासामंजस्यात् विनाकारणविरहंविनापटतत्पटकारणतावच्छेदकावच्छिन्नाभा
व व्याप्याप्यांतरवच्छिन्नव्यतिरेकस्येतिइत्यमुपलक्षणंतत्पटकारणप्रागभावव्यतिरेकस्यचेत्यपिद्रष्टव्यं कार्यानुत्पादेऽन्यु

राम०
२६०

पगमं कार्यानुत्पादप्रयोजकस्याभावस्यापत्तिवारणाय पुनः शंकते दीधितौ तत्स्थेति व्याख्यायां तत्तत्तंतूनामेवेति यावत्तंतुत्वेनजन
कत्वासंभवादिति भावः अवच्छेदकतयैव कारणतावच्छेदकतयैव एतावतापि कारणीभूतप्रागभावानसिद्ध एवेत्यत आह अव
च्छेदकत्वेपीति कारणतावच्छेदकतया तत्सिद्धावपीत्यर्थः वेति अप्यर्थकं कारणत्वं भिन्नमंतरं योऽप्यंतः यावत्कारणत्वमपि स्यादिति
लब्धः दीधितौ परस्परासंयुक्तेष्विति तावत्तंतुपूर्वोत्पन्नेष्वित्यादि व्याख्यायां असमवायिकारणस्येति इदमुपलक्षणं समवायिका
रणानां तावत्तंतूनां सत्त्वेपि स्यापि बोध्यं दीधितौ नन्वागभावव्याप्येनेति तत्स्थ प्रागभाववदन्यावृत्तीत्यर्थः तेनातीतानामनागता
नां च संयोगांतराणां तत्स्थत्वेप्यसत्त्वेपि न दोषः तंतुसंयोगेषु तावत्तंतुमात्रवृत्तिसंयोगेषु न तु कालिकतत्स्थविशिष्टप्राग
भावव्याप्यत्वनिवेशान्न दोषः अतीतानागततादृशसंयोगानामतथात्वादत आह व्याख्यायां तत्तंतुमात्रवृत्तिनामेवेति स
र्वेषामिति शेषः दैशिकत्वेपीति यावत्कालिकव्याप्यत्वनिवेशेन तत्समगेतादृकविघमानसंयोगानामप्यतथात्वेन दैशिकव्याप्य
त्वमेव निवेश्यं तथा चातीतानागतसंयोगानामपि तथात्वेन दोषितुक्तं तत्स्थानुत्पत्तिप्रसंगतादवस्थ्यमिति भावः नवेत्यमिति
अतीतानां विशेष्यत्वे नानागतानां च विशेषणत्वेन वारणादिति भावः तत्स्थेति इदं च विशेषणानां तत्स्थसमानकालीन

त्तिकतत्पदानंतरकालवृत्तिसंयोगवारणाय॰ तत्पदस्यमन्निपतकालसंयोगवारणाय तत्पदानधिकरणमिति तत्पदवृत्तिरिति
इदं चातीतसंयोगवारणाय वारणाय वारणायापि अपि नातीतवारणपरिग्रहः न क्षणिकत्वमिति अन्यथातादृशसंयोगव्यक्ते
स्तत्तज्जनकत्वेऽसमवायिकारणनाशस्य द्रव्यनाशहेतुत्वेन तत्पदोत्पत्तिकालेतादृशसंयोगव्यक्तिनाशेन तत्तद्द्वितीयक्षणे तत्
स्य नाशापत्त्यातत्पदस्य क्षणिकत्वस्यादिति भावः संयोगविरहस्येति तत्प्रागभावव्याप्यसंयोगविरहस्येत्यर्थः तेन पत्ततु
नाशात्पूर्वं तंतुकस्य नाशस्तत्तंतुसंयोगस्यानीनत्वेऽपि न क्षतिः तस्य तत्प्रागभावाव्याप्यत्वात् आहुरित्यत्रास्यलविशेषपर्य
वसानुसारेणाद्येशस्य वास्वरसो बोध्यः तत्त्वेनैव तद्व्यक्तित्वेनैव वारणापेति एतद्वारणं च संयोगत्रयमात्रसत्त्वे तत्पदोत्पत्तिवारणा
येति बोध्यं अतिगौरवादिति कारणतावच्छेदकगौरवस्याधिक्यादिति भावः मन्मात्रस्तु न नु घटनिष्ठं तद्व्यक्तित्वं तत्पदस्य एव तत्पा
दविजक्षणानुयोगितासंबंधेन तत्पदत्वत्वेनैव प्रागभावनिवेशेन गौरवमत आह यावत्त्वेति शेषं पूर्ववदित्याहुः नवीनास्तु ता
दृशयावत्त्वावच्छिन्नतादात्म्यस्यैकदेशेऽसत्त्वेन कालिकसंबंधेन घटहेतुत्ववाच्यमिति नत्वानधिकरणत्वं तंतुव्याप्तिवारणम्
नः प्रागभावस्य विशेषणतया हेतुत्वमावश्यकमत आह यावत्त्वेनेति शेषं पूर्ववदित्याहुस्तच्चिंत्यं यावत्त्वविशिष्टस्यैव यावत्तादात्म्य

स्यविद्यमानत्वात्अन्यथापापावद्धूमेनपावद्धूमाइत्यादिप्रतीत्यापत्तेः निमित्तस्यचेतिचकारोनुक्तासमवायिकारणोक्तेस्समुच्चायकः
रणाचापीइतितथाचस्वानधिकरणोद्वित्वाद्युत्पत्तिवारणायप्रागभावस्यहेतुत्वमित्याशयः वस्तुतस्तुएकघटादौपर्याप्ति
संबंधेनद्वित्वाद्युत्पत्तिवारणायसमवायिनामसमवायिनांचावहूनांतद्व्यक्तित्वेनहेतुत्वकल्पनेगौरवमितिपर्याप्तिसंबंधे
नद्वित्वादिकंप्रतिपर्याप्तिसंबंधेनतत्प्रागभावस्यहेतुत्वंवक्तव्यंव्यासज्यवृत्तिधर्मप्रागभावस्यापिव्यासज्यवृत्तित्वस्वीकाराद्दोष
इत्येवाचार्याणामाशयः त्रित्वादेर्द्वित्वादिसामग्रीजन्यतयाद्वित्वाद्यभेदापत्तिरित्याशंक्यद्वित्वस्यप्रागभावोद्वित्वेत्रित्वस्यत्रि
त्वेहेतुरितिसामग्रीभेदस्याचार्यैःप्रदर्शितत्वात् अतएवदीधितौद्वित्वाद्युत्पत्तिरित्येवपाठः नत्वन्येषामभिमतत्रित्वाद्युत्पत्तिरिति
पाठइतिध्येयं एतेनेतिविवरणोतितत्रापीति परस्यतत्रापस्यदीधितौव्याख्याताप्रागभावंविनाप्युपपादिता अन्येमैथिलाः
उत्पन्नतत्त्वज्ञानस्याद्दृष्टोत्पादवारणायाद्दृष्टत्वावच्छिन्नंप्रतिअनंतमिथ्याज्ञानजन्मवासनानांतत्तद्व्यक्तित्वेनहेतुत्वेगौरवमितिलाघ
वाद्दृष्टत्वावच्छिन्नंप्रत्यात्मतत्त्वज्ञानप्रागभावत्वेनहेतुत्वंकल्प्यतइतिप्रागभावसिद्धिरावश्यकीनचतस्यसामान्यादितुल्यत्वसंभ
विनाभावत्वेमानाभावइतिपूर्वव्याख्यानोक्तंदूषणंयुक्तं समवायैकार्थसमवायान्यतरसंबंधेनसत्तावत्त्वरूपभावत्वग्राहकप्र

मारणाभावेन पूर्वोपदर्शितसांप्रदायिकाद्युक्तरीत्या च तस्याभावत्वसिद्धिरिति वदंति तन्न सम्यक् अनंतातिरिक्तप्रागभावकल्पनामपे
क्ष्य लाघवेनादृष्टजनकतावच्छेदकतया कारणीभूतवासनायामेवैकजातिकल्पनाया लाघवात् नच पटुतरत्वजात्यास्तां कथं
ज्ञातं स्यजातित्वं संभवतीति वाच्यं तादृशजातौ मानाभावात् नच पुनः पुनः स्मरणमेव तत्र मानमिति वाच्यं तत्संस्कारोद्बोधकसमव
धानादेव पुनः स्मरणोपपत्तेः अत्रेदं बोध्यं पटक्रमेणैव सहस्रादितंतूनां तत्संयोगानां चोत्पत्तिस्तत्र त्रिचतुरैरेव सा युक्तरीत्या
पूर्वं तत्पटोत्पादकारणाय सर्वव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वस्यावश्यकतया तेनैव देशनियमोपपत्तौ प्रागभावसिद्धेरसंभवे
ऽपि यत्र युगपदेव सकलतंतूनां तत्संयोगानां चोत्पत्तिस्ततः पटोत्पत्तिस्तत्र प्रागभावहेतुत्वेन तद्धटितसामग्र्या स्वीकारे
णैव देशनियमोपपत्तौ सर्वव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वमनावश्यकमिति तत्र प्रागभावसिद्धिर्दुर्वारा यत्तु तत्र तावद्व्यक्तित्वं
व्याप्तिशेषहेतुतयैवातिप्रसंगवारणं संभवतीति किं प्रागभावेनेति नवीनैरुक्तं तत्र समीचीनं एवमपि बहूनां तंतूनां युगपदुत्प
त्तिनाना संयोगाद्युत्पत्तिः पटस्य नानासंयोगनाशात्पटस्य पुनस्तेषामेव तंतूनां संयोगांतरात्पटांतरोत्पत्तिकाले पुनस्तस्मादेवा
रणाय प्रागभावसिद्धेरावश्यकत्वात् द्वित्वादेरपेक्षाबुद्धिव्यंग्यत्ववादिनवीनमते तत्पटोत्पादकतंतुव्यक्तिविशेषस्य तदानीमप्यन

पापात्तत्तत्कालावच्छिन्नसंख्याविशेषस्य हेतुत्वे चातिगौरवात् किंच संख्यायां पुरुषभेदेन नानात्वेन विनिगमनाविरहेणा

नंतसंख्याविशेषहेतुत्वापेक्षया एकस्याः कार्यत्वावच्छिन्ने प्रागभावहेतुतायाः कल्पनमेवोचितमिति प्रागभावसिद्धि

र्ब्रह्मणापि दुरपवादा । दीधितिकाराणामप्ययमेवाशयस्तुन्नीपतेऽन्यथा तेषामेकदेशिनो वर्णयंतीत्यनेनास्वरसोद्भा

वनानुपपत्तेः केचित्तु अतिरिक्तानंतस्वत्वस्वीकारे तदुत्पत्तिविनाशकल्पने च गौरवमिति विक्रयादिप्रागभावविशिष्टक्रया

दिध्वंसस्यैव स्वत्वरूपतांगीक्रियते लाघवादिति प्रागभावसिद्धिः एवं पित्रादीनां मरणादिनैव पातित्यादिना पितृदीयधनेते

षां स्वत्वेन श्यति तत्पुत्रादीनामुत्पद्यत इति स्मृतिसिद्धं तथा च पतितेन प्रायश्चित्तानुष्ठानेपि पूर्वार्जितधनेक्रयादिकं विनाधि

कारोनस्यात् स्वत्वोत्पादकाभावादिति प्रायश्चित्तप्रागभावविरहविशिष्टपातित्यस्यैव स्वत्वनाशकत्वमुपेयमिति प्रागभावसि

द्धिरावश्यकीत्याहुः अधिकमन्यत्रमत्कृतौ द्रष्टव्यमिति विसं स्तेमः प्रागभावमिति तत्प्रतियोगिसंनिकर्षत्वेनेति शेषः वर्णयं

तीति प्रसंगेन प्रागभावसिद्धावपि कारणतया संमतप्रागभावसिद्ध्यर्थं वर्णनं व्याख्यायां पुनरुत्पत्त्यापत्तीति न च क्रिया

याः कार्यत्वहभावेन हेतुत्वान्नैषापत्तिरिति वाच्यं तपासत्विहेतुतायां कार्यकालांतर्भाविन व्याप्तिनिवेशेन गौरवस्य दुर्वार

म॰ प्र॰
२६३

त्वात्॰ तथापि संयोगजसंयोगस्योक्तरीत्यापत्तेर्दुर्वारत्वाच्च संयोगात्यंताभावइति क्षणनियतपूर्ववर्त्तिताकइत्यादिः हेतुर्वाच्यइति अत्रा
वच्छेदकतासंबंधेन संयोगप्रतियोगितेन संबंधेन संयोगात्यंताभावस्य हेतुत्वं बोध्यं प्रादेशिकत्वेति देशविशेषावच्छिन्नत्वेत्यर्थः एवमग्रे
पि शाखादेरिति क्षणनियतपूर्ववर्त्तिताकेत्यादि अवच्छेदकतासंबंधेनेति तृतीयार्थोऽवच्छिन्नत्वं कार्यतानिरूपकत्वरूपहेतुत्वै
कदेशकार्यतान्वयि वाच्यमिति अभावात्तत्तादात्म्येनाभावात् तदवच्छिन्नइति अवच्छेदकतासंबंधेन तत्त्वेत्यर्थः तदर्थ मूलादि
परः उभयेति संयोगात्यंताभावशाखाद्यवच्छेदकोभयेत्यर्थः हेतुत्वापेक्षया अनन्यथासिद्धत्वद्वयकल्पनापेक्षया प्रागभाव
स्येति क्षणनियतपूर्ववर्त्तिताकस्येत्यादिः हेतुत्वं अनन्यथासिद्धत्वमात्रं तस्य च प्रागभावस्य च स्वावच्छेदकावच्छेदेन अवच्छे
दकताघटितसामानाधिकरण्यसंबंधेन स्यादिति तथा चोक्तरीत्या लाघवात्प्रागभावसिद्धिर्न स्यादिति शेषः शाखावच्छेदे
नेति उत्पद्यमानसंयोगस्य शाखावच्छिन्नत्वे नियामकाभावादित्यर्थः यथाश्रुते क्रियासंयोगयोः समवायमंतर्भाव्यैव हेतु
हेतुमद्भावेनासंगत्यापत्तेः तदवच्छेदेन शाखावच्छेदेन प्रादेशिकत्वेति तथा च तादृशक्रियायाम्निरुक्तजनकत्वेनैव संयोग
स्य प्रादेशिकत्वनियमोपपत्तौ किं तदुपपादकतया प्रागभावकल्पनेनेति भावः अभावेनेति भावः अभावेनेति निरुक्तजन

त्वव्यवच्छेदः हेतुतयाहेतुत्वस्य वक्तुंशक्यतयाप्रागभावाभावादेवेति न प्राचनितत्कजनकत्वस्यास्तिइतयाप्रादेशिकत्वनियामक
त्वासंभवेन प्रागभावस्यतन्नियामकतयाकल्पनमावश्यकमितिभावः नन्वेवमपिमूलाभिमुखक्रियातः शाखावच्छिन्नसं
योगोत्पादोदुर्वारः तस्याएतद्व्यक्तित्वेनतत्रहेतुत्वसंभवात्तत्राह शाखेति क्रियांतरस्यशाखाभिमुखक्रियाव्यक्तेः तत्र
शाखावच्छिन्नसंयोगे तत्वेन तद्व्यक्तित्वेन हेतुत्वादितिफलानुरोधित्वात्कल्पनायाइतिभावः लीलावतीकारेवितस्य
चापमाशयः लाघवादवच्छेदकमनंतर्भाव्यैवप्रतियोग्यभावयोर्विरोधः मूलेवृक्षेनकपिसंयोगइत्यादिप्रतीतीकांचवृक्ष
निष्ठकपिसंयोगावच्छेदकत्वाभावोमूलादिनिष्ठोविषयइति अव्याप्यवृत्तीतिनचसिद्ध्यसिद्धिव्याघातः उक्तविरोधेनाप्य
नस्तन्निरासइत्याशयात् नवीनास्तुसामग्र्युत्तरक्षणः कार्याधिकरणमित्येवनियमोनतूत्पत्यंतर्भावेणेतिनसंयोगादि
स्थलेपुनरुत्पत्त्यापत्तिरतआह धारावाहनेतीत्याहुः तच्चिंत्यं संस्थानस्याव्याप्यवृत्तितयाधारावाहनस्थलेचेत्यस्यासामंज
स्यात् धारावाहनेत्यस्यपूर्वमव्याप्यवृत्तिविशेषेतिपूरणेचतस्यैवाधिक्यात्तस्यैवेति अन्यथाधारावाहिकत्वस्यैवानुपपत्ते
रितिभावः दीधितौप्राथमिकेतिप्रथमोत्पन्नेत्यर्थः इदंचलाघवकल्पनमात्रमितिबहवः संपातायातमित्यन्ये आंशिकेति

म॰ प्र॰
२६४

र्विकल्पकपदं ज्ञानपरमितितु मान्याः व्याख्यायां पूर्वत्र प्रथमे द्वितीये च क्षणे विशेषस्य निर्विकल्पकाव्यवहितपूर्वक्षणस्य एककार
णेति कारणांतरानुपनमेऽप्युत्पत्तिप्रसंगाभावादिति भावः तथात्वं अतीन्द्रियत्वं प्रत्यक्षेति प्रागभावप्रत्यक्षेत्यर्थः तस्य प्रागभावस्य
संबंधितावच्छेदकेति निर्विकल्पकत्वेत्यर्थः ज्ञानप्रागभावत्वादीति आदिना प्रत्यक्षप्रागभावत्वपरिग्रहः दीधितौ एकेति अवच्छे
दकत्वादिसंबंधेनेत्यर्थः आदिना तादात्म्यपरिग्रहः कार्याभावस्येति शाखाद्यवच्छेदकस्य चाव्याप्यवृत्तिं प्रतिप्राथमिकनिर्विकल्प
कं प्रति चेति शेषः उत्तरेति कार्याभावस्य शरीराद्यवच्छेदकस्य चेति शेषः उत्तरेत्यस्य निर्विकल्पकोत्तरेत्यर्थः व्याख्यायां पंचमक्षणे
इति निर्विकल्पकोत्तरज्ञानस्य नाशादिति भावः उत्तरत्वं स्वध्वंसविशिष्टत्वमित्याशयेनाह ध्वंसावच्छिन्नेति ज्ञाद्याहृतादृशेति प्रा
थमिकनिर्विकल्पकेत्यर्थः शाखादेरिति संयोगप्रादेशिकत्वनियमायेति शेषः ननु प्रागभावप्रादेशिकत्वे मानाभावेन कथं प्रागभा
वस्य संयोगप्रादेशिकत्वनियामकत्वमत आह दीधितौ तत्स्वभावाधीना चेति प्रागभावस्वभावाधीना चेत्यर्थः इतराप्रयोज्या चेति प्रा
वत तत्प्रादेशिकत्वात् प्रागभावस्य प्रादेशिकत्वात् अजन्यस्याधिकरणत्वादिवत्प्रादेशिकत्वमपीतराप्रयोज्यमेवेत्याशयः व्या
ख्यायां अतिरिक्तप्रागभावेति एतस्य हेतुत्वेन विनिगमनाविरहः धर्मिग्राहकमानसिद्धत्वस्यैव विनिगमकत्वादित्याशयः प्र

राम॰
२६४

र्वोपदर्शितरीत्याऽभावत्वेमानं सुवचमेवेत्यत आह इत्यादिकमिति प्रागभाववत् संयोगादीनामपि स्वभावादेव प्रादेशिकत्वनि
यमोपपत्तिरिति भावः द्विसमवायिकारणकस्य त्वे एकस्यासमवायिकारणसंयोगस्य तत्वेन हेतुत्वादेव तद्व्यादौ नियमसंभवा
दाह वस्तुतः समवायिकारणकेति चरमतंतुसंयोगस्य तत्वेन हेतुत्वे शततंतुकपटादेः स्वाश्रयतावत्तंतुचतुष्टयत्वानुपपत्तेराह संख्यावि
शेषस्येति द्रव्यसंच संख्याविशेषस्य द्व्यणुकत्वादिनियामकत्वे च तत्कारणइति· रातस्यासंख्येत्यादावन्वयः। असमवायिकारणेति तंतूत्पत्ति
क्षणोत्पादि चरमतंतुगतैकत्वेत्यर्थः तादृशेति चतुष्टयक्षणइत्यादि दीधितौ तत्संभवेपीति पूर्वोपदर्शितरीत्या संख्याविशेषस्यनि
यामकत्वासंभव इत्यस्वरसोऽपिनाहृचितः व्याख्यायां कारणत्वेनैवेति तत्पाचवक्ष्यमाणरीत्या द्वित्वस्यत्वेइव लाघवासंभवेन प्राग
भावएव नलिद्धेरिति भावः प्राच्यमतेरिति अत्र विनिगमनाविरहेणानेकद्वित्वानां विशेषतो हेतुत्वापत्तौ गौरवमेवास्वरसः के
चित्तु प्रथमद्वितीययोः द्वितीयतृतीययोश्च द्वित्वत्रित्वासमवायि इति मते सर्वत्र समवायिपर्याप्तकिंचिदसमवायिसत्वेऽप्यसमवाय्यनु
त्पाददशायां प्रथमोत्पन्नगतद्वित्वादेर्चरमोत्पन्नगतैकत्वस्य च तत्वेनान्योर्विशिष्यकारणत्वेपि तदुत्तसमवायिनां तत्तद्व्यक्तित्वेन हे
तुत्वस्यावश्यकत्वया तादृशकारणत्वे मानाभाव इत्यस्वरसो बोध्यः इत्याहुः विनिगमनाविरहेपीति। तपाचत्रित्वस्यत्वेपिलाघवामा

राम

नान्त्रभागभावर्त्तिद्वित्वमिति भावः । कल्पनात्तपसपूर्वोक्तिघम्मादिक त्यनात्मपस्यतन्त्रित्वादेरेकस्याद्वेतिः तथाचतस्याः सर्वत्रा
विशेषणत्वादिति प्रसंगएवेति भावः एकत्वद्वयमात्रेतिमात्रपदेन ततीयैकत्वव्यवच्छेदः द्वयोर्द्वित्वज्ञानेएकत्वद्वयमात्रज्ञानेपि
त्रित्वाद्यनुत्पादीविवादग्रस्तः द्वित्वज्ञानसहकृतैकत्वज्ञानादेस्त्रित्वाद्युत्पादकत्वमतेतत्रत्रित्वाद्युत्पादादतआह द्वित्वाज्ञानइति
तदेकत्वद्वयेति नहि तिज्ञानविशेषणांयस्मिन्नेकत्वद्वयज्ञानेतत्तीयैकत्वमपिविषयस्तज्ज्ञानगततद्व्यक्तित्वेनैसपर्षः तत्रि
त्वंप्रतीतिभ्रमपमाशयः सामान्यतोमात्रस्यवृत्तिसंख्यायामपेक्षाबुद्धिहेतुः अपेक्षात्वंचनानैकत्वावगाहित्वंनानात्वंचानुगता
नतिप्रसक्तंद्वित्वादन्यतदुर्वचमितिएकत्वद्वयज्ञानत्वेनहेतुत्वफलितं त्रित्वादिस्थलेप्येकत्वद्वयज्ञानसत्वान्नव्यभिचारः एवंचोक्ता
यत्तिवारणाय त्रित्वादौ ततीयैकत्वावगाह्येकत्वद्वयज्ञानत्वादिना हेतुत्वेपत्सामान्ययोरितिन्यायेनतत्रित्वंप्रतिनिरुक्तरूपतज्ज्ञान
स्यतद्व्यक्तित्वेनहेतुत्वमावश्यकं नचत्रित्वादावेकत्वत्रयज्ञानत्वादिति तादृशेतिनिरुक्तज्ञानेत्यर्थः एवमग्रेपि अपेक्षाबुद्धेः
ईश्वरयोगिनोरपेक्षाबुद्धेः तथाकारणत्वेतिविनिगमनाविरहेण नैवकारणत्वंतस्यकथं गृहीतसामान्यकारणतावच्छेदकस्यैवहषं
तरमंतर्भाव्यकारणतावच्छेदकतयानिर्वाहितस्यागानैचित्यादिस्थ रणतत्वेनकारणतादृत्यर्थः त्रित्वादेः पूर्वत्रित्वादेरसत्वेनविशे

षणत्वासंभवादाह उपलक्षणीभूयेति स्वस्वत्वजनकतावच्छेदकत्वानङ्गीकारेत्वाह त्रितयाश्रयेति अखंडोपाध्यतिरिक्तस्यान्यत
मतस्यस्वरूपतोवच्छेदकत्वासंभवादाह तत्प्रागभावेति तत्वेन तद्व्यक्तित्वेन नित्येति युगपदुत्पन्नस्याप्युपलक्षकं मिश्रोक्तां सामा
न्यलक्षणायुक्तिं दूषयितुं तन्मतमुपन्यस्यति दीधितौ पतितेति तत्तानेघ्योरिघाकृतोर्ज्ञानहृतोश्चेत्यर्थः विनेति संभवतीति
शेषः तदुपस्थितिं विना फलोपधायकततद्व्यक्तिघटितान्वयव्यतिरेकग्रहासंभवेन तेषां कार्यकारणभावग्रहासंभवादिति भा
वः योग्येति न च योग्यत्वं लौकिकप्रत्यक्षविषयत्वं तथा च निर्विकल्पकासंग्रह इति वाच्यं भावनादृष्टजीवनयोनियत्नान्यतमस्यैव
योग्यतापदार्थत्वात् आत्मनि संयोगादीनां योगपद्यसत्वाद्विशेषगुणेति विभुत्वाकाशे शब्दयोगपद्यसत्वादात्मनीति अन्यवृ
त्तियोग्यविशेषगुणत्वं जीवनयोनियत्नेतरयत्नासमवेतत्वे सति लौकिकमानसप्रत्यक्षाकारविषयिणी या जातिस्तद्वत्वं तथा च
तादृशजातिमतां ये गुणास्तेषामात्मनि योगपद्याभावनियमे तात्पर्यं तेन न निर्विकल्पकदृष्टयोगपद्यं तत्प्रत्यविशेषणेन वृत्ताना
दृष्टजीवनयोनियत्नस्य च योगपद्येऽपि न क्षतिः जीवनयोनियत्नत्वं च तत्र आत्मवृत्तिजातिविशेष इति युगपत्तत्स्वरूपयोगपद्यनि
षेधस्यात्मयोग्यविशेषगुणोत्पत्तिसंभवादाह व्याख्यायां योगपद्यमिति व्यक्तीति तत्तद्व्यक्तित्वावच्छिन्नेत्यर्थः यत्तत्वमिति पौर्वापर्य

घटितस्येत्यादिः सामान्यलक्षणेतितपात्ज्ञानत्वादिनातज्ज्ञानाद्युपस्थापनेपितद्व्यक्तित्वावच्छिन्नघटितपौर्वापर्यज्ञानासंभवा
दितिभावः दीधितौ पौर्वापर्येति तत्तज्ज्ञानेच्छाकृतीनां तत्तद्व्यक्तित्वावच्छिन्नघटिताव्यवहितपौर्वापर्याग्रहादसंभवः एवमग्रेपि
मारवापांज्ञानेच्छेतिस्वरूपयोग्यस्य ग्रहादेवेत्यादि नियतव्यतिरेकेति पौर्वापर्याघटितनियतव्यतिरेकमात्रेत्यर्थः कार्यकारणेतिस्व
रूपयोग्यएवसामान्यत इत्यादि अवश्येति सामान्यलक्षणावादिनापीत्यादि अभ्युपेत्येति अलपग्रहस्यापि कारणतायाह कत्वम
भ्युपेत्येत्यर्थः वस्तुतउक्तरीत्यातस्यप्रयोजनाभावइतिभावः इच्छात्वविशिष्टेति इदमुपलक्षणं ज्ञानेच्छास्थलेज्ञानत्वविशिष्टो
पनीतमानेच्छात्वविशिष्टलौकिकप्रत्यक्षात्मकस्येत्यपि द्रष्टव्यं तेन ज्ञानेच्छास्थलेज्ञानत्वेच्छात्वनिर्विकल्पककालएवज्ञाननाशा
त्कथं तादृशज्ञानत्वादिनालपग्रह इत्याशंकानवकाशः सामान्यलक्षणानंगीकर्तृविशेषणज्ञानहेतुत्वानंगीकारेणानिर्विकल्प
कापेक्षैव नेत्याशयेनाह विशिष्टेति पूर्वं सामान्यलक्षणापूर्वपक्षग्रंथे खंडितमिति सामान्यलक्षणानंगीकर्त्रेत्यादि विशेष्ये
विशेषणमिति इच्छात्वप्रकारकगुणभावेन तदंशे विशिष्टवैशिष्ट्यबोधरूपत्वासंभवादितिभावः इतिमते इतिसिद्धांते प्र
कारांतरेण रूपानुत्पाद इत्याद्युक्तप्रकारेण अन्वयमात्रेति मात्रपदेन पौर्वापर्यव्यवच्छेदः तद्ग्रहस्त्वनुमानादिनैवेतिभा

वः दीधितौ सा साक्षात्कारस्येति विषयस्य चर्वणवृत्तिनियैवहेतुत्वं तेनेच्छाघुस्यत्पनंनरं ज्ञानादिनाशेपिन क्षतिरिति भावः स्वत्वप्रया
पिकापेक्षातदुपधायकतानस्याप्यन्वयप्रयुक्तमाह स्मरणेनेतिव्याख्यायां ज्ञानयोरेवेति चा नुधारैव नुमेनोपोगादेर्हेतुतया
रासमवादिक्षणेवाभ्युपायुत्पत्तिर्मध्यते इच्छादिकाले च तदुत्पत्तिरिष्यत एव वाधकाभावात् अत एव ज्ञानायोगपद्यादेकमनसः
तिसकृतेज्ञानयोरेव यौगपद्यनिषेधः संगच्छते योग्यविशेषगुणयौगपद्यस्यात्मनिषेवेचमानाभावः एतेन पादेवेदनाशिरसि
सुखमित्यनुभवेन तादृशनिषेधस्यैकावच्छेदपरतया नानागुल्फावच्छेदेन युगपद्दंशनिप्रपल्लोपगमेपि ज्ञानेच्छायोगप
द्यमसंभवीति युगपद्दंशतीसाप्दिदीधितिरसंगतेतिनिरस्तम्पिसाशापः विंशत्यैतीति अत्र प्रस्यवतिष्ठंते वहवः विशंसं
गुल्फावच्छेदेन युगपद्दंशति कृतीनामुत्पादेमानाभावेन कल्पनद्वयातीकृत संज्ञानेच्छादीनां योगपद्यं स्वीक्रियते अपेक्षादि
जातीयनीनावैशिष्ट्यानुपपत्तिः विजातीय कृतीनामेकदोत्पत्तिरवश्यं स्वीकार्या अन्यथैककृतेर्विजातीयनानावैषि
जनकत्वेपदाऽवच्छेदकतासंबंधेनैकांगुल्यांयादृशकृतिवशात्तमयापसंबंधेनयादृशीचेष्टाभवतितादृशकृतेरन्यांगु
ल्यामप्यवच्छेदकतासंबंधेनसत्वात्कथंनान्यांगुल्यांतादृशीचेष्टाभवतीत्यापत्तिवारणाय विजातीयनानाकृतीनामेव

विजातीयनानाचेष्टाजनकत्वमुपेयं एवं च विजातीयनानाकृतीनां योगपद्यात्स्वीकारे कथमेकदा नानाचेष्टोत्पत्तिरित्यस्य यथानुप
पत्त्या नानाकृतीनां योगपद्यं स्वीकारणीयमिति चेन्न एकदा विजातीयचेष्टानां मेकृतितः स्वीकारेप्युक्तापत्तेरसंभवात् तथा हि
समवायसंबंधेन विजातीयैतच्चेष्टां प्रति स्वीयविजातीयैतत्क्रियावत्त्वसाध्यत्वाख्यविषयतानिरूपितोपादानत्वाख्यविषयता
संबंधेन कृतेर्हेतुत्वं स्वीक्रियते तथा च पदे तदंगुल्यां विजातीयावेष्टात्तदंगुल्यां विजातीयाचेष्टा इति नानांगुल्युपादानकनानाचेष्टा
साध्यकाण्येकाकृतिर्जाता तदा एकांगुल्यवच्छेदेन पादृशी चेष्टा जायते सा नान्यांगुल्यवच्छेदेन जायते तदंगुल्यां तादृशचेष्टावत्तिसा
ध्यत्वाख्यविषयतानिरूपितोपादानत्वाख्यविषयत्वाभावात् न तदंगुल्यवच्छेदेन तेन संबंधेन कृतेरसत्वमिति नोक्तापत्तिः यत्तु
एकदा नानाकृतिस्वीकारे लाघवसंभवात्तस्य च तत्सम्यक् तथा हि उक्तसंबंधेन कृतेर्हेतुत्वस्वीकारे पदे तत्पुरुषीयांगुलीचेष्टाविष
यिणी पुरुषांतरोपकृतिरस्ति तदा कथं न तत्पुरुषस्य स्वांगुल्यवच्छेदेन चेष्टोत्पद्यत इति तद्वारणाय तत्पुरुषीयत्वमवश्यं निवेश्यमि
ति गौरवं मन्यते च नानाकृतिस्वीकारे समवायसंबंधेन चेष्टां प्रति स्वावच्छेदकता संबंधेन कृतेर्हेतुत्वे एकपुरुषीयकृतेरन्यपुरु
षीयांगुल्यामवृत्तेः नानाकृत्यवच्छेदकत्वं स्वीक्रियत इति न तत्पुरुषीयत्वनिवेशः तथा च तदंनिवेश्यकार्यकारणभावकल्पनेम

हृद्व्यापकत्वमिति तदसत् समाप्यवच्छेदकतानिरूपकोपादानतोऽभ्यसंबंधेन कृतेर्हेतुत्वोपगमेन तत्पुरुषोपपत्तावनिवेशाभावात् एक
पुरुषीयां गुल्माभ्यन्य पुरुषोपकृतेरनवच्छेदकत्वात् परंतु भवन्मतएवानंतवैजात्यतदवच्छिन्ननियामककल्पनेन महद्गौरवं
मित्यैककदानानाकृतिस्वीकारोन समीचीन इति अत्रोच्यते एककृतितो नानाचेष्टास्वीकारे तच्चेष्टां प्रतिकृतेः तादृशोभयसंबं
धेन हेतुत्वस्वीकरणीयमिति भवन्मते कारणतावच्छेदकसंबंधाधिक्यं एककृतिनानाकृतिस्वीकारे तु अवच्छेदकत्वे च कारणता
वच्छेदकसंबंध इति लाघवं तथा चैतादृशलाघवेन समवायसंबंधेन चेष्टां प्रत्यवच्छेदकतासंबंधेन कृतेर्हेतुत्वे सिद्धे पश्चात्
पत्तिवारणाय विजातीयचेष्टाजनकत्वेन विजातीयनानाकृतीनां तद्व्यक्तिजातीनां तदवच्छिन्ननियामकानां च कल्पना गौरवस्यो
त्तरकालिकत्वेन फलमुखतयाऽदोषत्वादिति अत्रेदमवधेयम् नानाचेष्टासाध्यकसमूहालंबनात्मकैककृविजातीयप्रयत्नादेव युग
पद्बहुविधविजातीयचेष्टोत्पादसंभवेन युगपद्विजातीयबहुविधचेष्टास्थानुपपत्त्या युगपद्बहुविधप्रयत्नोत्पादस्वीकारो नि
रर्थकः एवं च न तु समवायसंबंधेन चेष्टानिष्ठतत्तद्वैजात्यावच्छिन्नं प्रति तादृशकृतेर्नावच्छेदकतासंबंधेन कृतित्वेन हेतुता तादृशकृते
त्वेन संबंधेन विंशत्यंगुलीषु सत्त्वेन तत्तद्वैजात्यावच्छिन्नस्य देशविशेषोत्पादनियामकत्वानुपपत्तेः न चोपदर्शितरीत्या सम

नायसंबंधेनचेष्टानिष्ठतत्तद्वैजात्यावच्छिन्नंप्रतितत्तद्वैजात्यावच्छिन्ननिष्ठसाध्यत्वाख्यविषयतानिरूपितोपादानत्वाख्यविषयता
संबंधेनविजातीयकृतित्वेनहेतुत्वान्नैषदोषइतिवाच्यं एतदंगुल्यांविजातीयचेष्टोत्पादाकारकविसंवादिप्रयत्नादपिविजा
तीयचेष्टोत्पादापत्तेरितिचेन्नैवं तत्तदंगुलीवृत्तिसंयोगादवृत्तरदेशविधयातत्तदंगुल्यादेर्हेतुत्वेकल्प्यमानेतत्रैवलाघवा
त्तत्तदंगुलीसमवेतत्वावच्छिन्नंप्रतितत्तदंगुलीत्वेनहेतुत्वंकल्प्यतेतथाचवल्कगत्यायस्यामंगुल्यांयद्वैजात्यविशिष्टचे
ष्टोत्पादेतदंगुलीसहकृतस्यतादृशसंबंधेनप्रयत्नस्यनियामकत्वान्नदोषः नचैतदंगुल्यांविजातीयचेष्टोत्पादाकारकपुरु
षांतरीयांगुलीविषयकपुरुषांतरीयप्रयत्नादपिविजातीयचेष्टोत्पादप्रसंगः तत्रतत्पुरुषीयतादृशप्रयत्नादेवतस्यामंगुल्यां
विजातीयचेष्टोत्पादेनतत्रतस्यामप्यंगुल्याः सहकारित्वादितिवाच्यं उपदर्शितरीत्योपादानत्वाख्यविषयतावच्छेदकत्वो
भयसंबंधेनप्रयत्नस्यहेतुत्वकल्पनेनान्यपुरुषीयकृतेरन्यपुरुषीयांगुल्यामवच्छेदकत्वाभावेनोक्तदोषाभावात् नचैवंगो
रवंयुपपत्तिं शक्तिप्रयत्नोत्पादस्वीकारेवच्छेदकतासंबंधेनैवकृतेर्हेतुत्वकल्पनेलाघवमितिवाच्यं एककालेबहुविषयप्रयत्न।
स्वीकारेतेषांतत्तदंगुल्यवच्छेदेनतानियामककार्यकारणभावकल्पनेनभवन्मतएवगौरवात् एवंतत्तद्विजातीयचेष्टानिर्वा

हकतत्तत्प्रयत्नेनानाजातयोरवश्यं कल्प्याः अन्यथा तत्तद्विजातीयचेष्टादीनामुत्पादस्य देशविशेषे किंचित्कारणानियम्यत्वादिस्य
पिगौरवं भवन्मते किंच तत्तद्वैजात्यावच्छिन्नप्रयत्ननियामककल्पनेन प्रत्यक्षादौ प्रवृत्तिसामग्र्याः प्रतिबंधकत्वस्य सर्वसिद्ध
तया तत्तन्नियामककघटिततत्तद्विजातीयप्रयत्नसामग्र्याः प्रत्यक्षादौ प्रतिबंधकता कल्प्या च नानाप्रयत्नांगीकर्तृमते गौरवं दु
रुद्धरमेव नन्वेतद्गौरवं फलमुखत्वेन यथा न दोषस्तथोक्तमेवेति वाच्यं नानाव्यक्तिकल्पनास्थले फलमुखगौरवस्यापि दोषतयाऽनव
न्त्यव्यवस्थापनात् तस्माद्युगपद्विंशतिप्रयत्नोत्पादवद्विंशतिपदार्थीयेति त्रुत्तोलिखनेन तत्सुधीभिश्चिंतनीयमेतत्सकलं विस्तरेण आ
वश्यकत्वादित्तितार्किकचक्रवर्त्तिनः स्वकसमवायावच्छिन्नप्रतियोगितावच्छेदकताकगोनिष्ठान्योन्याभावप्रतियोगितानवच्छेदक
त्वरूपमेव गोत्वं विवक्षितं न तु प्रतियोगिवैयधिकरण्यघटितोक्तरूपं गौरवात् एवं चासमवेतस्यैव यत्नादेरपि व्यधिकरणसम
वायावच्छिन्नप्रतियोगितावच्छेदकताकगोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतया तन्मात्रे व्यभिचारानवकाशेन समवेत
त्वमनुपादेयमेवेति प्राहुः नैयायिकाः शंकते दीधितौ स्यादेतदिति प्रयोजकत्वेऽरतिरजतादौ छायां तज्ज्ञानहेतुतायां घटकत्वेऽस्म
र्थः नन्वरजतादौ छायां तद्धर्मिकेष्टसाधनताज्ञानत्वादिना छायाहेतुताया आवश्यकत्वे स्वातंत्र्येणोक्तहेतुतायामेव मानाभाव

इतिवाच्यं रजतादिसिद्धासाज्ञानयोस्तादृशज्ञानाद्विरहाभ्यांतादृशेच्छाविरहे तज्ज्ञानाभावस्यैव लाघवेनप्रयोजकतयाचोक्तहेतुनायाआव
श्यकत्वेन्माशयाद् एतदाशयेनैवच स्वृतिसामान्यतश्चेत्यादिव्याख्यापांभावइतिनियमेनसादित्यस्यभावइत्यर्थः अस्य व्या
त्यनंगीकर्त्तृमतेइतितदंगीकर्त्तृमतेतुलाघवेनतत्प्रकारकग्रहविषयत्वमेवनियामकमितिभावः संभवतीतिप्रमेयत्वादिनो
पस्थितेस्तादृशव्यवहारजनकत्वाभावादिभावः तद्व्यावर्त्तनाय उक्तनियामकत्वव्यावर्त्तनाय तद्व्यावर्त्तनेत्वनागतेच्छाविष
योपस्थित्यर्थंसामान्यलक्षणावश्यकीतिभावः विशेष्यविशेषणभावेविनिगमनाविरहादाह रजतत्वप्रकारकज्ञानत्वेन
चेतिकारणताद्वयस्यावश्यकत्वेप्यवच्छेदकलाघवमस्त्येवेत्यतआह किंचेति वाच्येतिआपातिप्रसंगवारणायसामानाधि
करण्यंद्वितीयातिप्रसंगवारणायसमानविशेष्यत्वंप्रत्यासत्तिः तथाच कालिकोव्यापकतासमवायेनव्यापकताविशेष्य
तयान्वव्यापकत्वैककारणतायामेवनिविष्टेतिनातिप्रसंगइतिभावः प्रकारविशेष्ययोर्न्यूनाधिकभावस्यातत्वत्तदुभयरीत्येष
त्वादाह किंचेति प्रमेयत्वादिनेतिसानेच्छायांचाचेति असंसर्गग्रहादेरित्यस्यप्रकारांतारणवृत्तारणांवदतोमतमाह यत्विति
तोत्पादितिअतआहअसंसर्गाग्रहादेरितीति शेषः रजतत्वप्रकारतेतिइदंचविषयतायाविशेषणरूपेणापितंबंधत्वमित्यपि

स्याघवा विषयताविशेषस्य संबंधत्वमात्रमभिप्रेतं तत्संबंधतातु सामान्यरूपेणैवेति ध्येयं एकव्यक्तितादृशकारणतास्थलेसाम
ग्रीव्याप्तेर्नानाव्यापकताविशिष्टस्यैकस्य निवेशइत्याशयः अन्यथा सामग्रीव्याप्तेर्नानाव्यापकताविशिष्टायाएकव्यक्तेरनि
वेशे उक्तातिप्रसंगः उक्तरीत्यातिप्रसंगः तमेवाहव्यधिकरणेति प्रत्यासत्त्यादित्यंतकालेऽऽत्मनि चेत्यादिः नकिंचिदितिव्यक्ति
द्वयेकालिकदैशिकव्यापकतयोः सत्वेनोक्तस्थलेतिप्रसंगवारणायतादृशैकव्यक्तिनिवेशस्यावश्यकतयानपूर्वोक्तातिप्रसंग
इतिप्रघट्टकार्थः। वाच्यइतितपाचानागतविषयकेच्छानुरोधेन सामान्यलक्षणावश्यमुपेयेति हृदयं प्रत्यासत्तित्वमितिशा
ब्दज्ञानमित्यादिप्रत्ययेन विषयतासंबंधोपि वृत्तिनियामकइत्याशयस्तेनन पूर्वापरविरोधः अविशेषादितिपर्यायपर्य
ष्टाद्रूपकार्यजनकयोरित्यादि दोषाभावभेदाग्रहादीति दोषाभावसहितभेदाग्रहादीत्यर्थः आदिना दोषसहितभेदाग्रहपरिग्रहः
वस्तुतस्तत्प्रपर्यायसंख्येनान्वयाभिप्रायेण यथाश्रुतमेवसम्यक् आदिनात्यंताभावाग्रहपरिग्रहइति। उपपत्तिरितितन्मतेतद्वि
शेषादेवसहकारित्वे जलभ्रमणासंभवइत्याशयः दीधितौ विशेषइतिपत्सामान्येपत्सामान्यमित्यादिन्यायादितिभावः व्या
ख्यायांकरणतित्वद्धोरित्यादि दोषस्यैव रजतत्वग्रहप्रतिबंधकदोषस्यैव उपस्थितिनमितिइदंचानुपस्थितेचेत्यादिपूर्वोक्तदो

म॰ प्र॰
२७०

१

षनिरासायोक्तं तस्ययोर्भेदाग्रहः तज्जिष्ठोपोरञ्जतभेदाग्रहः एवमग्रेपिदोषवितौ हेतुरितिसमानविषयत्वप्रत्यासत्त्याहेतुरित्यर्थः न
चएतन्मतेऽनागतविशेष्यकेच्छानुरोधेनसामान्यलक्षणासिद्धिरावश्यकी वाच्यं अस्ति ह्युपरागेणासिद्ध एवेच्छाविषय इत्याशयान्
अतएव विसंवादीच्छास्थलेऽनागतारजतोपस्थित्यर्थं तत्सिद्धिरावश्यकीत्यपि निरस्तं बलवदनिष्टहेतुरित्यस्य सामान्यतः आत्मनिष
प्रत्यासत्त्याहेतुरित्येवार्थ इतिसारं सामान्यलक्षणाभ्युपगंतुरेव कस्यचिद्देशिनो मतं प्रसंगाद्दूषितमित्यपाकुः ननु यत्र लिंगात्संस
र्गाग्रहात्ताध्यासंसर्गाग्रहस्ततो यपार्थेच्छा तत्र व्यभिचारेणाकारणाय पार्थत्वाय पार्थत्वस्येच्छाय पार्थत्वाय पार्थत्वेनियामकत्वा
संभवेनमदुक्तरीत्यादरआवश्यक इत्यत आह तद्दिशापीति व्याख्यायां उपस्थित्यर्थमपीति अपिरवधारणे यद्वा उपस्थित्यर्थमपी
ति॰ भेदाग्रहकारणतावच्छेदकीभूतोपस्थित्यर्थमपीत्यर्थः पूर्वं तद्विषयकतत्प्रकारकज्ञानत्वेन कारणत्वस्याप्युक्तत्वात्तयाऽपिना
कारणीभूतानागतगोचरज्ञानमित्यस्य समुच्चयः ननुसिद्ध एवोपस्थितेरजतेऽसिद्धोपरागेणेच्छास्तित्यत आह हृदयमितिसि
द्धानुपरागेणाप्यसिद्धविषयकेच्छायाआनुभविकत्वादितिभावः वाच्येतिरजतभेदाग्रहप्रतिबंधकत्वेनदोषाणामनुगमादितिभा
वः अविरोधित्वादितिरजतत्वांशेऽन्याप्रकारकेच्छायां तादृशग्रहस्यैवविरोधितयारजतत्वाभावग्रहस्यरजतत्वांशेरजतत्वप्रकार

राम॰
२७०

कत्वादिति भावः अनुभवेन तस्यापि विरोधित्वमित्याशयेनाह तत्पातेपीति आत्मनिष्ठतयेति वाक चिक्यादि रजतसादृश्यत्वान
मेव दोषइत्यभिप्रेत्येदं अमात् रजतांशप्रमात्मकं अमात् विषयनिष्ठतयेति रजतसादृश्यमेव दोषइत्याशयेन यथाकथंचिदि
ति भेदाग्रह विशेषणं दोषाप्रयोज्यत्वार्थः तादृशेच्छेति उपस्थिते घटादाव श्रांतस्येत्यादि विसंवादीच्छेत्यर्थः ननु संवादित्वमुप
स्थित रजतभेदाग्रहहेतुतापेक्षया लाघवेन स्वप्रकारीभूतरजतता अपत्वसंबंधेन रजतत्वज्ञानत्वेन हेतुत्वमेवोचितमिति सिद्धर
जतत्वज्ञानादेवानागतरजतगोचरेच्छासंभवात् तदनुरोधेन सामान्यलक्षणावश्यकत्वमत आह इत्यादि कमुखमिति अयमाश
यः आर्यतमाज अत्त स्वकार्यतानवच्छेदकतया प्रमात्वादिवत् संवादीच्छात्वादिकं न कार्यतावच्छेदकमिति इच्छाज्ञानयोः समानप्र
कारकत्वसमानविशेष्यकत्वाभ्यामेकमेवहेतुत्वमित्यनागतगोचरेच्छानुरोधेन सामान्यलक्षणावश्यकीति समानविशेष्यकत्वेन सा
नेच्छयोर्हेतुत्वेपि नानागतगोचरेच्छानुरोधेन सामान्यलक्षणासिद्धिः सिद्धगोचरेच्छायाएवाभ्युपगमात् असिद्धविषयकेच्छायाश्चा
नुभविकत्वस्येवासिद्धेरित्याशयेनाहृदाधितात्माकुरितिव्याख्यायां असिद्ध इति अतोन तद्यमार्थे सामान्यलक्षणादरइत्याशयः
लाघवादितीति लाघवं च विरोधी संतत्स्यार्थेहेतुः लाघवादित्ति विवरणोतित्वरूपसदित्यादिनाकांतामरणज्ञानस्येति अमे दे

षष्ठी भवत्येवेतित था चात्रातेसादित्यर्थमिति भावः अभ्युपेत्येति तथा चेच्छायां वाधनिश्चयस्य विरोधित्वपक्षेपीच्छासामग्री घटनाया
त्वात्तत्याग युक्तमिति भावः दीधितावसत्वादिति अप्रसिद्धत्वादित्यर्थः ननु विशेषदर्शिनः सामान्यधर्मावच्छेदेन सिद्धत्वज्ञानासंभवेन
सामान्यधर्मप्रकारकेच्छाकदापि नोच्छिद्येतेति तत्प्रकारकेच्छायां तत्प्रकारसामानाधिकरण्येन सिद्धत्वज्ञानस्यैव विरोधित्वयाऽ
सिद्धेरिच्छानुरोधेन सामान्यलक्षणावश्यकीत्वोषितत्त्वस्य त्ववलोकनत्वसामान्यलक्षणायोपस्थितभाव्यवलोकनेतत्कांतीयत्व
मेसिद्धतत्त्वदवलोकनेतरतत्कांतावलोकनत्वेनेच्छेति न कथमित्यनेनोक्तदोषावकाश इति चेदुच्यते तत्त्वपि सामानाधिकर
ण्येन सिद्धत्वज्ञाने इच्छाप्यानुभवसिद्धत्वेनावच्छेदकावच्छेदेन सिद्धत्वज्ञानमेव प्रतिबंधकं न चैवं विशेषदर्शिनः सिद्धत्वज्ञान
दशतत्सामान्यप्रकारकेच्छाविच्छेदो न स्यादिति वाच्यं इष्टापत्तेः तदुक्तं न जातु कामः कामानामुपभोगेन शाम्यतीति अस्यार्थः
इच्छाविषयसिद्ध्या नेच्छाविच्छेदः किंतु सुखोपायेऽतिभोजनादौ रोगादिदुःखानुबंधित्वज्ञानप्रयुक्तद्वेषेणैवेतीति तार्किकच
क्रवर्तिनस्तु अन्यत्रात कांतामरणस्यापि शोकार्त्तस्य तदवलोकनेच्छानुभवसिद्धेति सर्वमिदमापातेनैतत् एव विचारितं अतएव एम॰
वभिचाराणां नात्पर्यं यायंज्ञान पुत्रमरणस्य शोकार्त्तस्य तत्पुत्रदर्शनेच्छत्यभिधानमपि संगच्छते वस्तुतस्तु यद्धर्मप्रकारके

च्छातत्प्रकारकोनिर्णयएवसिद्धत्वनिश्चयः तेनधर्माः स्ववृत्तित्वतत्कालावच्छिन्नत्वस्ववृत्तित्वस्वत्वपुत्रादिवृत्तित्वादयोबहुतराः
प्रकृतेचकांतावलोकनेइदानीं स्ववृत्तित्वप्रकारकेच्छासाचतत्प्रकारकनिश्चयाभावान्नानुपपन्नानचैवंसामान्यलक्षण
प्रत्यासत्तिरपि यत्प्रकारकनिश्चयेसतिनेच्छोत्पद्यतेत्यन्वयव्यतिरेकाभ्यांसएवप्रतिबंधकः सएवचसिद्धत्वनिश्चयस्तेनधर्माः
स्ववृत्तित्वादयः पूर्वोक्तास्तद्धर्मप्रकारकनिश्चयाभावात्तानानुपपन्नेतिकिंसामान्यलक्षणयेतीत्याहुः वस्तुतस्तु उक्तास्व
रसएवदोषेतिकृतान्नाद्वरित्युक्तासूचितइतिध्येयं ननुतत्प्रकारकेच्छायांतद्धर्मावच्छेदेनसिद्धत्वज्ञानस्यविरोधित्वेनसंभ
वतिएतद्घटत्वावच्छेदेनसिद्धत्वज्ञानकालीनायामेतद्घटस्वत्वंमेभवत्वितीच्छायाव्यभिचारादित्यतआह इत्यादिकमितिउ
हनीयमितितद्धर्मावच्छिन्नोद्देश्यताकेच्छायांतद्धर्मावच्छेदेनसिद्धत्वज्ञानंविरोधि उपदर्शितेच्छायांचैतद्घटस्वत्वत्वमेवो
द्देश्यतावच्छेदकंनत्वेतद्घटत्वमितिनोक्तव्यभिचारः उद्देश्यत्वंचभवत्वित्यादिपदाभिलप्यमानोविषयताविशेषइति
भावः व्याख्यायांगुर्वितिइदंचाप्रामाण्यज्ञाने प्रामाण्यज्ञानंनोत्तेजकमित्याशयेन तत्रेतिअप्रामाण्यज्ञानाभावस्य
कारणतावच्छेदककोटावनिवेशादितिभावः अज्ञानकांतामरणस्यतत्कांतावलोकनेइच्छोत्पत्त्यसिद्धत्वेनज्ञात

एवासिद्धत्वज्ञानमकामेनापि त्वयास्वीकार्यमित्यस्माकमपि तथैव्याशयेनाहुर्द्दीधितौ विशेषरूपेति संभवादिति समानप्रका
रकत्वेनैव विरोधित्वादिति भावः ननु अन्यथाख्यात्यनंगीकर्तृगुरुमते सिद्धेऽसिद्धत्वज्ञानमसंभवी स्यात् आह तदेकमिति
अशक्यत्वाच्चेति तथा चागत्या सिद्धेऽसिद्धत्वभ्रमजनकदोषसत्वेऽपि वैशिष्ट्यांगीकारेणापत्तेः सिद्धेऽसिद्धत्वभ्रमजनकदोषा
भावस्तत्रैच्छानुपपत्तावित्यापत्तिरेवेति भावः व्याख्यायां वर्त्तमानप्रागभावेतीदमुपलक्षणं प्रागभावानंगीकारे वर्त्तमान
कालध्वंसाधिकरणकालोत्पत्तिकमित्यपि द्रष्टव्यं पक्षधर्मताबलादिति इदं चानुमानेऽपि तुल्यमिति वैघल्यांगीकारेण
कालपक्षकानुमानेनैव सुखविशेष्यकासिद्धत्वज्ञानमित्याशयेन तदनंगीकारे नु तन्मूलकोपनीतभानादिति द्रष्टव्यं स्व
रूपेति अतीतत्वाव्यवहितवर्त्तमानप्रागभावप्रतियोगित्वात्मकेत्यर्थः प्रागभावपर्यंतमिति तेन चात्र साध्याप्रसिद्धिरनागतस्येन
दनुमानेनैव सिद्ध्या तत्सुखं प्रतियोगिभासकाभावेन सुखप्रागभावप्रत्यक्षासंभवादिति वाच्यं सुखोत्पादेत्यादिसाध्यकानु
मानादनागतसुखोपस्थितौ तदंशे उपनीतभानात्मकप्रागभावप्रत्यक्षस्वरूपसाध्यप्रसिद्धिसंभवात् मानाभावेऽपि इदमु
पलक्षणं उक्तरीत्या साध्यानुरोधेन सुखोत्पादेत्यादिसाध्यकानुमानस्यावश्यकत्वादित्यपि बोध्यं असिद्धत्वस्वरूपेति अतीत

व्यावृत्तसुखोत्पादेत्याद्याशंक्येत्यर्थः उद्देश्यासिद्धीति असिद्धत्वस्वरूपाज्ञाभादित्यर्थः कथमिति दृष्टांतप्रसिद्धाधारगोकसाध्या
संभवादितिभावः ज्ञाप्यवादाह कालिकतयेति स्वावच्छिन्नत्वसंबंधेनेति अनागतसुखं स्वोत्पादक्षणोत्पत्तिध्वंसस्यावच्छेद
कं सिद्धसुखं च स्वद्वितीयक्षणोत्पन्नध्वंसस्यानवच्छेदकं न स्यात् तादृशध्वंसानधिकरणप्रथमक्षणावृत्तित्वेनातिप्रसक्ततयान
वच्छेदकत्वादित्यसिद्धत्वस्वरूपज्ञाभ इतिभावः अनुगतत्वादिति अनुगतसाध्यसामानाधिकरण्यात्मकत्वादित्यर्थः तथा चा
नुगतेतादृशप्रतियोगित्वमेव कालप्रकानुमाने साध्यमितिभावः तदभ्युपगमेत्विति न व्यभिचारादितिशेषः अंशोपां
त्येति महाप्रलयाव्यवहिततत्पूर्वेत्यर्थः व्यभिचारेति तयोश्चरमक्रियादिरूपजन्यभावाधिकरणत्वादितिभावः इदानींतननि
यध्वंसावादाय महाप्रलये व्यभिचारवारणाय जन्यभावेति दीधितावनुमानादितिज्ञानमित्यनेनान्वितं अयानुमाने तुल्यवि
त्तिवेद्यतांगीकारे जन्यत्वं पंचम्यर्थः असिद्धत्वज्ञानस्यानुमानजन्यत्वात् तदनंगीकारे तु प्रयोज्यत्वमेव पंचम्यर्थः असिद्धत्वज्ञा
नस्यानुमानमूलकोपनीतभानात्मकत्वादिति ध्येयं व्याख्यापापाकानुमानेति पाकविशेष्यककृतिसाध्यतानुमानेत्यर्थः
नत्वनागतपाकज्ञानाभावेनासिद्धपाकविशेष्यकपरामर्शादेवानुमितोपक्षधर्मताबलेनानागतपाकभानमित्यादेर्व्यर्थमा

महादेवविरचितः नवानन्दीमञ्जरी

म० प्र०
२०३

णत्वादितिभावः अपक्षायामसिद्धत्वग्रहस्यत्वाघयाघ्येनुनेऽनुमितावप्यबाधितत्वयोरेवहेतुःस्यान्ननुबाधनिश्चयाभावस्य
तत्राह दीधितावितिकृतं पदत्रवितेनेति घनगर्ज्जितेनमेघानुमितावप्यसिद्धत्वाधिकायांचतस्यांव्यभिचारेणानुमितावबाधि
तत्वज्ञानस्यहेतुत्वंनसंभवतीतिभावः केचित्तुसिद्धत्वासिद्धत्वयोरज्ञानेपीष्टोत्पत्तिसंदेहेनासिद्धत्वनिश्चयाभावएवतत्रहेतुर्नि
श्चिताव्यभिचारकत्वात् किंचासिद्धत्वसंदेहोत्तरंसिद्धत्वनिश्चयेपीच्छावारणायासिद्धत्वनिश्चयाभावएवहेतुः असिद्धत्वज्ञान
हेतुत्वप्रतिपादकोदीधितिग्रंथस्तु तद्धेतुत्वेपिनसामान्यत्व कारणासिद्धिरित्यभ्युपगमवादेननतुवास्तविकतद्धेतुतापरइत्या
हुः आकारशब्दस्यप्रकारतार्थकत्वमभिप्रेत्याहव्याख्यायांनकेवलमिति ननुघटोनेवेतिघटत्वकोटिकसंशयेघटत्वेत्वस्यैव
कोटितावच्छेदकतयाकोटितावच्छेदकघटत्वांशेइत्यसंगतमतआहघटोनवेतीति विशेषदर्शनतमाव्याप्यदर्शनतयाव्या
प्यदर्शनमेवघटव्याप्यदर्शनमेवस्यात्तंन्येणव्यावर्त्तकधर्मदर्शनतया किंत्विति अतएवात्रघटसंदेहमित्यनुक्त्वाघटान्यता
संदेहमितिदीधितावुक्तमितिध्येयं विरोधित्वेतितस्यतत्रव्याप्यदर्शनतयाविरोधित्वात् ॥ ॥ श्रीएम

एम०
२०३

द्विशतोत्तराष्टमपत्रे सांकपृष्ठे नवमपंक्तौ शोधपत्रं बोध्यं

शोध

घटितत्वनिवेशेपि दोषदानायेत्याहुः॥ न चेतितीतथा च प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानाहेतुधर्मसामा
नाधिकरणत्वेन ज्ञायमानायावतो भावास्तत्प्रतियोगितावच्छेदकत्वस्य हेतुसमानाधिकरणप्रतियोगिताव भाव
च्छेदकत्वघटितरूपेणाभावस्य ग्रहो हेतुरितिभावः॥ तत्प्रतियोगितेतिहेतुसमानाधिकरणत्वेन ज्ञायमानानि
खिलाभावप्रतियोगितेत्यर्थः॥ दीधितौ तथा ग्रहेतिवह्नित्वानवच्छिन्नप्रतियोगिताकहेतुसमानाधिकरण
निखिलाभावप्रतियोगितावच्छेदकत्वाभावग्रहेत्यर्थः॥ संभवादितितथाचतदानीमनुमित्यापत्तिरिति
भावः॥ व्याख्यायां भ्रमे धूमसामानाधिकरण्यभ्रमे उक्तरूपेण वह्नित्वानवच्छिन्नप्रतियोगिताकत्वेन
तादृशाभावेति धूमसामानाधिकरणत्वेन ज्ञायमानवह्न्यभावेत्यर्थः॥ तथा च वह्नित्वानवच्छिन्नप्रतियोगि
ताकधूमसामानाधिकरणनिखिलाभावप्रतियोगितावच्छेदकत्वग्रहसंभव इति भावः॥ केचित्तु एकध
र्मावच्छिन्नप्रतियोगिताकाभावेन्यधर्मावच्छिन्नप्रतियोगिताकत्वभ्रमे मानाभावादाह दीधितौ धूमाधि
करणान्तरेतीत्याहुः। तद्वृत्तिभावस्यापि एतदधिकरणेति एतच्छब्देन यत्र धूमाधिकरणसंभवस्तस्य परिग्रहः

तद्वृत्तिएतभाष्यभावस्यापि १ करणे

3/18

हेतुसमानाधिकरणत्वेन ज्ञायमाना इ

त्तेन रासभत्वादौ चेत्यस्योपपत्तिः॥ तत्परिग्रहाभाव इति स्वाधिकरणांतरवृत्त्यभाव धूमसमानाधिकरण
त्वेन ज्ञायमानोपरिग्रह संभव इत्यर्थः॥ तथा च तादृशप्रमेयत्वादिर्यीत्यनेनाभिमतस्य धूमाधिकरणे तद्वृ
त्त्यभावप्रतियोगितानवच्छेदकत्वत्वेन प्रतियोगिसमानाधिकरणत्वेन ज्ञायमानो यावंतोऽभावास्तत्प्र
तियोगितानवच्छेदकत्वप्रमेयत्वादस्यासंभव इति भावः॥ अ इदं अनुपस्थितत्वं एतेनेत्यादिवक्ष्यमाणानुपप
त्तेराहरत्यंचेति अधिकरणेति धूमाधिकरणेत्यर्थः॥ इत्युक्ते इति तावतापि वक्ष्यमाणानुपपत्तिवारणसंभ
वादिति भावः॥ इत्थं अधिकरणांतरस्येत्यादिरूपेण धूमाधिकरणेति तद्धि एतदधिकरणनिष्ठाभावानामेव
धूमसमानाधिकरणत्वेन ज्ञानादिति भावः॥ एतद्वृत्त्यभावेति एतन्महानसवृत्त्यभावेत्यर्थः॥ तादृशप्रतियो
गितावच्छेदकत्वेन निरुक्ताभावप्रतियोगितानवच्छेदकत्व प्रमेयत्वादेर्पीत्यर्थः॥ प्रमेयत्वादेर्पीति प्रतियो

गितानवच्छेदत्वे अत्र लाघवज्ञानादिकं विना व्यभिचारिलिंगकानुमिते व्याप्तिभ्रमजन्यत्वनियमेन
रासभाद्यनुमितेरसंभवस्तच्चयेनो प्रमात्वमुक्तं इष्टापत्तिवारणाय दृष्टांते माहृदीयितो रासभौरिवेतिव
तज्ज्ञानांतरपरिग्रहः वस्तुतस्तु सामान्यलक्षणेत्यादि वक्ष्यमाण दूषणे

२०८

दे

शोधपत्रं बोध्यं